र ५ २ २ ५ ५ २ १र २ १
ह्वाओ६ह्वा। उक्रवा३४। ओ६ह्वा। अक्षावर्चाइः।
२ १ र २ २ ४
रश्मना। भा३४३इः। ना३यापु०ता६५६इ ॥ ३१ ॥

४ ५ १ र
(त्रिष्टु बौशनम् ॥) प्रातू। द्रवापरिकोशाम्।
२ २ १ २ १ २ १ २ ३ ४ ५
निषीश्दा। नृभाइःपुना। नो३अभि। वाजमर्षा।
१ र र ७ २ १र २ र
अश्वन्नत्वावाजिनम्मा। जया२३ताः। अच्छावर्हीइः।
११र २ १ ४
रशना। भा३४३इः। नाऽ३याप्नु०ताईपूईड॥ ३२॥ ५७

उशनाऋषिः*। हे सोम! "नु" क्षिप्रं† "प्रद्रव" प्रगच्छ आगत्वाच "कोशं" द्रोणकलशं परिनिषीद" निषस्सोभव। "नृभिः" नेतृभिः "पुनानः" पूयमानः "वाजम्" अन्नं यजमानार्थमुद्दिश्य "अभ्यर्ष" || [वाजं सङ्ग्रामं वा] "वाजिन" बलवन्तं "अश्वं न" अश्वमिव तं यथामार्जयन्ति तद्वत् ताम् "अर्जयन्तः" शोधयन्तः "बर्हिः" यज्ञम् अच्छ "प्रतिरशनाभिः" रशनावदायताभिरङ्गुलीभिः "नयन्ति" अध्वर्युप्रमुखाः ॥ १ ॥ ५७

---

* "काव्यः"-इति ऋषि नै०।

† 'अच्छ आप्तुम्'-इति वि०। मन्त्रश्रुतौ 'अच्छा'-इति दीर्घो निपातत्वात् (६, ३, १३६ पा०।)

‡ 'रशना यूपयोजनी'-इति वि०।

¶ "नु-इत्येषोनेकर्कमा, इदम् करिष्यतीति हेत्वपदेशः, कथम् करिष्यतीत्यनुपृष्टे, नन्वेतदकार्षीरिति चाथाप्युपमार्थे भवति वृक्षस्य नु ते पुरुहूतवयाः इत्यपि नु ते पुरुहूतशाखाः"-इत्यादि नि० १,४। "नु"-इति क्षिप्रनामसु च पठितमैघण्टुकम् (२, १५)।

§ 'बर्हिः प्रस्तरम्'-इति वि०।

|| 'रशनाः'-इति अङ्गुलिनामसु पठं नैघण्टुकम्।

अथ द्वितीया ।

१ २र ३ १ २ २ २ ३ १ ३ २ २ १ १
प्रकाव्यमुशने वब्रुवाणोदेवोदेवानांजनिमाविवक्ति ।
१ २ ३ १ २ ३ २
महिव्रतःशुचिबन्धुःपावकः
२ १ २ ३ १ ३क २र ३ १ २
पदावराहोअभ्येतिरेभन् ॥ २ ॥ ५८*

४५ १र १
(वाजसनीद्वे ॥) प्रा३। काविया२म् । उशने वा२।
१ २ १र र १र १
ब्रवार३णाः । देवोदेवा२। नाञ्जनिमा२। विवा-
२ १ १ १ २
२३क्तो । महिव्राता२ः। शुचिबन्धू२ः। पवा२३काः।
१ र १र ३ २ ५र र ३
पदावारा२। होअभियार३इ। तिरा३४औहोवा। भा
१ १ १ १
२३४५न् ॥ २३ ॥

१ र १ १ १र र
प्रकाविया२म् । उशने वा२। ब्रुवाणा२ः। देवो
१र १ १
देवा२ः। नाञ्जनिमा२। विवाक्तौ२। महिव्राता२ः।
१ १ १ र १
शुचिबन्धू२। पवाका२ः। पदावारा२। होर।
२ ३ ५र र २ १र ३ १ १ १ १
भिया३४औहोवा। तिरेभा२३४५न् ॥ २४ ॥

---

* छ० ४, २, १, १= ऋ० ७, ४, १२, २=उत्त ६, २, ५ ;— १६, २, १९ ;— २१ २, ३—६ ।

२ र र १ २ १
(वाजजित्साम ॥) प्रकाव्यमुशनेवब्रू३वाणो । देर-
५ २र र र र १ २ ३ ५ २
३४वा: । देवानाञ्जनिमावो३वाक्ती । मा२३४ही । व्रत:
१ २ ३ ५ २र र र १
शुचिबन्धुः पा२वाकः । पा२३४दा । वराहोअभ्येतिरा-
र १११११.
२३ । हाउवा३ । भा२३४५न् ॥ ३५ ॥

५र र १ २१र
(वाराहम् ॥) हाउहाउ । ऊप् । प्रकावियाम् ।
२१र २३४५ २र१र र २ १ २ ३
उशने । वब्रुवाणाः । देवोदेवा । ना३०जनि । मावि
४ ५ २ १ २ २ ३४५ र
वक्ती । महिव्रताः । शुचिवा३ । धुःपवाकाः । हाउ
र १ २१र २ १ २
हाउ । ऊप् । पदावरा । हो३अभि । आ३४३इ ।
२ ४
ती३रा५इभां६५६न् ॥ ३६ ॥

॥ इति पञ्चदशस्यार्द्धः प्रपाठकः ॥

वृषगणो वासितऋषिः* । "उशने एव" तन्नामकऋषिरिव "काव्य" कविकर्म स्तोत्रं "ब्रुवाणः" "देवः" स्तोता †

---

* "वृषगणो वासिष्ठः"-इति ऋषि- नै० ।

† 'देवः सोमः'-इति वि० ।

अयमृषिर्वृषगणोनाम "देवानाम्" इन्द्रादीनां "जनिमा" जन्मानि* "प्रविवक्ति" प्रकर्षेण वदति। [वच परिभाषणे (अदा० प०)। व्यत्ययेन विकरणस्य श्लुः (३,१,८५) बहुलं छन्दसीति (७,४,७८) अभ्यासस्य इत्वम्] "महिव्रतः" प्रभूतकर्मा†। "शुचिबन्धुः" बध्नन्ति शत्रूणिति बन्धूनि तेजांसि बलानि वा दीप्ततेजस्कः‡ "पावकः" पापानां शोधकः "वराहः" वरञ्च तदहश्च वराहः ["राजाहःसखिभ्यष्टच्"-इति टच् समासान्तः। तस्मिन्नहनि अभिषूयमाणत्वेन तद्वान्। अर्शआदित्वान्मत्वर्थीयोऽच्] तादृशः¶ सोमः "रेभन्" शब्दं कुर्वन्§ "पदानि" स्थानानि पात्राणि "अभ्येति" अभिगच्छति। यद्वा। यथा कश्चन वराहः "पदा" पदेन भूमिं विक्रियमाणः शब्दं करोति तद्वत्॥२॥५८

---

* 'जन्मानि कर्माणि वा'-इति वि०।

† 'महिव्रतः महतः कर्मणः व्रतस्य वा धारयिता' इति वि०।

‡ 'शुचिबन्धुः शोभनबन्धुः शुद्धबन्धुर्वा'-इति वि०।

¶ 'वराहः सोमः'-इति वि०। "वराहो मेघो भवति वराहारः। वरमाहारमाहार्षीरिति च ब्राह्मणम्। विध्यद्वराहन्तिरो अद्रिमस्तेत्यपि निगमो भवति। अयमपीतरो वराह एतस्मादेव। वृहति मूलानि वरं वरं मूलं वृहतीति वा। वराहमिन्द्र एमुषमित्यपि निगमो भवति। अङ्गिरसोऽपि वराहा उच्यन्ते 'ब्रह्मणस्पतिर्वृषभिर्वराहैः'। अथाप्येते माध्यमिका देवगणा वराहव उच्यन्ते—'पश्यन् हिरण्यचक्रानयोदंष्ट्रान् विधावतो वराहून्'"-इति नि० ५, ४।

§ 'रेभन् स्तुवन्' इति वि०।

अथ तृतीया।

२ १र २र ३१र ३र२ १ २ ३ १र २र ३ १
तिस्रोवाचईरयतिप्रवह्निर्ऋतस्यधीतिंब्रह्मणोमनीषाम्।
१ २ ३ १ २ ३ १ २ ३
गावोयन्तिगोपतिंपृच्छमानाः
१ ३ २ १ ३ २
सोमंयन्तिमतयोवावशानाः ॥ ३ ॥ ५९ *

१ २ १
(संक्रोशास्त्रयः ॥) होइ । हो । हा३होइ ।
२ १र र २ १ २ ३ ४ ५ १ १
तिस्रोवाचा । ई३रय । तिप्रवह्नीः । होइया२३होइ ।
२ १र र २ १ २ ३ ४ ५ २र १ १
तिस्रो वाचाः । ई३रय । तिप्रवह्नीः । आ । होइया२३होइ ।
२ १र र २ १ २ ३ ४ ५ १ २ १
तिस्रो वाचाः । ई३रय । तिप्रवह्नीः । होइहा । इहोइहा ।
५ २ २ १र र २ १ २ ३ ४ ५
औ३हो३१इ । इहा । तिस्रो वाचाः । ई३रय । तिप्रवह्नीः ।
१ २ १ ५ २ २ १र र
होइया । इयाइया । औ३हो३१इ । इया । तिस्रो वाचाः ।
२ १ २ ३ ४ ५
ई३रय । तिप्रवह्नीः ॥ १ ॥

३ २ ३ ५ २ र १
(वेणोर्विशाले द्वे ॥) इहोइह । इहोइहा३हो ।
३र २ ३ ५ २ १र र ० १ २ ३ ४ ५ ४र
वाहोइह । तिस्रो वाचाः । ई३रय । तिप्रवह्नीः । इहो

---

* उ० २,२,१०,१=ऋ० ७,५,१७,४=जबे २,१,१७=जयो ३,२,६ ।

१ १ २ ५ ४ ४
वा५। इहोवार३। ई३४हहाइ। ई५। इहा।
२ १र र २ १ २ ३ ४ ५ २ १
तिस्रोवाचाः। ई३रय। तिप्रवक्षीः। इहोवार३।
२ ५ ४ २ १र र २ १ १ २
ई३४हहाइ। इहा। तिस्रोवाचाः। ई३४रय। तिप्र-
४ ५ १ २ २ १ २ २ ५र र
वक्षीः। आऔ३हो। आऔ३हो३४। औहोवा।
२ २ १र र २ १ २ ३ ४ ५ १
हा३हाइ। तिस्रोवाचाः। ई३रय। तिप्रवक्षीः। आ
२ र र २ ३र ४र ५ २ १र र २
औ३होवाहा३४। औंहोवा। तिस्रोवाचाः। ई३
१ २ ३ ४ ५
रय। तिप्रवक्षीः॥ २॥

१र २ ४ ५ ४ २ २ १ २ २
ओहो३। ओहाओहा। ऋतस्यधाइ। तौ३०ब्रह्म।
२ ३ ४ ५ १ २ १ २ ३र २ १ २र १र
णामनीषाम्। हहहोइ। हंहहाहहो३। गावोयन्ताइ।
२ १ २ ३ ४ ५ १ २ १ २ ३र २ १
गो३पतिम्। पृच्छमानाः। इहहोइ। इहहाहंहोइ।
२र १ २ १ २ २ ४
सोमंयन्ताइ। मतयः। वा३४३। वा३शा५ना६५६ः॥
॥ ३ ॥ ५९

पराशर ऋषिः* । "वह्निः" वोढा यजमानः "तिस्रो वाचः" ऋग्यजुःसामात्मिकाः स्तुतीः प्रेरयति । तथा "ऋतस्य" यज्ञस्य "धीतिं"† धारयित्रीं । "ब्रह्मणः"‡ परिवृढस्य सोमस्य "मनीषां" मनस ईशित्रीं कल्याण-वाचं च प्रेरयति । किञ्च । "गोपतिं"¶ वृषभं यथा गावोऽभिगच्छन्ति तद्वत् गवां स्वामिनं सोमं "गावः" "पृच्छमानाः" पृच्छन्त्यः सत्यो, "यन्ति" स्व-पयसा माश्रयितु मभिगच्छन्ति । तथा "वावशानाः" कामयमानाः "मतयः" स्तोतारः§ "सोमं" "यन्ति" स्तोतु मभिगच्छन्ति|| ॥ ३ ॥ ५९

---

* "शाक्त्यः"-इति ऋषि-नै० । "पराशरः पराशीर्णस्य वसिष्ठस्य स्थविरस्य जज्ञे । पराशरः शतयातुर्वसिष्ठ इत्यपि निगमो भवति । इन्द्रोऽपि पराशर उच्यते पराशातयिता यातूनाम् इन्द्रो यातूनाम् अभवत् पराशर इत्यपि निगमो भवति"-इति नि० नै०६,३० ॥

† 'धीतिं कर्म'-इति वि०।

‡ 'ब्रह्मणो मनीषां वेदोक्तानि कर्माणि'-इति वि० ।

¶ 'गोपतिं यजमानं दक्षिणासम्बन्धेन पृच्छमाना इव, वृषभं वा' इति वि० ।

§ मतय इति स्तोतृनामसु न दृश्यते परं मेधावि-नामसु द्वाविंशतितमञ्चैतत्कमिति लक्ष्यते (३,१५) । 'मतयः बुद्धयः'-इति वि० ।

|| यास्कव्याख्यानन्त्वित्थम्—"वह्निरादित्यो भवति स तिस्रो वाचः प्रेरयत्यृचो यजूंषि सामान्यृतस्यादित्यस्य कर्माणि ब्रह्मणो मतान्येष एवैतत् सर्वमक्षरमित्यधिदैवतम् अथाध्यात्मं वह्निरात्मा भवति स तिस्रो वाच ईरयति प्रेरयति विद्यामतिबुद्धिमता मृतस्यात्मनः कर्माणि ब्रह्मणो मतान्ययमेवैतत् सर्वमनुभवत्यात्मगति माचष्टे"-इति (प०१,१४) ॥ विवरणकारस्तु पूर्वं यथोक्त व्याख्यायानन्तरमपरमपि व्याख्यानजालमाविस्तृतवान् तद्यथा—'यद्यपि पावमानीषु सोममुक्त्वा अन्या देवता न सम्भवति तथाप्यादित्यो व्याख्यातेति कृत्वा तेनापि आम्नानानुस्मरणार्थ मालिख्यते । तिस्रो वाचः । ऋग्यजुःसामानि अथवा तिस्रो वाचः सत्त्वरजस्तमांसि अथवा जाग्रत्स्वप्नसुषुप्तिलक्षणः । ईरयति प्रेरयति उदकरश्मींश्च वहतीति वह्निरादित्यः । ऋतस्य आदित्यस्य

अथ चतुर्थी।

३ २ ३ २ ३ १ २ ३ १ २ १ २ ३ २ ३ १ २ ३ १ २
अस्यप्रेषाहेमनापूयमानोदेवोदेवेभिःसमपृक्तरसम्।
३ २ ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ २ ३ १ २
सुतःपवित्रम्पर्येतिरेभन्मितेवसद्मपशुमन्तिहोता॥४॥६०॥*

३ २ ३र ४र ५ १र २
(अगस्त्यस्य यमिके द्वे ॥) अस्या३४औहोवा। प्रेषा। हे३
१ र २ ३ ४ ५ ३ २ ४ २ ३र ४र ५
मना। पूयमानाः। उहुवाइ। अस्या३४औहोवा।
१र २ १ र २ ३ ४ ५ २
प्रेषा। हे३मना। पूयमानाः। हाइ। उहुवा
३र २ ३र ४र ५ १र २ १ २ ३ ४ ५
देवा३४औहोवा। देवाइ। भीः। सम। पृक्तरसाम्।

धीतिः। अथवा ऋतस्य सत्यस्य ब्रह्मणः। अथवा ऋतस्य धीति यज्ञस्य वा आदित्यस्य वा हय इव 'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते'। 'ब्रह्मणो मनीषां गावः रश्मयः तेन विसृष्टा अथवा उदकानि। एतमेव गोपतिं रश्मि-स्वामिनं वा पृच्छन्त इव सोमं यन्ति पृथिवीं वसाना सर्वोपकाराय सोमं आदित्यं मतयः। प्रज्ञायते विषयाः अतिप्रकाशत इति रश्मयः। वावशाना आदित्यं यन्ति प्रविशन्ति। अध्यात्मं वह्निरात्मा भवति। वय्यादिगुणसंयोगात्। सः तिस्रो वाचः प्रेरयति। विद्या बुद्धिमनांसि। विद्या महान्। बुद्धिरहङ्कारं मन इति प्राधान्याद् भूतेन्द्रियाणि ऋतस्यात्मनः धीतिं मनसः इष्टानि कर्माणि प्रेरयन्ति ब्रह्मणः आत्मनः। गोपाः गोपायति। आत्मानं इन्द्रियाणि स्वामिनं पृच्छमानाः। आत्मानं तदभिप्रायेण शब्दाद्यनुगमन्ति। एतमेवमात्मानं सोमङ्कामयमाना इव यन्ति न भूयः तदर्थं प्रादुर्भवन्ति'-इति।

* उ० ६, २, ८, १ = ऋ० ७, ४, ११, १ = ऊह६'२। ७,

२ १ २ ३र ४र ५ १ २ १
हाउ। होइ। सुता३४औहोवा। पवाइ। त्रा३म्परि।
२ ३ ४ ५ २ र १ २ ३र ४र ५ १
एतिरेभान्। हा। हाऔहोइ। मिता३४औहोवा। वसा।
२ १ २ ३ ४ ५ १ २ २ ४
द्मा३पशु। मन्तिहोता। पशु। मा३४३। ती३हो५
ताई५ई ॥ ४ ॥

१र २र ३र २ १ ३ २ १ र १ २र
औहोवाहा३होइ। इहा। अस्यप्रेषा। हे३मना।
२ ३ ४ ५ २र १र र २ १ २ ३ ४ ५
पूयमानाः। देवोदेवाइ। भी३:सम। पृक्तरसाम्।
२ १ २ १ २ ३ ४ ५ १र २र ३र २
सुतःपवाइ। त्रा३म्परि। एतिरेभान्। औहोवाहा-
१ ३ २ १र २ १ २
३होइ। इहा। मितेवसा। द्मा३पशु। मा३४३।
२ ४
ती३होपुताई५ई ॥ ५ ॥ ६०

वसिष्ठऋषिः*। “अस्य” सोमस्य “प्रेषा” [प्रेषतिर्गत्यर्थः (भ्वा० प०) क्विपि रूपं। सावेकाच इति विभक्तेरुदात्तत्वं† प्रेषा] प्रेरकेण‡ “हेमना”¶ हिरण्येन “पूयमानः” हिरण्य-

---

* “मैत्रावरुणः”-इति ऋषि-नि०।

† “सावेकाचस्तृतीयादिर्विभक्तिः”-इति पा० ६, १, १६८।

‡ ‘प्रेषा प्रकर्षेच्छया’—इति वि०।

¶ बाहुलकादल्लोपाभावः।

अथ पञ्चमी ।

१ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ७ २
सोमःपवतेजनितामतीनाञ्जनितादिवोजनितापृथिव्याः।
७ १र २र ३ १र २र ३ १ २ ३ १र २र
जनिताग्नेर्जनितासूर्यस्यजनितेन्द्रस्यजनितोतविष्णोः॥५॥६१*

२र र १
(कालकाक्रन्दौ ॥) सोमःपवतेजनितामा३ताइना २म् ।
र र र १ १रर र
जनितादिवोजनितापृ३थाइव्या २ः । जनिताग्नेर्जनितासू ।

पाणिरभिषुणोतीति हिरण्यसम्बन्धः । तादृशः “देवो” दीप्यमानः अंशुः “रसम्” आत्मीयं “देवेभिः” देवैः सह[†] “समपृक्त” सम्पर्कयति संयोजयति। [पृची सम्पर्के (अदा॰ आ॰] ततः “सुतः” अभिषुतः सोमः “रेभन्” शब्दायमानः सन् “पवित्रम्” उर्णास्तुकेन निर्म्मितं[‡] “पर्य्येति” परिगच्छति। कथमिव ? “होता” देवाना माह्वाता[¶] ऋत्विक् “मितेव” निर्म्मातेव[§] “पशुमन्ति” बहुपशून् “सद्म” सदनानि यज्ञगृहान् यथा पर्य्येति तद्वत् ॥ ४ ॥ ६०

---

[*] उ॰ ३, १, १९, १ = ऋ॰ ७, ४, ६, ५ = ऊहे ३, २, १९ ;—८, २, २ ;— १२, १, १०—१६ ।

[†] ‘देवेभिः देवेभ्यः वस्वादिभ्यः’-इति वि॰ ।

[‡] दशापवित्रमित्यर्थः ।

[¶] होतेति व्हेञोरूपम् (६, १, ३४ पा॰) ।

[§] ‘मिता कर्त्ता’ इति वि॰ ।

७ २ १र २
रियार२३स्या। जनितेन्द्रा। स्याइजनि। तो३४३। तार
४
वा५इष्णो६५६ः॥ ६॥

३ ४ ५ र र २ २ ४ १
सोम पवतेजनिता। ए३। औ३हो५वाऽ। माता
२ १र २ १र २ १र २ १र
२३४५इना६५६म्। जनितरदिवोजनितापृथिव्याः। जना-
३ ५ २ र २ ४
२इतार३४ग्नेः। जनिता। सू३४३। री३या५स्या६५६।
२ १र २ १र २ १ १ १ १
जनितेन्द्रस्यजनितोतविष्णोर२३४५ः॥ ७॥

५र ४ ४ ५
(जमित्रे द्वे॥) हाउजनत्। ३। जनद्धाउ। ३।
१ १ २र १ २
होइ। जनत्। २। होइ। जनात्। सोमःपवा। ते३
१ २ ३ ४ ५ २ १र २ १ २ २
जनि। तामतीनाम्। जनितादाइ। वो३जनि। तापृ
५ ५ २ २र २ १ र २ ३ ४ ५ ५र
थिव्याः। जनिताग्नाइः। जनिता। सूरियस्या। हाउ
४ ४ ५ १
जनत्। ३। जनद्धाउ। ३। होइ। जनत्। २। होइ।
१र २ २ २ ४
जनात्। जनितेन्द्रा। स्याइजनि। तो३४३। ता३वा
५इष्णो६५६ः॥ ८॥

जनद्वाउ। ३ । जनदाउ। ३ । जनत्। होइ। ३।
२र १   २ १   २ ३ ४ ५   २ १र
सोमःपवा। ते३जनि। तामतीनाम्। जनितादाइ।
२ १   २ ३ ४ ५   २ १र   २१र १ ३ ४ ५
वो३जनि। तापृथिव्याः। जनिताग्नाइ। जनितासूरियस्या।
४ ५   ४ ५   १   र   २
जनद्वाउ। ३। जनदाउ। ३। जनत्। होयि। ३। जनि-
१ र   २ १   २   २ ४
तेन्द्रा। स्या३जनि। तो३४३। ता३वा५यिष्णो६५६:

॥ ८ ॥ ६१

प्रतर्दनऋषिः*। “सोमः” अभिषूयमाणः “पवते” पात्रेषु क्षरति। कीदृशः? “मतीनां” बुद्धीनां। यद्वा। मननीयानां स्तुतीनां “जनिता” जनयिता† [“जनिता मन्त्रे” (६,४,५३) इति निपातेन णि-लोपः] किञ्च “दिवः” द्युलोकस्य “जनिता” प्रादुर्भावयिता। तथा “पृथिव्याः जनिता”। “अग्नेः” “जनिता”

---

* “दैवोदासिः” इति वि० ।

† अत्रेदं विवरणम्—‘सोमः पवते। विनियोगोऽस्य चतुर्थेऽहनि। अधियज्ञपक्षे पर्णसोमस्य पृथिव्यादीनां। जनयितृत्वेन सम्भवात्। यज्ञद्वारेण स्थितिहेतुत्वात् जनयतीति जनिता मतीनां जनयिता दिवः जनयिताग्ने र्जनयिता सूर्यस्य जनयिता। इन्द्रस्य जनयिता। उत अपि विष्णोर्व्याप्तिमत्तदनि। जनयिता पृथिव्यादिभ्यः रसेन वर्द्धयिता। अधिदैवमैन्द्रः सोमः यदात्मनि तदायमर्थः। सर्वमिदं अयति। आत्मा सोमः पवते साधयति भोक्तृत्वात्। आत्मा सत्कारेण वा। प्रधानभूतेन्द्रियाणां जनयिता पृथिव्यादीनाञ्च द्वयोर्ग्रहणेनान्तरिक्षस्यापि अग्न्यादीनाञ्च स्थानानां तिसृणां विष्णोश्च व्याप्तिमतः॥”

अथ षष्ठी ।

३ १ २ ३ १र २र ३ १ २ ३ १ २ ३ १ २
अभित्रिपृष्ठंवृषणंवयोधामङ्गोषिण*मवावशन्तवाणीः ।
३ १ २ ३ १ २ ३ २उ ३ १ २ ३ १ २ ३ १ २
वनावसानोवरुणोनसिन्धु†र्विरत्नधादयतेवार्याणि ॥ ६ ॥ ६२ ॥‡

२ २ ५ १ ५र २
(अङ्गिरसां व्रतोपोहः ॥) ओ३हायि । ओ३हा । ओहा ।
१ ५ २ २ १ २ १ २ ३
इया२ । ओ३हा३ए । अभित्रिपा । ष्ठा३०वृष । णंव-
४ ५ २ १र २ १र २ १ ४ ५
योधाम् । अङ्गोषिणाम् । अवाव । शन्तवाणीः ।
२ १र २ १ ० ३ ४ ५ २ १ १ २
वनावसा । नो३वरुणोनसिन्धूः । ओ३हायि । ओ३-
५र २ १ ५र २ २ १
हा । ओहा । इया२ । ओ३हा३ए । विरत्नधाः ।
२ १.र २ २ ४ ५
दयते । वा३४३ । रौ३या५णा६५६यि ॥ १० ॥ ६२

प्रकाशयिता । ‘सूर्य्यस्य” सर्व्वप्रेरकस्यादित्यस्य “जनिता” “इन्द्रस्य” जनिता पानेन मदस्य जनयिता । “उत” अपि च । “विष्णोः” व्यापकस्य “जनिता” जनयिता¶ । एतत्सर्वं सोमेऽभिषूयमाणे भवति सोमेन हि देवताप्यायन्त इति ॥ ५ ॥ ६१

---

* “आक्रूयाणाम्”-इति; } ऋ० ।
† “सिन्धून्”-इति च }

‡ उ० ६, २, ११, १=ऋ० ७, ३, २६, १ = ऋक् ७, २, १७ ।

¶ अत्राह यास्कः—“सोमः पवते सोमः सूर्यः प्रसवनाज्जनिता मतीनां प्रकाशकर्मणा मादित्यरश्मीनां दिवो द्योतनकर्मणा मादित्यरश्मीनां पृथिव्याः प्रथनकर्मणा

अथ सप्तमी ।

१ २ ३१ २३१र २र ३ १२ ३१र २र १ २
अक्रान्त्समुद्रःप्रथमेविधर्मञ्जनयन्प्रजाभुवनस्यगोपाः*।

वसिष्ठऋषिः†। "त्रिपृष्ठं" त्रीणि पृष्ठानि द्रोणकलशादिस्थानानि सवनानि वा यस्य स तथोक्तस्तम्। "वृषणं" वर्षकम्। "वयोधाम्" अन्नस्य दातारम्‡। "आङ्गोषिणं" आघोषन्तं सोमं¶ "वाणीः" स्तोत्ररूपा वाचः "अवावशन्त" कामयन्ते शब्दायन्ते वा। "वना" वनानि उदकानि "वसानः" आच्छादयन् "वरुणो न" वरुण इव§ "सिन्धुः" अपां स्यन्दयिता पर्यन्तप्रदेशानाच्छादयति तद्वत्। "रत्नधाः" रत्नानां दाता सोमः "वार्याणि" धनानि|| "दयते" स्तोतृभ्यः प्रयच्छति ॥ ६ ॥ ६२

मादित्यरश्मीनां, सूर्यस्य स्वीकरणकर्मणामादित्यरश्मीनां, विष्णोर्व्याप्तिकर्मणा मादित्यरश्मीनामित्यधिदैवतम्। अथाध्यात्मं सोम आत्माप्येतस्मादेवेन्द्रियाणां जनितेत्यर्थः। अपिवा सर्वाभिर्विभूतिभिर्विभूततम आत्मेत्यात्मगतिमाचष्टे"—इति प० २, १२।

* "भुवनस्यराजा"—इति ऋ०।

† "मैत्रावरुणः"—इति ऋषि-जै०।

‡ "सुतः", "सुतं", "वयः"-इति त्रीण्यपि पदानि पाठभेदात् सप्तमनैघण्टुककाण्डे न पठ्यन्ते (२, ७)। 'वयोधा मन्नानां धातारं यशस्विनं वा'—इति वि०।

¶ "आङ्गूषस्तोमआघोषः "एनाङ्गूषेण वयमिन्द्रवन्तः" अनेन स्तोमेन वयमिन्द्रवन्तः"—इत्यादि नि० ५, ११।

§ "वरुणः वृणोतीति सतः"—इत्यादि नि० १०, ३—४।

|| 'वार्याणि वननीयानि धनानि'—इति वि०।

१ २ ३ १ ३ २ ३ २ ३ १ ३ २ १र २र ३ १र
वृषापवित्रेअधिसानोअव्येबृहत्सोमोवावृधेस्वानो*-
१र
अद्रिः ॥ ७ ॥६३†

२ १ १ २र १ २ १र २ १
(सन्यावैयश्वम् ॥) हो । होपि । अक्रांत्समुद्रःप्रथमेविधामान् ।
१ २ १ २ १ २ र १ १ १ र
होहोयि । जनयन्प्रजाभुवनस्यगोपाः । हो । होयि वृ
२र १ २र १ २ १र २ऽ १ २ १
षापवित्रे अधिसाने ।२अ । व्यायि । हो । हो । वृह
र र ७ र र र १र र १ र र २
त्सोमेरवावृधेस्वाने ।अ । द्रा । औ३ । होवाहाउवा
२ २र १र १ १ १ १
३ । ए३ । स्वानाअ । द्रीर३४५ः ॥ ११ ॥ ६३

पराशरऋषिः‡ । "समुद्रः" अस्मादापः सन्द्रवन्ति स समुद्रः अपां वर्षकः । "गोपाः" यज्ञस्य रक्षकः सोमः "प्रथमे" विस्तृते "भुवनस्य" उदकस्य¶ "विधर्म्मन्" विधारकेऽन्तरिक्षे "प्रजाः" "जनयन्" उत्पादयन् "अक्रान्" सर्व्वमतिक्रामति [क्रमते-र्लुङि, तिपि, इडभावे हलो न ज्ञातायां सिज्लोपे मकारस्य

---

* "सुवान"—इति ऋ० ।

† उ० ५, २, १, १=ऋ० ७, ४, १८, प= ऊहे १७, २, १ ;—१९, २, ५—८—९; ऊह्ये९, २, ५ ।

‡ "पाराशरः"—इति ऋषि-मै० ।

¶ "भुवनम्"-इति उदकनामसु पञ्चाशत्तमं नैघण्टुकम् (१,१२) ।

अथाष्टमी ।

१०२ ३ २ ३ १ २ ३ १ २ ३ २ ३ १ २ ३ १ २ ३ १
कनिक्रन्ति हरिरा सृज्यमानः सीदन्वनस्य जठरे पुनानः ।
३ २ ३ १ २ ३ २ ३ १र २र ३ १ २ ३ १ २
नृभिर्यतः कृणुते निर्णिजं गामतो मतिं जनयत स्वधाभिः ॥८॥६४ *

मोनोधातोरिति नकारे रूपम्] "वृषा" कामानां वर्षिता "स्वानः" अभिषूयमाणः† ॥

"अद्रिः"-"इन्दुः" इति च साम्नृचः पाठौ ॥ ७ ॥ ६३

---

* ऋ० ७, ४, ५, १।

† अथेदं विवरणम्—

अक्रान् समुद्रः विनियोगोऽस्य नवमेऽहनि। क्रान्तवान् प्रथमे परमे उत्कृष्टे विधर्मणि धारणेन जनयन् प्रजाः प्रजायन्त इति प्रजाः देवाः याः भुवनस्य गोपाः भूतानां रक्षिता वृषा सखा पवित्रे वा समाय। अधि उपरि सानो सुमुत्स्यन्तो अव्ये अविमये। बृहत्सोम वावृधे वर्द्धते स्वानः अद्रिः अद्रयः। यद्वा अक्रान् समुद्रः सामर्थ्यात् अत्यक्रमीत् अतीतं भवत्युदयादस्त यद्वा समुद्रः। आदित्यः प्रथमे प्रकृष्टे व्योमन् सामर्थ्यादन्तरिक्षे प्रजा जनयन् वर्षकर्मणा। भुवनस्य त्रैलोक्यस्य गोपा रक्षिता वृषा वर्षणशीलः। पवित्रे व्याप्तिमये अधिसानः अभिषिच्यमाणः सोम्यैः। वावृधे वर्द्धते बृहदिति बृहद्विशेषणम्। स्वानः पुनः अद्रिरादित्य अद्रयः अत्यक्रामत् अधिष्ठितवान्। समुद्रः आत्मा अभिद्रवत तं भूतानि परमेभ्यः यत् भूतेन्द्रियमितिशरीरे जनयन् ज्ञानकर्मणा योऽप्युत्पादयन् प्रजा वर्द्धयन्। भुवनस्य गोप्ता प्रकाशकरूपत्वात्। वृषा पवित्रे सत्यमये आत्मा वर्षिता भवति शरीररूपेण पवित्रे ज्ञानमये अवतिर्गत्यर्थः। मत्यर्थाश्च वृद्ध्यर्थाः। अधिसानो सम्बध्यमान-शब्दादिषु महत्त्वमेव सुष्ठु वर्षितं पवित्रे। प्रवः अद्रिः अद्रयः"—इति ॥

यास्कस्त्वेवं व्याख्यातवान्—"अत्यक्रमीत् समुद्र आदित्यः परमे व्यवने वर्षकर्मणा जनयन् प्रजा भुवनस्य राजा सर्वस्य राजा। वृषा पवित्रे अधिसानो अव्ये बृहत्सोमो वावृधे सुवान इन्दुरित्यधिदैवतम्। अथाध्यात्ममत्यक्रमीत् समुद्र आत्मा परमे व्यवने ज्ञानकर्मणा जनयन् प्रजा भुवनस्य राजा सर्वस्य राजा। वृषा पवित्रे अधि सानो अव्ये बृहत्सोमो वावृधे सुवान इन्दुरित्यात्मगतिमाचष्टे"—इति प० २,१६।

४ ५ १ १ र १
(सामसामनि द्वे॥) कानी। क्रान्तो२क्रान्तो२। हरिरासृज्य-
२ ४ ५ १ र१ १
मा२३ना२ः। सायिदान्। वाना२वाना२। स्यजठरेपुना२३-
२ ४ ५ १ १ र १ र
ना३ः। द्रभीः। याता२याता२ः। कृणुतेनिरिर्णिजा२३-
२ ४ ५ १ १ १ १ ६
गा३म्। याताः। माती२म्माती२म्। जनयता२३स्वा२ध्या
५र र ३ १ १ १ १
२३४ओहावा। भो२३४५ः ॥ १२ ॥

३ ४ ५ र २ २ २र ९ २ ३ ५
कनिक्रन्तिहा। होयि। हरिरासृज्य। मा२३४ना।
२र १ र र१ १ १ २र १
हाहोयि। सीदन्वनस्यजठरेपुना२३नाः। हाहोयि। नृभि
र २ १ २ र १ र
र्यतःकृण्वतेनिर्णिजा२३ङ्गाम्। हाहोयि। अतोमतायिम्
७ — १ ३ ५र र ३ १ १ १ १
जनयता२३। स्वा२धा२३४औहोवा। भो२३४५ः ॥१३॥६४

प्रस्कण्व ऋषिः*। “सृज्यमानः” आ समन्ताद्विसृज्यमानोऽभिषूयमाणः† “हरिः” हरितवर्णः सोमः “कनिक्रन्ति” पुनः पुनः शब्दायते [क्रन्दतेर्यङ्लुकि, तिपि, इडभावे, “दाधर्त्तिदर्धर्त्तीत्यादिना‡ निपातनादभ्यासस्य निगागमः। अभ्यस्तस्वरः¶]

---

* “काण्वः”-इति ऋषि-कै०।

† ‘सृज्यमानः संसृज्यमानः’-इति वि०।

‡ “दाधर्त्ति दर्धर्त्ति दर्द्धर्षि बोभूतु तेतिक्तेऽलर्ष्यापनीफणत् संसनिष्यदत् करिक्रत् कनिक्रदद् भरिभ्रद् दविध्वतो दविद्युतत् तरित्रतः सरीसृपतं वरीवृजन्मर्मृज्यागनीगन्तीति च” —इति पा० ७, ४, ६५।

¶ “अभ्यस्तानामादिः”-इति पा० ६, १, १८९।

अथ नवमी।

३ २उ ३ १ २ ३ २ ३ २ ३ २ ३ १ २ ३ १ २
एषस्यतेमधुमाꣳइन्द्रसोमोवृषावृष्णःपरिपवित्रेअक्षाः।
३ १ २ ३ १ २ ३ १ २ ३ २ ३ उ ३क २र
सहस्रदाःशतदाभूरिदावाशश्वत्तमम्बर्हिरावाज्यस्थात्॥८॥६५*

४ ५ ४ ५ ३ २ र ४ ५र र ४र ५
(ऐषम्॥) एषाएषाः। स्यता३१२३४यि। मधुमाꣳइन्द्रसोमः।
र ३ २ ५ ४ ५र र
वृषावृषाइए। वृष्णो३१२३४ः। परिवित्रेअक्षाः। सहस्रदा
५ ३ २ ५ ४र ५ ४र ५र ५
इए। स्रदा३१२३४ः। शतदाभूरिदावा। शश्वच्छश्वाइदा
२ २ र ५र ४ ५ ५ ५
तमा३१२३४म्। बर्हिरावाजिपे। हियाइहाउवा स्था२
१ १ १ १
२३४५म्॥ १४॥ ६५

तथा "पुनानः" पूयमानः "वनस्य" वननीयस्य चास्य द्रोण-कलशस्य "जठरे" "सीदन्" उपविशन् शब्दायते। किञ्च "नृभिः" कर्मनेतृभिर्ऋत्विग्भिः "यतः" संयतः सोमः "गाः" गो-विकारान् क्षीरादीन् आच्छादयन् "निर्णिजं" शुद्धम् आत्मनो रूपं† "कृणुते" ग्रहादिषु करोति। अतोऽस्मै सोमाय "मतिं" मननीयां स्तुतिं "स्वधाभिः" हविर्भिः सह "जनयत" स्तोतारोऽजनयन् [झस्यान्तादेशाभावः छान्दसः। अडादेशः] यद्वा हे स्तोतारः अस्मै सोमाय स्तुतिं जनयत उत्पादयत कुरुतेति यावत् ॥ ८ ॥ ६५

---

* ऋ० ७, ३, २२, ४।

† "निर्णिक"-इति रूपनामसु प्रथमं नैघण्टुकम (३. ७)।

* अथ दशमी।

१ २ ३ १ २ ३ २ ३ १र २र ३ २ ३ २ ३ १ २
पवस्वसोममधुमाꣳऋतावापोवसानोअधिसानोअव्ये।
३ १ २ ३ १ २ ३ १ १ ३ १ १ ३
अवद्रोणानिघृतवन्ति*रोहमदिन्तमोमत्सरइन्द्र-
१ २
पानः॥ १० ॥ ६६†

॥ इति चतुर्थ-दशति ॥ ४ ॥

उशनाऋषिः‡। हे इन्द्र! "वृष्णः" वर्षकस्य "ते" तुभ्यं [चतुर्थ्यर्थे षष्ठी¶] "एषः" "स्यः§" स सोमः "मधुमान्" माधुर्योपेतः "वृषा" वर्षकः "पवित्रे" "पर्यक्षाः" पर्यस्रवत् [क्षरतेर्लुङि रूपम्] स एव "सहस्रदाः" सहस्रसङ्ख्याकस्य धनस्य दाता "शतदाः" शतसङ्ख्याकस्य दाता "भूरिदावा"‖ ततोऽपि भूरेर्दाता 'वाजी' बलवान् सोमः "शश्वत्तमम्" अतिशयेन पुराणं "बर्हिः" यज्ञम् "आस्थात्" अधितिष्ठति॥

"वृषा वृष्णः"-"वृषा वृष्ण"—इति, "सहस्रसाः"-"शतसाः" इति च साम्नऋचः पाठाः॥ ८॥६५

---

* "घृतवान्ति"—इति ऋ०।

† ऋ० ७, ४, ८, ३।

‡ "काव्यः"—इति ऋषि-नै०।

¶ "षष्ठ्यर्थे चतुर्थीति वाच्यम् (२, ३, ६२)"—इति कात्यायनवचनादित्यर्थः।

§ "स्यश्छन्दसि बहुलम् (पा० ६, १, १३३)"--इतीह शब्दे स्य इत्यस्य सोर्लोपः।

‖ "आतोमनिन्क्वनिब्वनिपश्च (पा० ३, २, ७४)"—इति वनिपि रूपम्।

२ र ५ १ २
(माधुच्छन्दसम् ॥) हाओ२३४वाइ । इहा३१ ।
२ १ २ १ २ २ ४ ५ १ १र
पवस्वसो । मा३मध । माꣳऋतावा । अपोवसा ।
२ १ २ ३र ४ ५ २ १ र २ १
नो३अधि । सानोअव्याइ । अवद्रोणा । नीइघृत ।
२ ३ ४ २ २ ३ ५ ३ २ २ १
वन्तिरोहा । हाओ२३४वाइ । इहा३१ । मदिन्तमो ।
२ १ २ २ ४
मत्सरः । आ३४३इ । द्रा३पा५नाई५ई: ॥ १५ ॥ ६६

प्रतर्दनऋषिः[*] । हे "सोम !" "मधुमान्" [मत्वर्थीयः] तादृशस्त्वं "अपः" वसतीवरीः एकधनाः "वसानः" आच्छादयन् "अधि" अधिकं "सानौ" समुच्छ्रिते "अव्ये" अविभवे-पवित्रे "पवस्व" क्षर । ततः "मदिन्तमः" अतिशयेन मदकरः "इन्द्रपानः" इन्द्रेण पातव्यः, "मत्सरः" मादयिता सोमः "घृतवन्ति" उदकवतः[†] "द्रोणानि" द्रोणकलशान् "अवरोह" प्रादुर्भवसि ॥

"रोह"-"सीद"—इति पाठौ ॥ १० ॥ ६६

इति श्रीमत्सायणाचार्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दोव्याख्याने पञ्चमस्याध्यायस्य षष्ठः खण्डः ॥ ६ ॥

---

[*] "दैवोदासिः"—इति ऋषि-भेदः ।

[†] "घृतम्"—इत्युदकनामसु दशमं नैघण्टुकम् (१, २) ।

अथ सप्तमे खण्डे--

सैषा प्रथमा ।

१ २ ३ २र २ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
प्रसेनानीःशूरोअग्रेरथानाङ्गव्यन्नेतिहर्षतेअस्यसेना ।
३ २ ३ १ २ ३ १र २र ३ २उ ३ १ २ ३ १ २
भद्रान्कृण्वन्निन्द्रहवान्त्सखिभ्यआसोमोवस्त्रारभसानि-

दत्ते ॥ १ ॥ ६७*

३ ५ ३ ५
(कुत्सस्याधिरथीयानि त्रीणि ॥) हो४वा । उहुवा
४ ५ २ १र २र १ र र २ २ ३ ४
३ । होवा । प्रसेनानाइः । शूरोआ३ । ग्राइरथा
५ २ १ २र १ २ २ ३ ४ ५ २ १र
नाम् । गव्यन्नेताइ । हर्षन्ता३इ । अस्यसेना । भद्रा
१ १ २ २ ३ ४ ५ २र १र २र १
न्कृण्वान् । इन्द्रहा३ । वान्त्सखिभ्याः । आसोमोवा ।
२ १ २र २ ४ ५ ३ ५ ३ २ ४
स्त्राइरभ । सानिदत्ताइ । हो४वा । उहुवा३ । हो
५ ५
वा६ । हाउवा ॥ १६ ॥
५र ४ २ १११ २ १र २र १ र र २ २
औहोइवा३४५ । प्रसेनानाइः । शूरोआ३ । ग्रोइ
३४ ५ २ १ २र १ २ २ ३ ४ ५
रथानाम् । गव्यन्नेताइ । हर्षन्ता३इ । अस्यसेना ।
२ १र २ १ २ २ ३ ४ ५ र ४
भद्रान्कृण्वा३न् । इन्द्रहा३ । वान्त्सखिभ्याः । औहोइ

---

* ऋ० ७, ४, ६, १ ।

२ १११   २र १र २र १   २ १   २   २
वा३४५। आसोमोवा। स्वा३रभ। सा३४३। णी३

४
दा५त्ता३ई५ड् ॥ १७ ॥

५र४ २ १११   ३ र२र १   र र २   २
औहोइवा३४५। प्रसेनानाइः। शूरोआ३। ग्राइ

३४५   ३ २र१   २   २३४५
रथानाम्। गव्यन्नेताइ। हर्षता३इ। अस्यसेना।

३र २१   २   २ ३४५   र४२
भद्रान्कृण्वान्। इन्द्रहा३। वा३त्सखिभ्याः। औहोइवा

१११   २र र २र १   २ १   २   २ ४
३४५। आसोमोवा। स्वा३रभ। सा३४३। नी३दा५।

२ १११
ता२३४५इ ॥ १८ ॥ ६७

प्रतर्दनऋषिः*। "सेनानीः" सेनाना मग्रे नेता। "शूरः" शत्रूणां बाधकः "सोमः" "गव्यन्"† इच्छन् यजमानानां पश्वादिकं गच्छन् "रथानाम्" "अग्रे" पुरतः "प्रेति" प्रकर्षेण सङ्ग्राममृच्छति। "अस्य" सोमस्य "सेना" च "हर्षते" हृष्यति [वाक्यभेदादनिघातः] किञ्च "सखिभ्यः" समानख्यानेभ्यो यजमानेभ्यः "इन्द्रहवान्" तैः कृतानि इन्द्रस्य आह्वानानि "भद्रान्" कल्याणानि यथार्थानि "कृण्वन्"। आहूतो हीन्द्रः सोमं पीत्वा

---

* "दैवोदासिः"—इति वि-मै०।

† "छन्दसि परेच्छाया मपि क्यज् वक्तव्यः"—इति तृतीयाध्यायीय-कात्यायन-वचनादिह क्यचि रूपम्।

अथ द्वितीया।

२ ३ २ ३ १ २ २ २ ३ २ ३ २ २ १र २र
प्रतेधारामधुमतीरसृग्रन्वारंयत्पूतोअत्येष्यव्यम्।
१ २ ३ १ २ ३ १ २ १ २ ३ २ ३ १ २ २ २
पवमानपवसेधामगोनाञ्जनयन्त्सूर्यमपिन्वोअर्कैः ॥२॥६८*

२र र २
(वैयश्वज्योतिषाणि त्रीणि ॥) हाउहोवा३हाइ।
२र र र १ ७ १ १ १ १ २र र २
प्रतेधारामधुमा३ताइरसृग्रा२३४५न्। हाउहोवा३हाइ।
र र र १ ७ १ १ १ १ २र र
वारंयत्पूतोअतौ३याइषिआव्या२३४५म्। हाउहोवा३
२ र ५र १ ७ १ १ १ १ २र र
हाइ। प्रवमानपवसे३धामगोना२३४५म्। हाउहोवा

कामान् प्रयच्छतीति। "रभसानि" इन्द्रस्य वेगेनागमननिमित्तानि "वस्त्रा" वस्त्राण्याच्छादकानि पयःप्रभृतीन्याश्रयणानि "आ दत्ते" आ गृह्णाति † ॥ १ ॥ ६७

---

* ऋ० ७, ४, १७, १।

† अत्र विवरणं यथा—"प्रसेनानी। सेनां नयति इति सेनानीः। शूरः विक्रान्तः। अग्रे रथानां ये देवरथाः गव्यम् इच्छन्। धनं पृथिव्यां भवं प्रैति प्रयाति। हर्षति अस्य सेना भद्रान् भन्दनीयानि। कुर्वन्। सृजन्। इन्द्रहवान् इन्द्रियाणि। सखिभ्यः ऋत्विग्भ्यः। एवं गुणविशिष्टः। सोमः वस्त्राणि रभसानि पतन्ति। आदत्ते परसैन्येभ्यः। अथवा सेनानीः स्कन्दः शूरः विक्रान्तः। अग्रे पुरतः देवरथानां गव्यम्। पृथिव्यां भवमन्नम्। राति गृह्णाति ददाति सैन्येभ्यः सोम इव रश्मीन् वस्त्राणि सैन्येभ्यो ददाति॥"—इति॥

अथ तृतीया ।

१ २ २क २र २ १र २र ३ १र २र
प्रगायताभ्यर्चामदेवान्त्सोमꣳहिनोतमहतेधनाय।
३ १ २ ३ २ २ २ ३ २ ३ १ २ ३ १ २ ३ १ २र
स्वादुःपवतामतिवारमव्यमासीदतुकलशन्देवइन्दुः॥२॥६९*
२ र १ ३र १ १ १ १ २र
इहाइ । जनयंत्सूर्यमा३पांइनंवोअर्का२३४५इः । हाउ
र २ १ १ १ १
होवा३हाउ । वा३४५ ॥ १९ ॥ ६८

पराशरऋषिः† । तदा प्रसृज्यन्ते "यद्" यदा "पूतः" वसतीवरीभिस्त्व "अव्यम्" अविभवं "वारं" वालं पवित्रम् "अत्येषि" अतीत्य गच्छसि । किञ्च हे "पवमान" शोध्यमान सोम! "गोनां‡" गवां¶ "धाम" धीयते पीयत इति धाम पयः तत् वसनीकृत्य "पवसे" क्षरसि । ततः "जनयन्" जायमानस्त्वं "अर्कः" अर्चनीयैः स्व-तेजोभिः "सूर्यम्" आदित्यम् "अपिन्वः" पूरयसि ॥

"वारं यत्पूतोअत्येष्यव्यम्"-"वारान्यत्पूतो अत्येष्यव्यान्"—इति, "जनयन्"-"जज्ञानः"—इति च साम्नऋचः पाठौ ॥ २ ॥ ६८

---

* ऋ० ७, ४, ११, ४ ।

† "शाक्त्यः"—इति ऋषि-नै० ।

‡ "गोः पादान्ते (७, १, ५७)"—इति सिद्धं गोनामिति ।

¶ 'गवां रश्मीनां मरुतां वा'—इति वि० ।

२ १र   २ १   २ ३ ४ ५   २र १
प्रगायता। अभियं। चामदेवान्। सोमꣳ-
२ १   २ ३ ४ ५   १र १   २
हिनो। ता३मह। तेधनाया। स्वादुःपवा। ता३
१   २ ३ ४ ५   २र १र   २ १   २
मति। वारमव्याम्। आसीदतु। कलशम्। दा-
२ ४
३४३इ। वा३आ५इन्दूई५ई:॥ २०॥ ६९

इन्द्रप्रमतिर्वासिष्ठऋषिः। हे स्तोतारः! "प्रगायत" 'सोमं' प्रकर्षेणाभिष्टुत। वयन्तु "देवान्" "अभ्यर्चामः" अभिष्टुमः*। यद्वा। देवानभ्यर्चामोऽभ्यर्चत [पुरुष-व्यत्ययः]। किञ्च। "महते" महत् प्रभूतं धनाय धनं प्राप्तुं सोमं "हिनोत"† अभिषवार्थं प्रेरयत [क्रियार्थोपपदस्य च कर्मणि स्थानिनः (२,३,१४,)-इति धन-शब्दस्य चतुर्थी] ततः "स्वादुः" मधुरः सोमः "अव्यम्" अविमयं "वारं" वालं पवित्रम् "अतिपवताम्" अतीत्य क्षरतु। "देवः" द्योतमानः। सोमः "इन्दुः" दीप्तः सन् "कलशं" द्रोणम् "अभि आसीदतु" आभिमुख्येन तिष्ठतु॥

"पवतां"-"पवाते"—इति, "देवइन्दुः"-"देवयुर्न"—इति साम्नऋचः पाठौ॥ ३॥ ६९.

---

* 'स्तोत्रग्नैश्च'—इति वि०।

† "तप्तनप्तनथनाश्च (७, १. ४५ पा०)"—इति तपि सिद्ध हिनोतेति।

अथ चतुर्थी ।

१० २ ३ १ २ ३ १र २र ३ २ ३ १र २र ३ १ २
प्रहिन्वानोजनितारोदस्योरथोनवाजꣳसनिषन्नयासीत् ।
३ १ ३ १ २० ३ १ २ ३ २ ३ २ ३ १ २ ३ १
इन्द्रङ्गच्छन्नायुधासꣳशिशानोविश्वावसुर्हस्तयोराद-
धानः ॥ ४ ॥७०*

२र र २ र र र १ ३र ५र
हाउहोवा३हाइ । प्रहिन्वानोजनितारो३४३दसीयोः ।
२र र २ र र २ ३र ५र
हाउहोवा३हाइ । रथोनवाजꣳसनिषा३४३न्यासीत् ।
२र र २ र र २ ३र ५
हाउहोवा३हाइ । इन्द्रङ्गच्छन्नायुधासा३४३ꣳशिशानः ।
२र र २ र र २ ३र ५ ४
हाउहोवा३हाइ । विश्वावसुर्हस्तयोरा३४३दधानः । इडा
पुनाउ । वा ॥ २१ ॥ ७०

वसिष्ठऋषिः† । "प्रहिन्वानः" अध्वर्युभिः प्रेर्यमाणः‡ "जनिता"¶ उत्पादयिता "रोदस्योः" द्यावापृथिव्योः§ तयोर्जनयितृत्वं वृष्टिप्रदान-हविः-प्रापणाभ्याम् । तादृक् सोमो "वाजम्" अन्नं "सनिष्यन्" दास्यन्|| "प्रायासीत्" प्रगच्छति ।

---

* ऋ० ७, ३, २९, १ । † "मित्रावरुणः"—इति ऋषि-मे० ।

‡ 'प्रीणानः गच्छन् वा'—इति वि० ।

¶ "जनिता मन्त्रे (६,४,५३)"—इति पा० ।

§ "रोदसी"—इति द्यावापृथिवी-नामसु चतुर्थं नैघण्टुकम् (३, ३०) ।

|| 'सनिष्यन् सम्भजमानः'—इति वि० ।

अथ पञ्चमी।

६ २ ३ १ २ ३ १ २ ३ १र २र ३ १ २ ३ १र २र
तक्षद्यदीमनसोवेनतोवाग्ज्येष्ठस्यधर्मन्द्युक्षोरनीके।
१ २ ३ १ ३ १ २ ३ २उ ३ १ २ ३ १ २ २ ३ १ २
आदीमायन्वरमावावशानाजुष्टम्पतिङ्कलशेगावइन्दुम्॥५७

२ ४ ५र २ १ १ १ १ २ ४
(वाचःसामनी द्वे)॥ तक्षद्यदी। हो२३४५इ। मन-
३ १र ४ ५ २ १ १ १ १ ३र ४ ५ ३ १ १ १ १
सोवेनतः। वा२३४५क्। ज्येष्ठस्यधा। हो२३४५।
४ २र ४ ५र ३ १ १ १ १ ३र ४र ५र २ १ १ १ १
मन्द्युक्षोरनी। का२३४५इ। आदीमायन्। हो२३४५इ।
२ ४ ३र ४र ५ र ३ १ १ १ १ ३ ४ ५ ३ १ १ १ १
वरमावावशा। ना२३४५ः। जुष्टम्पतिम्। हो२३३५इ।
४ र
कलशेगा५वः। इ। डाउ। वा॥ २२॥
२ १ २ २ ४ ३र ३र ४ ५ २ १ १ १ १
तक्षद्यदा३१२३४इ। मनसोवेनतः। वा२३४५क्।
२र १ २ ३र ४ ५र २ १ १ १ १ २र १
ज्येष्ठस्यधा३१२३४। मन्द्युक्षोरनी। का२३४५इ। आदा-

"इन्द्रङ्गच्छन्" प्राप्नुवन् "आयुधा" "आयुधानि" "संशिशानः" सम्यक् तीक्ष्णीकुर्व्वन् इन्द्रं सहायगमनार्थं तीक्ष्णायुधः सन् "विश्वा"† सर्व्वाणि "वसु"‡ वसूनि धनानि "हस्तयोरादधानः" अस्मभ्यन्दानाय एवं कुर्व्वन् प्रायासीत्॥ ४॥ ७०

---

* ऋ० ७, ४, १५, ९।

†,‡ 'विश्वा'—इति सुप आत्वं, 'वसु'—इति सुपो लुकि च रूपम् (७, १, ३९)।

२ १ ४ २र ४र ५ र २ १ १ १ १ २ १
इमाया३१२३४न्। वरमावावशा। ना२३४५ः। जुष्ट-
२
म्पता३१२३४इम्। कलशेगा५वः। इ। डाउ। वा।
॥ २३ ॥ ७१

मृडीको वासिष्ठऋषिः। "वेनतः" [वेनो वेनतेः कान्ति-कर्म्मणः (६,४,३८)"—इति यास्कः] कामयमानस्य "मनसः" [मनो मन्यतेः स्तुतिकर्म्मणः*] स्तोतुः "वाक्" स्तुतिलक्षणा† यद्येनं "तक्षत्" संस्करोति‡। "धर्म्मन्" धारके¶ यज्ञे "ज्येष्ठस्य" प्रशस्यस्य "द्युक्षोः" दीप्त-स्तुतिकस्य [टुक्षु शब्दे (अ०प०) इत्यस्मात् कु-प्रत्ययः] सवनस्य "अनीके" प्रमुखे यदा यज्ञेषु सवन-मुखे स्तोतुर्वाक् सोमं स्तौतीत्यर्थः। "आ" अनन्तरमेव "वरं" वरणीयं "जुष्टं" देवानां मदाय पर्याप्तं "पतिं" सर्वस्य पालकं "कलशे" स्थितं "इन्दुम्" "ईम्" एनं सोमं "वावशानाः" कामयमानाः "गावः" "आयन्" पयसा स्वीयेन मिश्रयितुमागच्छन्ति॥

"धर्म्मन्"-"धर्म्मणि"—इति पाठौ॥ ५॥ ७१

---

* "मन्यते"—इति स्तुति-कर्मसु चतुर्विंशतमं पठितम् (३, १४)।

† 'वाक् सखिलम्'—इति वि०।

‡ 'सक्षत करोति'--इत्येव वि०।

¶ धारणार्थ--धृ-धातोः कर्त्तरि मनिपि धर्म्मन्निति ततश्छान्दस-लुकि रूपम्।

अथ षष्ठी ।

३ १ २ ३ १र ३ २३ १ २ ३ २ ३ १ २
साकमुक्षोमर्जयन्तस्वसारोदशधीरस्यधीतयोधनुत्रीः ।
३ १ २ ३ १र १र ३ १ २ ३ २ ३ २ ३ २
हरिःपर्यद्रवज्जाःसूर्यस्यद्रोणंननक्षेअत्योनवाजी ॥ ६॥७२*

४ ५ १ र २ १
(दाशस्पत्ये द्वे ॥) साकाम् । उक्षोमर्जयन्त । स्वसा
२ १ १र र २ १ २ १
२३राः । दाशा२ । धीरस्यधीतयोधनू२३त्रीः । हारी
१ र ७ २ १ १
२ः । पर्यद्रवज्जाःहरिया२३स्या । द्रोणा२म् । ननक्षेअत्योनवा२३ । हाउवा३ ।
र र २ १ १ १ १
जी२३४५ ॥ २४ ॥

५र ५ २ ५ ४ ५र
साकमुक्षा६ए । ए३१२३४ । मर्ज्जयन्तस्वसारः ।
र ५ २ ५र ४ ५र ४ ५ ४ ५
दशधीरा६ए । ए३१२३४ । स्यधीतयोधनुत्रीः । हरिः
५ २ ५ ४र र५ र ५
पर्या६ए । ए३१२३४ । द्रवज्जाःसूर्यस्य । द्रोणन्नना६ए ।
२ र ५र ४ ५ ५ ३ १ १ १ १
ए३१२३४ । नक्षेअत्योनवा६ । हाउवा । जी२३४५ ॥२५॥ ७२

---

* उ० ६,२,१४,१ = ऋ० ७,४,३,१ = ऊहे ८,१,७ – १२,१,९ – १८,२,४ ।

अथ सप्तमी।

३ १ २ ३ १२ ३२ ३ १ २ ३ २ ३ २ ३१र २र
अधियदस्मिन्वाजिनीवशुभस्पर्द्धन्तेधियःसूरेनविशः।
३ १ २ ३ १ २ ३ १ २ ३ १र २र ३ १ २ ३ १ २
अपोवृणानःपवतेकवीयान्व्रजन्नपशुवर्द्धनायमन्म ॥ ७ ॥७३[*]

नौधा ऋषिः[†]। "साकमुचः" [उच सेचने (भ्वा०प०) क्विपि रूपम्] तादृश्यः "स्वसारः" कर्म्म-करणार्थं मितस्ततः सुष्ठु गच्छन्त्यः[‡] अङ्गुलयः[¶] "मर्जयन्त" सोमं शोधयन्ति [मृज शौचालङ्कारयोः (चु०उभ०] ताः दशसङ्ख्याकाः "धीतयः" [अङ्गुलिनामैतत् (नै०२,५,७] अङ्गुलयः "धीरस्य" समर्थस्य प्राज्ञस्य वा देवैर्ध्यातव्यस्य काम्यमानस्य वा सोमस्य "धनुत्रीः" प्रेरयित्र्यो भवन्ति[§]। ततः "हरिः" हरितवर्णः सोमः "सूर्य्यस्य" "जाः" प्रादुर्भूता जाया दिशस्ताः[‖] "पर्य्यद्रवत्" परितो गच्छति। सूर्य्यस्य तेजसा हि आविर्भवतीति दिशां तस्य जायात्वम्। "अत्यः" अतनशीलः "वाजी न" अश्व इव स्थितः सोमः "द्रोणं" कलशं "ननक्षे" व्याप्नोति [नक्षति-व्याप्ति-कर्मा (नै०२,१८,२) ॥ ६ ॥ ७२

---

[*] ऋ०७,४,४,१।

[†] "गौतमः"—इति ऋषि मै०।

[‡] स्वृ शब्दोपतापयोः (भ्वा० प०)—इत्यस्य रूप स्वसेत्यभिप्रायः।

[¶] "स्वसारः"—इत्यङ्गुलिनामसु त्रयोदशतमं नैघण्टुकम्।

[§] "वावन्ति"—इति वि०।

[‖] "अपत्यम्"—इति वि०। "जाः"—इत्यपत्यनामसु नवमं नैघण्टुकम् २,२।

४ ५ ४ ३ ऽर २
(कश्यपस्य च शोभनम् ॥) अधियदा। स्माइन्वा२जि
ऽर १ २ र १ र २ ३ ४ ५
नीरवशु। भ्राः। स्पर्द्धन्तेधियःसू। राइंनविशाः।
२ १र र ७ २ १
अपोवृणानःपवताइ। कवी२३यान्। व्रजन्न। पा।
२ १ २ २ ४
शुवर्द्ध। ना३४३। याइमा५न्माई५६ ॥ २६ ॥ ७३

कण्वऋषिः*। “यद्” यदा “अस्मिन्” सोमे “वाजिनीव शुभ्रः”† अश्वे यथा वस्त्रप्रभृत्यलङ्कारा भवन्ति। यदा वास्मिन् सोमे “सूरे न” सूर्य्ये न यथा सूर्ये “विशः” रश्मयः उदिता भवन्ति तदा “धियः” अङ्गुलयः “अधिस्पर्द्धन्ते” अहं पुरस्ताच्छोधयाम्यहं पुरतः शोधयामीत्यहमिकया उपतिष्ठते। ततोऽयं सोमः “अपः” वसतीवरीः “वृणानः” आच्छादयन् “पवते” पात्रेषु चरति कलशानभिगच्छति। कीदृशः? “कवीयान्” कविरिवाचरन्। यद्वा। कवयः स्तोतारः तानिच्छन्। तत्र दृष्टान्तः—“व्रजं न” “मन्म” मननीयं बोद्धव्यं रक्षितव्यं गवां गोष्ठं पशुवर्द्धनाय गोपालः परिगच्छति यथा तथा देवानां प्रीणनाय पात्राणि पवते ॥

“सूर्ये”-“सूरे”—इति, “कवीयान्”—“कवीयन्”—इति च साम्न ऋचः पाठः ॥ ७ ॥ ७३

---

* “घोरः”—इति ऋषि० ने०।

† शुभ इति शुभ शोभायाम् (भ्वा० आ०)—इत्यस्य रूपम्। विसर्गस्तु न दृश्यते मूले।

अथाष्टमी।

१ २ ३ १ २ ३ १ २ ३ २ ३ २ ३ २ ३ २ ३ १ २ १ २
इन्दुर्वाजीपवतेगोन्योघाइन्द्रेसोमःसहइन्वन्मदाय।
३ २ ३ १ २ ३ १र २र ३
हन्तिरक्षोबाधतेपर्यरातिं
१ २ ३ २ ३ १ २ ३ १ २
व*रिवस्कृ†ण्वन्वृजनस्यराजा ॥ ८ ॥ ७४‡

२ १ १ र ३
(दाशस्पत्यानि चत्वारि ॥) इन्दू३र्वाजी २। पवतेगो-
२ १ ५ १ २
नियोघाः। इन्द्राइसो२३४माः। साहइन्वन्मदाया।
१ ५ १र र ३ १ २
हन्ताइरा२३४क्षाः। बाधतेपर्यरातिम्। वराइवा२३४स्कृ।
२ १ १ ५ २ ३ ५ ४
ण्वन्वृजाना२३स्या। रा३जौवाओ२३४वा। ह्रो५इ।
डा ॥ २७ ॥

४ ५ र ४र ५ र
इन्दुर्वाजीपवतौ। हौहोवाहाइ। गोनियौघौ।
३ ५ १ ५र १२ ५र १ २ १ २
वाओ२३४वा। इन्द्र२सोमा२ःसहइ। न्वान्मदायौ। वा-
३ ५ १ २ १ २र १र२र २ १ ७ २ ३
ओ२३४वा। हन्तिरक्षोबाधते। पार्यरातौ। वाओ-

---

* “अरातीर्व”—इति, † “वरिवःकृ”—इति च क्व०।

‡ उ० ३,२,१०,१ = ऋ० ७,४,१२,५ = अष्टे ३,१,१५—८,२,५।

५ १ २ १ १ १ ५ २
२३४वा। वरिवस्कृण्वन्त् जना३। स्या। रा३जौवा-
५ ४
ओ२३४वा। हो५इ। डा॥ २८॥

५ २र ७ र ४ ५ १र २
इन्दुरौहोवाहाईयावाजाउ। वा३। हाउवा।
२र १ २ २ १ २
पवतेगोनियोघाउ। वा३। हाउवा। इन्द्राइसोमः।
१ २ २ १ ३ ५र र
सहइन्वाउ। वा३। हाउवा३। मा२दा२३४औहोवा।
३ १ १ १ १ २ १ २ २ १ २
या२४५। हन्ताइरक्षो। बाधाताइपाउ। वा३।
२ १ ३ ५र र ३ १ १ १ १ २ ३
हाउवा३। यं२रा२३४औहोवा। नी२३४५म्। वरा-
२ १ २ २ १
इवस्कृ। ण्वन्त् जनाउ। वा३। हाउवा३। स्या२
३ ५र र ३ १ ५ १ १
रा२३४औहोवा। जा२३४५॥ २९॥

५ र र र र ४ ५ ए र
इन्द्रवाजीपवतेगोनियोघाः। इन्द्रे सोमःसहइन्वन्म-
४ ५ ३र र र ४ ५
दाय। हन्तिरक्षोबाधतेपर्यरातीम्। वरिवस्कृण्वन्त् ज-

० र　　३र २　　५र २　　२　　२ १र ३ १ १ १ २
नस्यराजा। राजा३४औहोवा। ए३। स्यराजार३४५
॥ ३०॥.७४

॥ इति ग्रामे गेये पञ्चदशः प्रपाठकः ॥

मन्युर्वासिष्ठ ऋषिः। "इन्दुः" चरणशीलः* "वाजी" बलवान् "गोन्योघाः" गमनशील-नीचीनाग्र-रससङ्घातः† "इन्द्रे" "सहः" बलकरं रसम् "इन्वन्" प्रेरयन्‡ "सोमः" "मदाय" तस्य मदार्थं "पवते" चरति। किञ्च। "रक्षः" रक्षःकुलं "हन्ति" हिनस्ति। किञ्च। "अरातीः" अरातीन्¶ शत्रून् "परिबाधते" परितः संहरति। कीदृशः? "वरिवः" वरणीयं धनं "कृण्वन्" स्तोतॄणां कुर्वन् "वृजनस्य" बलस्य§ "राजा" ईश्वरः|| सोम इति ॥ ८ ॥ ७४

---

* अतएव "इन्दुः"—इति उदकनामसु दृश्यते च (नै०१,१२,८३) "उन्दे रिच्चादेः—(उ,१)"—इत्युन्देरिन्दुरिति।

† गो—गमनशीलः, नी—नीचिनः, (तस्य अग्रे विद्यमानः) ओघः—~~रससङ्घातः~~ "गोनी"-शब्दो गमनशीलार्थेऽपभ्रंश इत्युदाजहार च पस्पशे पतञ्जलिः।

‡ "इन्वति"—इति गतिकर्मसु पञ्चदशाधिकशततमं नैघण्टुकम् २,१४।

¶ भाष्यकारस्त्वेवं ऋग्वेदीयपाठमनुसृत्य व्याचख्यौ, सामवेदीयपाठस्तु "अरातिम्"—इति।

§ "वृजनम्"—इति बलनामसु एकविंशतितमं नैघण्टुकम् २,९।

|| "राजति"—इति ऐश्वर्यकर्मसु चतुर्थं नैघण्टुकम् २,२१।

अथ नवमी ।

१ २ ३ १ २ ३ १र २र ३ १ २ ३ १ २ ३ १ २
अयापवापवस्वैनावसूनिमाꣳस्वत्वइन्दोसरसिप्रधन्व ।
३ २ ३ २ ३ २ ३ २ ३ १
ब्रध्नश्चिद्यस्यवातोनजूति
२ ३ १ २ ३ १ २ ३ १ २
म्पुरुमेधाश्चि*त्तकवेनरन्धात् ॥ ९ ॥ ७५ †

५र ४ ५ ४ ५
(औष्टानि त्रीणि ॥) औहोहाइ । अयोहाइ ।
१ २ र र २ १ २ ५ २ ३ २ ५ २
पवापवस्वैनावसू२३नी । औ३होइ । इहा । ई३या ।
र १ र २ १ २ ५ २ ३ २
माꣳस्वत्वइन्दोसरम्सिप्रधा२३न्वा । औ२होइ । इहा ।
५ २ १ र र २ १ २ ५ २ २ २
ई३या । ब्रध्नश्चिद्यस्यवातोनजू२३तीम् । औ३होइ । इहा ।
५ २ १र र र २ १ २ ५ २
ई३या । पुरुमेधाश्चित्तकवेनरा२३न्धात् । औ३होइ ।
२ २ ५ ३ ५र र २ २र ३ २
इहा । ई२ । या२३४ । औहोना । ए३ । दोदिहो१ ॥

॥ १ ॥

५ ४ ५ ४ ५ १ र र २ १ २ र
अयोहाइ । पवोहाइ । पवस्वैनावसू२३नी । इहो

---

* "पुरुमेधश्चि"—इति क॰ ।

† उ० ४,१,२१,१ = ऋ० ७,४,२१,२ = आर्चे ९,२,२७—८,२,१०—१३,२,८ ।

ऽ २ र १ र २१ २
इया३ । ई३या । माꣳश्चत्वइन्दोसरसिप्रधा२३न्वा । इ
र ऽ २ १ र र २१ २
होइया३ । ई३या । ब्रध्नश्चिद्यस्यवातोनजू२३तीम् ।
र ऽ २ १र र र२१ २
इहोइया३ । ई३या । पुरुमेधाश्चित्तकवेनरा२३न्धात् ।
र १ ३ ५र र २ २र
इहोइया३ । ई२ । या२३४ । औहोवा । ए३ । दी
१ ११११
दया२३४५त् ॥ २ ॥

२ ३ ५ २ १ ५ २ १र
हाओ२३४वा । २ । हा३ओ२३४वा । हाउवा । अया-
२१र२ र१र २र १२ १ १२ १२
पवापवस्वैनावसूनि । इहइ । हिया२ । इहा । इहा ।
र १ २र१ २१२ १२ १ १२
माꣳश्चत्वइन्दोसरसिप्रधन्व । इहइ । हिया२ । इहा ।
१२ १२ १ २ १र२र १ २र१ २ १
इहा । ब्रध्नश्चिद्यस्यवातोनजूतिम् । इहइ । हिया२ ।
१२ १२ २ ३ ५ २ १ ५
इहा । इहा३ । हाओ२३४वा । २ । हा३ओ२३४वा ।
२ १र२र १ २र१ २र १२ १
हाउवा । पुरुमेधाश्चित्तंकवेनरन्धात् । इहइ । हिया
१ २ २३ ११११
२ । इहा । इहा२३४५ ॥ ३ ॥ ७५

कुत्सऋषिः* । हे सोम ! "अया" अनया "पवा" पवमानया धारया सह "एना" एनानि "वसूनि" धनानि "पवस्व" क्षर [पवा—पूञ् पवने (क्र्या० उ०) "अन्येभ्योपि दृश्यन्ते (३,२,१०१)" —इति विन् प्रत्ययः । आर्धधातुकलक्षणो गुणः । "सावेकाचः (६,१,१६८)"—इति तृतीयाया उदात्तत्वम्] । तथा हे "इन्दो"! त्वं "मांश्चत्वे" मन्यमानानां चातके "सरसि" उदके† वसतीवर्य्याख्ये कलशे "प्रधन्व" प्रगच्छ‡ । ततः "यस्य" यं "ब्रध्नश्चित्" सर्वेषां प्रज्ञापकः महद्भूतो वा आदित्यः¶ "वातो न" वात इव "जूतिं" वेगं§ कुर्वन् । किञ्च । "पुरुमेधाश्चित्" बहुविधप्रज्ञ इन्द्रश्च "तकवे" [तकतिर्गतिकर्म्मसु पठितः‖ । अस्मादौणादिक उन् प्रत्ययः यस्येति (२,३,३७) कर्मणि षष्ठी ॥ "न लोकाव्ययेति (२, ३, ६८) षष्ठी-प्रतिषेधश्छान्दसः] सोममभि गच्छतामित्यर्थः ॥

"यस्य"-"यय"—इति, "जूतिं"—"जूनः"-इति,—"नरन्धात्"-"नरन्दात्"—इति च साम्न ऋचः क्रमेण पाठाः ॥ ९ ॥ ७५

---

* "आङ्गिरसः"—इति ऋषि-नै० ।

† "सरः"—इत्युदकनामसु पठितम् नै०१,१२ ।

‡ "धन्वति"—इति गतिकर्मसु चतुःषष्ठितमं पठितम् २,१४ ।

¶ 'ब्रध्नः ब्रह्म, सविता वा महान् वा'—इति वि० ।

§ जवतेर्वेगकर्मण ऊतियूतिजूतीत्यादिना (३,३,९७) निपातनात् जूतिरिति ।

‖ नि० नै० २.१४.६८ ।

अथ दशमी ।

३ १र   २र   ३ १ २ ३ ३ १र   ३र   ३ २
महत्तत्सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवान् ।
१ २ ३ २ ३ १ २   ३ १र
अदधादिन्द्रे पवमान ओजो
२र   ३ २ ३ . २   ३ १ २
जनयत्सूर्ये ज्योतिरिन्दुः ॥ १० ॥ ७६ *

२.   ३ र   १   २
(आत्रम ॥) महत्तत्सोमो महिषश्चाऽ३कारा २ । अपां
र   र   १   र   र   र   १
यद्गर्भोऽवृणीताऽ२दाऽ२वा २न् । अदधादिन्द्रे पवमानाऽ३ओ
र ५र   १   २   २
जा २ः । अजनयत्सूर्येऽ३ज्यो२३ । तिरिन्द्राउवाऽ३ । ए३ ।
१   २   १र २र १र २ १   १ १ १ १
अजनयत्सूर्येज्योतिरि । दूं २३४५ः ॥ ४ ॥ ७६

"पराशरऋषिः*। "महिषः" महान्‡ पूज्यो वा "सोमः" "महत्" प्रभूतं¶ "तत्" कर्म "चकार" अकरोत् । किं तत् ?

---

* छ० ५,२,१,२ = ऋ० ७,४,१९,१ = ऊहे १०,१,१—२३,२,५—२३,३,८—२३, २,९ = ऊह्ये ६, १,५।

† "शाक्तः"—इति ऋषि-नै० ।

‡ अत्राह यास्कः—'महत्तत्सोमो महिषश्चकारापां यद्गर्भोऽवृणीत देवानाधिपत्यं मदधादिन्द्रे पवमान ओजोऽजनयत् सूर्ये ज्योतिरिन्दुरादित्य इन्दु रात्मा'—इति नि०प०२,१७।

¶ 'महत् असम्भाव्यम्'—इति वि० ।

अथैकादशी।

१ २ ३ २ ३ २ ३ २ ३ २ ३ २ ३ १ २ ३ १ २ ३ २
असर्जिवक्कारथ्येयथाजौधियामनोताप्रथमामनीषा।
२ १ २ ३ २ ३ २ ३
दशस्वसारोअधिसानो
१ २ ३ २ ३ २ ३ १ २ ३ १ २
अव्येमृजन्ति*वह्निꣳसदनेष्वच्छ॥ ११ ॥ ७७ †

"अपाङ्गर्भः" उदकानां गर्भभूतः‡ जनयितृत्वाज्जन्यत्वाद्वा। स सोमः "देवान्¶" "अवृणीत"§ समभजतेति "यत्" तत् कृतवानिति। किञ्च। "पवमानः" पूयमानः‖ सोमः "ओजः"+ सोमपानजन्यं बलम् "इन्द्रे"÷ "अदधात्" न्यधात् तथा "इन्दुः" सोमः× "सूर्ये"** "ज्योतिः" तेजः†† अजनयत्‡‡॥ १२ ॥ ७८

---

* "अव्येष्वज्जन्ति"—इति ऋ०।

† ऋ० ९,५,१,१=आरण्ये १;२,२२।

‡ 'अपां यद् गर्भं दर्शनमात्र पञ्चानां भूतानां गर्भः'—इति वि०।

¶ 'इन्द्रियाणि'—इति वि०।

§ 'अवृणीत अधिष्ठितवान्'—इति वि०।

‖ 'पूयमानः विषयप्रमाणेन'—इति वि०।

+ 'ओजः बलं मणिमादि'—इति वि०।

÷ 'इन्द्रे आत्मनि'—इति वि०।

× 'ज्योतिरिन्द्र आदित्यः अध्यात्मम्'—इति वि०।

** 'सूर्ये सर्वमीले'—इति वि०।

†† 'तेजः इन्द्रः'—इति वि०।

‡‡ 'तथाचोक्तः—येन सूर्यस्तपति'—इति वि०।

२ १ २ २ १ १
(वासिष्ठम् ॥) असाव्यौ३ंशो। जिवाका२। रथ्या
२ ५र २ १ १ १ १ २ १ २ २ १
इया३४। था। जा२३४५उ। धियाव्यौ३हो। मनो-
१ २ ५र २ १ १ १ १ २ १ २ २
ता२। प्रथमामा३४। नौ। षा२३४५। दशाव्यौ३हो।
१ १ २ ५ २ १ १ १ १ १ १
स्वसारा२ः। अधिसानो३४। अ। व्या२३४५इ। मृजा
२ २ १ १ २ ५
औ३हो। तिवाक्रौ२म्। सदनाइषू३४। अक्रा२उ।
१ १ १
वा३४५ ॥ ५ ॥ ७७

कश्यपऋषिः*। "वक्वा" शब्दायमानः [वच परिभाषणे (अदा०प०) वनिप्] तादृशः पवमानः सोमः "आजौ" अजन्ति कर्मार्थं ऋत्विज इति आजिर्यज्ञः तस्मिन् "धिया" कर्मणा स्तोत्रेण वा† साकम् "असर्जि" पात्रेषु सृज्यते‡। तत्र दृष्टान्तः। "रथ्ये यथा" रथ्ये रथार्हे [आजौ सङ्ग्रामनामैतत्¶। अजन्ति प्रक्षिपन्त्यायुधान्यत्रेति तस्मिन्] अश्वो यथा सृज्यते तद्वत्। कीदृशः? "मनोता" यस्यां देवानां मनांसि प्रोतानि सा [तथाच ब्राह्मणम्—"तस्यां हि तेषां मनांस्योतानि"—इति] "प्रथमा"

---

* "मारीचः"—इति ऋषि-नै०।

† 'धिया प्रज्ञया कर्मणा-वा'—इति वि०।

‡ 'दृष्टवाम्'—इति वि०।

¶ नि० नै० २,१७,८।

अथ द्वादशी।

३२ ३ १२२ २ ३ १ २ ३ १२३१२ ३ २ ३ १ २
अपामिवेदूर्मयस्तर्तुराणाःप्रमनीषाईरतेसोमसच्छ।
३ २३ १ २३१ ३१२
नमस्यन्तीरुपचयन्तिसञ्चा
२र ३ २ ३ १ २
चविशन्त्युशतीरुशन्तम् ॥ १२ ॥ ७८*

॥ पञ्चमदशति ॥ ॥ अर्द्धः प्रपाठकः ॥

५ ४र ५ ४र५र ४ ५ ४र
(अपाञ्च साम ॥) अपामिवेदूर्मयस्तौ। होवा।
५ ३ २ ३ ३र २ १ २र १ २र
हाइ। तुरांणा२३४ः। हाहोइ। प्रमनी। षाः। ईर-

मुख्या "मनीषा" मनस ईषा मनीषा स्तुतिः तद्वाम्। यद्वा। धिया विदधाति स्तुतीरिति धीः स्तोता तेन स्तुतिः प्रेर्यते॥ किञ्च। "दश स्वसारः" दशसङ्ख्याका अङ्गुलयः† "सदनेषु" यज्ञगृहेषु पात्राण्यभिमुखीकृत्य "वह्निं" वोढारं सोमं "सानौ" समुच्छ्रिते [अधिः सप्तम्यर्थानुवादकः] "अव्ये" अविभवे अविबालेन कृते पवित्रे "अञ्जन्ति" प्रेरयन्ति‡ ॥

"प्रथमा मनीषा"--"प्रथमो मनीषी"—इति, "सदनेषु"--"सदनानि"—इति च साम्न ऋचः पाठः ॥ ११ ॥ ७७

---

* ऋ० ७,४,५,२।

† "स्वसारः"—इति अङ्गुलिनामसु पठितं नैघण्टुकम् २,५०।

‡ "अञ्जन्ति"—इति तु ऋग्वेदीयः पाठः, तमेवाश्रित्य व्याख्यातं सायणेन। ामवेदीयपाठस्तु "सृजन्ति"—इति ; अतएव 'सृजन्ति शोधयन्ति'-इति वि०।

२ ३ ५ २ २र २ १
तेइ। सोमम। च्छा३४। हाहोइ। नमस्यं। ताइः।
२ २ ३५ २ ३र २ १ २
उपचाइ। यन्तिसम। चा३४। हाहोइ। आचवि।
१ २ ३ २ ३ ५ २ ३र २ ५र
शा। तियुश। तीरुश। ता३४म्। हाहा३४। औ
र २ १ १ १ १ १
होवा। वा३हा२३४५ः॥ ६ ॥ ७८

प्रस्कण्वऋषिः*। "अपामिव" यथा उदकानाम् "ऊर्मयः" त्वरन्ते। "इत्"—इति पूरणः। तद्वत् "ततुराणाः" कर्मणि देवान् स्तोतुन्त्वरमाणाः। [तुर त्वरणे जौहोत्यादिकः (आ०)। यङ्लुगन्तस्य शानचि रूपम्। अभ्यासस्य उवर्णस्य रेफादेशश्छान्दसः। अभ्यस्तस्वरः†। तादृशा ऋत्विजः "मनीषाः" मनस ईशितीः स्तुतीः "सोमम्च्छ" सोमं प्रति प्रेरयन्ति। "नमस्यन्तीः" नमस्यन्त्यः सोमं योजयन्त्यः सत्यः तम् "उपयन्ति" च। उप समीपे गच्छन्ति। तमेव "संयन्ति च" सङ्गच्छन्ते। "[च वा योगे प्रथमा (८,१,५९)—इति न निघातः] "उशतीः" कामयमानाः स्तुतयः "उशन्तं" कामयमानं सोमम् "आविशन्ति च" प्रविशन्ति च। १२ ॥ ७८

इति श्रीमत्सायणाचार्य्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे
छन्दोव्याख्याने पञ्चमस्याध्यायस्य सप्तमः खण्डः ॥
॥ इति शुभम् ॥

---

* "काण्वः"—इति ऋषि-मै०।

† "अभ्यस्तानामादिः (६, १, १८९)"—इति पा०।

पुरोजितीति-मुख्यास्तु नवर्चो बृहतीत्यसौ—
“आहर्य्यतायधृष्णवे” शिष्टा अनुष्टुभः स्मृताः* ॥
ऋषीणां विप्रकीर्णत्वात्तत्र तत्राभिदध्महे † ॥

तत्राष्टमे खण्डे—

सैषा प्रथमा ।

३ १ २ ३ १ २ ३ १ २ ३ १ २
पुरोजितीवोअन्धसःसुतायमादयित्नवे ।
३ १ २ ३ १ २ ३क २र
अपश्वानꣳश्नथिष्टनसखायोदीर्घजिह्व्यम् ॥ १ ॥ ७९

५ र २ ३ ५ २
(प्रह्लौ द्वौ ॥) पुरोजिती । वाअन्धा२३४साः । सु-
१र २ ५ १
तायामाऽ२दया३१उवाये३ । त्ना२३४वे । अपश्वाना२ꣳ

---

* पुरोजितीतिमुख्याः ‘पुरोजितीवोअन्धसः’—इतिप्रभृतयः नव ऋचः, अत्राष्टमे-खण्डे श्रूयन्त इति शेषः। तत्र, आहर्य्यतायेति सप्तमी ऋक् बृहतीच्छन्दस्का, शिष्टाः अष्टौ अनुष्टुप्छन्दस्का इत्यर्थः ।

† ‘विनियोगस्त्वासां ज्योतिष्टोमे’—इति वि० ।

‡ उ० १,१,१८,१ = ऋ० ७,५,१,१ = आरण्ये १,२,२२ = ऊहे १,१,११—१,१,१२—२,२,१८—४,१,१३—४,१,१४—६,२,९—७,२,१०—८,२,१५—८,२,१६—८,२,१७—१०,२,२—१०,१,१०—१२,१,६—१२,२,११—१२,१,१२—१२,२,१३—१२,२,१४—१३,१,६—१३,२,६—१६,१,२—१६,१,८—१६,१,९—१६,२,६—१७,१,२—१७,१,४—१७,१,१०—२०,१,१८—२०,२,१२—२०,२,१३—(२१,२,२१)—२१,२,२—२२,१,६—२२,१,७—२२,१,९—२२,२,१३—२२,२,१५—२३,१,९ = ऊह्ये २,१,९—२,१,१८—२,२,२—२,२,५—३,१,१—३,१,१९—३,२,२—४,१,८—४,२,५—४,२,८—४,२,१४—४,२,१६—(५,२,८—५,१,१२)—५,२,१४—६,१,११ ।

र र १
अश्वा३१उवाये३ । ष्टा२३४ना । सखायोदीऽ२र्घजा३१
२
वाये३ । क्षौ२३४याम् ॥ ७ ॥

५र २ १ २ २ १ २र
पुरोजिती । वो३ओन्धा३साः । छनायमा२ । ऊ२ ।
१ २ २ १ २र
हा२इ । ओऽ२ । दा३याइला३वे । आपस्वाना२म् ।
१ १ २ २ १ २र
ऊ२ । हा२इ । ऊऽ२ । आ३याइष्टा३ता । माखा
र १ १ २
योदा२इ । ऊ२ । हा२इ । ऊ२३ । घा२जा२३४
५र र १ १ १११११
औहोवा । ए३ । क्रिया२३४५म् ॥ ८ ॥

५र र २ ५ २र
(कार्त्तयशम् ॥) पुरोहाहाउ । जी२३४इती । वो
१ २ २ ४ ५ २१ २ २ ४ ५
आऔ३हो३ । धासाः । सुताऔ३हो३ । यामा६ ।
५ २ १र १ २ १ र २ २
हाउवा । दयिलवे२ । उपा । अपस्वान१अथा१इष्टा
२ १ २ २ ४ ५ ५ २
३ना । सखाऔ३हो३ । योदा६ । हाउवा । घजि
१ २ १ १ १ १
क्रियम् । उपा२३४५ ॥ ९ ॥

५४र ५र ४५ ४
(औहुं सह्मनम् ॥) पुरोजितीवोअश्वसः। ओवा-
५ २र र १ र
हाइ। सुतायमादयित्नवओवा२३होइ। अपश्वानꣳ
१ २र र १ २ ३
अथिष्टनओवा२३होइ। साखायोदाइ। घाजिह्वा२३
२ २ १र २१ र ऽ ३१
४५या६५६म्। सुवृक्तिभिर्नृमादनम्भरे२षुवा१॥ १०॥

२२ २ ४ र ५ २
(श्यावाश्वम् ॥) पुरो३१। जी३ती। वोअ। श्वा
४ ५ १ र र २ १
३सः। एहिया। सु। तायमादा। यि। त्नवा२इ।
१र १र २ ४ ५ २र
एहिया२। अपश्वानꣳआ३थी३। ष्टा२३४ना। एहा
१र र १र २ ४ २
२इ। एहिया२। सखायोदाइर्घा३जी३। ह्वा३४५ये।
५
६हाइ॥ ११॥

५र र ५ २ १र
(आश्वीगवम् ॥) पुरोजितीवो४अश्वासाः। सुताय।
र २ १ १र र २
मादा२३यि। त्न्वा२१ऽ२। त्नवेअपश्वानꣳअथिष्टन।
१ २ २ १ २ १
साखा३उवा। यो२दी। घा२३जी। ह्वियाम्। औ
४ ५ ४
२३होवा। हो५इ। डा॥ १२॥ ७९

अथ द्वितीया।

३ १ २ २ ३ २उ ३ १ २ ३ १ २
अयम्पूषारयिर्भगःसोमःपुनानोअर्षति।
३ १ २ ३ १ २ ३क २र ३ १ २ ३ २
पतिर्विश्वस्यभूमनोव्यख्यद्रोदसीउभे ॥ २ ॥ ८०*

श्यावाश्वऋषिः†। हे "सखायः" सखिभूताः समानख्याना वा हे स्तोतारः! "वः" यूयं "पुरोजिती" [षष्ठ्याः पूर्वसवर्णदीर्घः‡] पुरः-स्थित-जयस्य "अन्धसः" अदनीयस्य सोमस्य स्वभूताय "सुताय" अभिषुताय "मादयित्नवे" अत्यन्तं मदकराय रसाय "दीर्घजिह्व्यं" [दीर्घा जिह्वा अस्य स दीर्घजिह्वो "दीर्घजिह्वी च छन्दसि" (४,१,६९)—इति "ङीषन्तत्वेन" निपातितः। तादृशं] "श्वानं" च "अपश्नथिष्टन" अपश्नथयत¶ अपबाधध्वम्। यथा श्वा राक्षसा वा "सुतं" सोमं न लिहन्ति तथा कुरुतेत्यर्थः॥ १ ॥ ७९

---

* उ० २,१,१६,१ = ऋ० ७,५,२,१ = आरण्य २,२,८—२,२,१७—२,२,१८—२,२,१९ ऊहे १,२,८—२,२,९—७,१,९—११,२,१०—११,२,२०—१३,१,२—१४,१,१२—१४,१,१४—१५,१,१७—२०,१,५—२०,२,१८—२२,२,९ = ऊह्य २,१,६—२,१,८—३,१,११—३,२,११—५,२,९—६,१,८।

† 'आन्धीगुः श्यावाश्विः'—इति ऋषिनै०

‡ सुपां सुलुगित्यादिना (७,१,३९)।

¶ 'श्लथिलीकरोतु'—इति वि०।

२ १र र र १ २र
(क्रौञ्चानि त्रीणि ॥) अयम्पूषौहो। रायिर्भगाः। सो
१ २ ४ २ १ र १र
मःपुना३। नोआर्षापूता६५६इ। पतिर्विश्वौहो। स्था-
१र २ १ २ ४
भूमनाः। वियख्यद्रोा३। दासी३ऊ५भा६५६इ ॥ १३ ॥

५ र र २ १ २र १
अयम्पूषा। अयम्पूषा। रयिर्भगाः। सोमःपूना
र १ २ १ १ २
२। नोअर्षताइ। पतिर्वाइश्वा२। ओस्थाभू१माना२ः।
१ २ १ र १ २
ओइवियख्या२३द्रो। दासीउभ। इडा२३भा३४३।
२
ओ२३४५इ। डा ॥ १४ ॥

४ २ ४र ५र २ २ ४ ५ ५ १ १
अयम्पूषा। हौ। रयिर्भगाइए। सोमा२ःपुना२।
२ १ २ ५ १ २१र २ १
नआ३४५। षा२३४ती। पतिर्विश्वस्थभूमनः। विय-
२ १र २ १
ख्या२३द्रो। दसीउ२३भा३४३इ। ओ२३४५इ। डा ॥
॥ १५ ॥ ८०

अथ तृतीया ।

३२ ३ १२ २ २ ३१२ २१ २
सुतासोमधुमत्तमाःसोमाइन्द्रायमन्दिनः ।
३१२ ३ १ २ ३ १२
पवित्रवन्तोअक्षरन्देवान्गच्छन्तुवोमदाः ॥ २ ॥ ८१*

५ र र २ २ १र
(त्वाष्ट्रीसाम ॥) सुतास्सोमा। धुमा३त्तमाः। सो-
२ २ २ १२२ १ २ ३
माइन्द्रा३यमा३। ए३। दिनश्वा। पवाइत्रवा३न्तो

ययातिर्नाहुषऋषिः[†]। "पूषा" पोषकः सर्वेषाम्[‡]। "भगः" भजनीयः[¶] "रयिः" धनहेतुः "अयं" सोमः "पुनानः" पवित्रे पूयमानः सन् "अर्षति" कलशमभिगच्छति। तथा "विश्वस्य" सर्वस्य "भूमनः" भूतजातस्य "पतिः" पालयिता[§] "सोमः" "उभे" "रोदसी" द्यावापृथिव्यौ "व्यख्यत्" स्व-तेजसा प्रकाशयति। अनेन लोकद्वयपतित्वं सूचितम्[‖] ॥ २ ॥ ८०

---

* छ० १,२,१५,१= ऋ० ७,५,१,४=ऊहे २,२,२—२,१,३—१,३,४—७,१,२०—१५, १,२—१६,१,२—२०,१,११—२७,१,१२—२२,२,११=ऊह्ये २,१,१०—४,१,७—५,२, ११—५,२,१२—६,१,१०—६,१,१५—६,२,२।

[†] 'नाहुषो मानवः'—इति ऋषि-मं०।

[‡] 'पूषा पुष्णातेः। सोमः। अथवा पूषा आदित्यः'—इति वि०।

[¶] 'भगः सएव सोमः शोभनः'—इति वि०।

[§] 'आदित्यात्मना'—इति वि०।

[‖] 'विनियोगोऽस्य द्वितीयेऽहनि'—इति वि०।

२ २ ३ २ १ २ २ २ २ १र
३। ए३। चरन्ना। दाइवान्गच्छा३न्तुवा३ः। ए३। मद्वा-
२
आ॥ १६॥

५ ४र ५र ४ ५ ४ १
(ऊर्द्धइडत्वाष्ट्री॥) सुतासोमधुमत्तमाः। सोमा२
१ ३ २ १ ५ २ १ २ र
इन्द्रा२। यमा३४५। दी२३४नाः। पवित्रवन्तोअक्ष-
३र र २ १ २ १र २ १
रन्। देवान्गच्छा। तुवोमा२३दा३४३ः। ओ२३४५
इ। डा॥ १७॥

५ ४र ५र ४ ५ र ४र ५
(वासिष्ठम्॥) सुतासोमधुमत्तमाः। सोमाइन्द्रा।
२ १ ७ १र २ १ र
यमन्दिनः। पावित्रावा२। तोअक्षरन्। दाइवान्
२ ३ ५ २ १ २ ४ ५ ४
गच्छौवा। तू२३४वाः। मदा। औ३होवा। होपूइ।
डा॥ १८॥

५ ४र ५र ४ ५ र ४र
(आष्कारणिधनं त्वाष्ट्री॥) सुतासोमधुमत्तमाः। सो
५ २ ५र १ ७ १ १ १ ७
माहाउ। इन्द्रा३यामन्दिनार३ः। इन्द्रा२हो। यमा२

दा२३४इनाः । पवित्रवा३न्तोअक्षारा२न् । अवा३हो । तो२वा१२३४रान् । देवान् गच्छा३न्तुवो१मादा२ः । देवा३न् होइ । गच्छो२३४हा । तू२वा२३४औहोवा । मदा३आ२३४५ ॥ १९ ॥

(वासिष्ठम् ॥) सुतासोमधुमत्तमा६ए । सोमाइन्द्रा३यामन्दिना२ः । दाइना२ः । पवित्रवा३न्तोअक्षारा२न् । अक्षारा२न् । देवान् गच्छा३न्तुवो१मादा२ः । मादा२ः । देवा३न् होइ । गच्छा२३४हा । तू२वा२३४औहोवा । मदा३ई२३४५ ॥ २० ॥

(स्वारत्वाष्ट्री ॥) सुतासोमा३हा । धुमत्तामा२ः । सोमाइन्द्रा३हा । यमन्दाइना२ः । पवित्रवा३हा । तोअक्षारा२न् । देवान् गच्छा३हा । तुवेर३हो२३४ । वा । मा५दो६हाइ ॥ २१ ॥

५ र २र २ २ २
(द्विरभ्यस्तत्वाष्ट्री॥) सुता। सोमा३। हा३हा।
२ २ २ र ५र २ १ २ २ २ २
धुमत्तामा२३४ः। सोमाः। इन्द्रा३। हा३हा। यम
१ ५ २ २ २ २ २र २ १
न्दाइना२३४ः। पवि। त्रवा३। हा३हा। तात्रहा
र ५र २ २ २ २ २ २ १
रा२३४न्। देवान्। गच्छा३। हा३हा। तुवो३हो२
५ ४ ५
३४। वा। मा५दो६हाइ॥ २२॥

५ र २ ४ ५ ४ ५ २र १र
(वासिष्ठम्॥) सुतासो३माधुमत्तमाः। सोमा
२ १ २ १ २ २ ५ २ र
इन्द्रा। यमन्दिनः। पावात्रो२३४वा। त्रवन्त। त्रसरन्।
२र र २ १ २१र २ १
देवान् गच्छ। तुवोमा२३दा३४३ः। औ२३४५इ। डा॥
॥ २३॥ ८१।

ययातिर्नाहुषऋषिः*। "मधुमत्तमाः" अतिशयेन माधुर्योपेताः अतएव "मन्दिनः" मदकराः "सुतासः" अभिषुताः सोमाः "पवित्रवन्तः"† पवित्रे वर्त्तमानाः सन्तः "इन्द्राय" इन्द्रार्थम् "अक्षरन्" पात्रेषु क्षरन्ति। अथ प्रत्यक्षस्तुतिः। "वः" युष्माकं

---

* 'विनियोगोऽस्य तृतीयेऽहनि'—इति वि०।

† 'दशापवित्रवन्तः'—इति वि०।

अथ चतुर्थी ।

१ २　　२ १ २ ३ १ २　　२ १ २
सोमाःपवन्तइन्दवोस्मभ्यङ्गातुवित्तमाः।
२ ३　३ १ २ २ १ २ ३क २र ३ १ २
मित्राःस्वानाअरेपसःस्वाध्यःस्वर्विदः॥४॥८२*

४　　५　　२　　१ ७　२
(कौञ्चे द्वे॥) हाउसोम्माः। पवा३न्ताइन्दावाउ।
२　　　　१　१　७　२　　　　२
वा३। हाउवा। अस्मभ्यङ्गातूवित्तामाउ। वा३। हा
१र　र र　　२　२　　　　२
उवा। मित्राः स्वानाआरे१पासाउ। वा३। हाउवा
५र　　३ २　　१　४　　२　　　　५
३४। सुवा। धिया३ः। स्व२३वा३ः। वा३४५इदाई्हा
इ॥२४॥

५र र　३ २ ३ ४ ५　　२ १ २ १　　२ ३ २ १
सोमाः पवन्तइन्दवाः। अस्माभ्यङ्गा। तुवित्तमाः।
२ ३　　५　　२र१र ३र१२　　१ र २ १　　१ १
माइत्राओ२३४वा। स्वानाअरेपसः। सुवाधियाः। सुव
२　　　　१
र्वी२३इदा३४३ः। ओ२३४५इ। डा॥२५॥८२

“मंदाः” मद—हेतवो रसाः “देवान्” इन्द्रादीन्† “गच्छन्तु”॥

॥३॥८१

---

* उ० ४,१,२०,१—ऊ० ७,५,२,५ = जहे २,२,१३—२,२,१४—२,२,१५—२,२,१६—१५,२,१६—१५,२,१७—१५,२,१८—१६,१,१—२२,१,१४ = ऊह्य ६,१,२०।

† ‘वस्वादीन्’—इति वि०।

अथ पञ्चमी।

३ १ २   ३ १ २   ३ १ २   ३ १ १
अभीनोवाजसातमꣳरयिमर्षशतस्पृहम्।
१ २ ३ १ २   ३ १ २३ १ २
इन्दोसहस्रभर्णसन्तुविद्युम्नंविभासहम्॥ ५॥ ८३*

५ र र   १ २
(सोमसामानि त्रीणि॥) अभीनोवा। जा२सा२३
५र र   १ ५   २ १   २ १ २   १ र
४औहोवा। ता२३४माम्। रयिमरिशतस्पृहम्। इन्दो

मनुः सांवरणऋषिः। "गातुवित्तमाः" अतिशयेन मार्गस्य लम्भकाः† "इन्दवः" दीप्ताः‡ सोमाः "पवन्ते" अस्मभ्य मदर्थं "चरन्ति" आगच्छन्ति वा। कीदृशाः? "मित्राः" देवानां सखिभूताः "स्वानाः" अभिषूयमाणाः "अरेपसः" पापरहिताः अतएव "स्वाध्यः" शोभन-ध्यानाः "स्वर्विदः" सर्वज्ञाः॥

"स्वानाः"-"सुवानाः"—इति पाठौ॥ ४॥ ८२

---

* उ० ५,१,१६,१ = ऋ० ७,४,२१,१ = ऊहे ५,१,३—५,१,४—५,१,५ — ५,१,६—५,१,७—५,१,८—१२,१,१५—१२,१,१६—१७,१,१२—१७,१,१३—१७,१,१४—१७,१,१९—१८,१,१०—१९,१,२—१९,१,९।

† "गातुः"—इति पृथिवी-नामसु विंशतितमं नैघण्टुकम् १,१। किञ्च निरुक्त-चतुर्थे—"गातुं यज्ञाय गातुं यज्ञपतय इत्यपि निगमो भवति। गमनं यज्ञाय गमनं यज्ञपतये"—इति च यास्कः।

‡ 'ज्योतिरिन्दुः'—इत्यादि नि० नै० प० १,१७।

१ ७ १ १ २
सहस्रभा२३हो । णसा२म । तुविद्युम्न विभा२३होये
२ ३
३। सहेमा२३४५इ । डा ॥ २६ ॥

५र र १ र २ १ र
अभीनोवा । जासातमम् । रयिम । षाउवा२३ ।
१ २ २ १ २ १ ५र १
होवा३हाइ । शतस्पृहम् । इन्द्रा२स । हाउवा२३ ।
१ २ २ १ २ १ ३ ५र र
होवा३हा । सभर्णसम् । तुवायें३ । द्यू२म्ना२३४औहो
२र १ ३ ११११
वा । विभासहा२३४५म् ॥ २७ ॥

२० १ २र र ४ २ २ ५
अभी२होइ । नोवाजा३सा३ । हाता२३४माम् ।
२ १ २ ४ २ ३ ५ २
रयी२ऽहोइ । अर्षशा३ता३ । हास्पृ२३४हाम् । इ
१ २ ४ २ ३ ५ २
न्दो२होइ । सहस्रा३भा३ । हार्णा२३४साम् । तुवा
१ २ ४ २ ४
२होइ । द्युम्न वी३भा३ः । हा३सा५हा६५६म् ॥ २८ ॥

२ १ २ ५र २ २
(क्रौञ्चम् ॥) अभीनोवा३१२३४ । जसा । तमा३
२ १ २ ५ २ २ २ १
म् । रयिमर्षा३१२२४ । शत । स्पृहा३म् । इन्दो

२ ५ ३ २ २ १ २
सास्रा३१२३४। स्रभ। णसा३म्। तुवाइद्यूम्ना३१२३
४
म्। विंभा५सहाउ। वा॥२९॥

४ र र र र ४
(सोमसाम॥) अभीनोवौहो५जसातमाम्। रयि
र ४ र र ४
मर्षौहो५शतस्पृहाम्। इन्दोसहौहो५स्रभर्णसाम्।
र र ४ ५ ४ ५
तुविद्युम्नौहो५विभासहाम्। सहम्। तुविद्युम्नं विभाइ।
५ २ १११११
हाउवा। सहा३मे२३४५॥३०॥ ८३

अम्बरीषऋजिश्वानौ* द्वावृषी। हे "इन्दो" दीप्यमान सोम! "वाजसातमम्" अत्यन्तं बलप्रदं अन्नप्रदं वा धनं पुत्रं "नः" अस्माकम् "अभ्यर्ष"† अभिगमय। कीदृशम्? "शतस्पृहं" बहुभिः स्पृहणीयम्। "सहस्रभर्णसं" बहुविधभरणम् अनेकपोषण-युक्त मित्यर्थः। "तुविद्युम्नं" [द्युम्नं द्योततेर्यशो वान्नं वेति‡ यास्कः] बह्वन्नं बहुयशोयुक्तं वा। "विभासहं"¶ महतः प्रकाशस्याभिभवितारम् अतितेजस्विन मित्यर्थः॥

---

* "अम्बरीषः वार्षागिरः"—"ऋजिश्वा भारद्वाजः"—इति ऋषि-नि०।

† अर्षेति ऋषतेर्गति-कर्म्मणो रूपम् (२,१४)।

‡ "द्युम्नं द्योततेर्यशो वान्नं वा "अस्मे द्युम्न मधि रत्नञ्च धेहि" अस्मासु द्युम्नं च रत्नं च धेहि"—इति निरु० नै० ५, ५।

¶ "विभासहः" शब्दोऽसौ एकवारमेव श्रूयते निखिल-संहितास्विति ध्येयम्।

अथ षष्ठी ।

३ १ २   ३ १ २   ३ १र   ३र ३ १ २
अभीनवन्तेअद्रुहः प्रियमिन्द्रस्यकाम्यम् ।
१ २उ   ३ १र २र   ३ १ २   ३ १ २
वत्सन्नपूर्वआयुनिजातꣳरिहन्तिमातरः ॥ ६ ॥ ८४

३   ५   १
(आङ्गिरसानि त्रीणि ॥·) आ२३४भी । ओइनवन्त
२   १   २   १
आद्रू१हा२ः । ओइप्रियमिन्द्रस्यकामा१या२म् । ओइ
र   २   १   र   २
वत्सन्नपूर्वआयू१नी२ । ओइ । जातꣳरिहन्तिमा१२३
५   ४   ५
४ । वा । ता५पूरोईहाइ ॥ २१ ॥

५ र   १ २   ४   ५
अभी । नवौ३२ । तआ५द्रुहाः । प्रियामिन्द्रा३ ।
१ २ ३   ५   २   १ २ ३   ५
स्याकामा२३४याम् । वत्सन्नपू३ । र्वआयू२३४नी ।
१र २   १   २ १   २१र   २   १
जाता३ꣳहोइ । रिहा३हो । तिमाता२३रा३४३ः । ओ
२३४५इ । डा ॥ ३२ ॥

“घृतस्पृहं”-“पुरुस्पृहम्”—इति,‘विभासहं’’-“विभ्वासहम्”
—इति च साम्नकैरचः पाठः ॥ ५ ॥ ८३

---

* ऋ० ७,४,२७,१ = आरण्ये १,२,१४—२,१,२—३,१,४—४,१,११ ।

अथ सप्तमी।

२ २ ३ १ २ ३ २ ३ १ २ ३ १ २
आ ह्यंतायधृष्णवेधनुष्टन्वन्ति*पौꣳस्यम्।
२उ ३ १ २ ३ १ २ ३ १र २र ३ १ २
शुक्रावियन्त्यसुरायनिर्णिजेविपामग्रेमहीयुवः॥ ७॥८५†

५ ४र ५ र ४ ५ ४ ५ ४ ५ ४र ५
अभीनवन्तेअद्रुहः। ओहाइ। प्रियमिन्द्रस्यकामि
४ ५ ४ र ५ः ४र ५ र ४ ५
यम्। ओहाइ। वत्सन्नपूर्वआयुनि। औहोवाहा
१ २ ३ ५ २ १ २ ४
इ। जातꣳरिहौवा। तौ२३४मा। नरा। औ३हो
५ ४
वा। हा५इ। डा॥ २३॥ ८४

ऋषभ-सूनू काश्यपौ द्वयोः‡। यथा "मातरः" गावः "पूर्वे" प्रथमे "आयुनि"¶ वयसि "जातं" वत्सं "रिहन्ति" लिहन्ति तथा "अद्रुहः" अद्रोहाः वसतीवर्य्याख्या आपः इन्द्रस्य "प्रियं" काम्यं सर्वैः काम्यमानं सोमम् "अभि नवन्ते"§ अभिगच्छन्ति॥ ॥ ६ ॥ ८४

---

* "धनुस्तन्वन्ति"—ऋ०।

† ऋ० ७,४,२५,१।

‡ अस्याः परस्याश्चेत्यर्थः। न चात्र यथासङ्ख्यम्।

¶ "आयवः"—इति मनुष्य-नामसु प्रपठितं नैघण्टुकम् (२,३)। इह तु तस्यैव लौकिकता वयोऽर्थता चेष्टा भगवतः सायणस्य।

§ "नवते"—इति गति-कर्मसु ऊनत्रिंशत्तमं नैघण्टुकम् २,१४।

३र २ १
(गृत्समदस्य सूक्तानि चत्वारि ॥) आहा३ । औ२३
५ २१र २११ऽर ३ २ १ ५ २
४वा । ईंतायष्णावे२ । धन्३ः । औ२३४वा । तन्व
१र २ ३ २ १ ५
न्तिपौꣳसियम् । पुरुक्रा३ः । औ२३४वा । वियन्त्यस्तु
२र १ ऽर ३ २ १ ५ १ ऽर र
रायनिर्णिजे२ । विमा३ । औ२३४वा । अग्र२मही
१ ११११
युवा२३४५ः ॥ २४ ॥

२ २ १ ७ २ ३ ५ २ २
हा३हाइ । आहयँता । या२३४धृ । हा३हा३४।
५र र १ ५ २ २ १ २
औँहोवा । ष्णा२६४वे । हा३हाइ । धन्छान्वा ।
३ ५ २ २ ५र ५ ३ ५
तौ२३४पौ । हा३हा३४ । औहोवा । सौ२३४याम् ।
२ २ १ र २ १ ७ २ ३ ५
हा३हाइ । पुरुक्राविय । तात्रसुरा । या२३४नौ ।
२ २ ५र र १ ५ २ २
हा३हा३४ । औहोवा । णौ२३४जे । हा३हाइ ।
१ २ ३ ५ २ २ ५र र
विपामाग्र्याँई । मा२३४हौ । हा३हा३४ । औहोवा ।
३
य२३४वाः ॥ २५ ॥

४ ५ ३ र ५ ४ ५ ४ १ र १
आहर्यतायधृष्णवआ। धनूष्टा१न्वा२। तिपौ९
२ १ र ३ १ ७ २ १ २
सा१या२म्। शुक्राविय। ताअसुरा३। यानीर्णी२३४
५ १ २ १ ४
इजाइ। विपामा१ग्रा२इ। ओइ। मा२३ही३।
२ ५
यू३४५वो६हाइ ॥ २६ ॥

३ ५ ३ ५ २ ४ ५ २
आ४हर्य। ता४यधृ। ष्णा३वेधनुष्टन्वा। तिंपौ
३ २ १ र २ १ ७ २ ३ २
९सियाम्। शुक्राविय। ताअसुरा। यनाउवा३।
५ ९ २ २ १ २ २ १र
णी२३४जे। वाइपा३९हाइ। आग्रे३हाई। महीयू
२ १
२३वा३४३ः। ओ२३४५इ। डा ॥ २७ ॥ ८५

“हर्य्यताय”* सर्वैः स्पृहणीयाय “धृष्णवे” शत्रूणां धर्षणशीलाय सोमाय “पौंस्यं” पुंस्त्वस्याभिव्यञ्जकं वरं “धनुरातन्वन्ति”. धनूंषि ज्यां कुर्वन्तीति सोमस्य धारा-विसर्गार्थं वितायमानं पवित्र मभिधीयते। तदेव विवृणोति—“विपां” मेधाविनां “अग्रे”† पुरस्तात् “महीयुवः”‡ पूजाकामा अध्वर्यवः

---

* ‘आहर्यतिः प्रेप्साकर्मः’—इति वि०।

† ‘अग्रे प्रथमे’—इति वि०।

‡ ‘महत्सोमं मिश्रयन्ति रश्मयः उदकानि वा’—इति वि०।

अथाष्टमी ।

२·३ १ २ ९ १र १र ३ १ २ ३ १ २
परित्यꣳहर्यतꣳहरिम्बभ्रुम्पुनन्तिवारेण ।
३ २उ ३ २उ ३ १ २ ३ १र २र
योदेवान्विश्वाꣳइत्परिमदेनसहगच्छति ॥ ८ ॥ ८६*

२ ४ ३ ४ २ ४ ५
(द्विरभ्यस्तमाकूपारम्॥) परित्यꣳहर्यतꣳहरिम् ।
१ र ४ ३ ४ २
पार२३४ । रित्यꣳहौहोा४र्यतꣳहराइम् । बभ्रुम्पुनन्ति
र ४र ५ १ र र ४र ३र·४र
वारेण । वा२३४ । भ्रुम्पुनौहोा५न्तिवारेणा । यादे

"शुक्रा"† शुक्लवर्णानि गो-पयांसि "असुराय"‡ बलवते "निर्णिजे" स्वरूपाय शोधनार्थं "वयन्ति"¶ आच्छादयन्तीत्यर्थः ॥

"शुक्राावियन्त्यसुरायनिर्णिजे"-"शुक्रांवयन्त्यसुरायनिर्णिजम्" —इति साम्न ऋचः पाठौ ॥ ७ ॥ ८५

---

* उ० ५,२,१८,१—८,२,८,२ = ऋ०७,४,२४,१ = ऊहे ५,१,१८—५,२,१९—५,२,२० —६,१,१—६,१,२,— ६,१,३—१२,२,१— १२,२,२—१४,२,१६—१४,२,१७—१४,२, १८—१४,२,१९—१४,२,२०—१४,२,२१—१७,१,८—१७,१,९—१७,२,२—२०,२,४ = ऊह्ये ४,२,२ ।

† 'शुक्राः शुचिमन्तः'—इति वि० ।

‡ 'असुराय सुखाय बहुदानवते'—इति वि० ।

¶ वयन्तीति पाठस्तु ऋग्वेदीयः । तमेवावलम्ब्यात्रेऽत्र व्याख्यातं भगवता सायणेनेति बोध्यम् । सामवेदीय-पाठस्तु वियन्तीति ।

अथ नवमी।

१ २ ३ १र १र ३ २ ३ १ २ ३ १र २र
प्रसुन्वानायान्धसोमर्त्तोनवष्टतद्वचः।
२ १ २ ३ १ २ ३ २ ३ १र १र
अपश्वानमराधसꣳहतामखन्नभृगवः ॥ ९ ॥ ८७*

॥ प्रथम-दशति ॥

१र ४र ३ ४ ५ १ २ २ २ २ ४
वान्विश्वाꣳइत्परि। यो२३४। देवान्वौहो५श्वाꣳइत्य
३ ४र २ ४ ५ १ २ २
राइ। मदेनसहगंच्छति। मा२३४। देनसौहो५ह-
४ ५
ग। च्छा५तोईहाइ ॥ ३८ ॥ ८६

ऋजिश्वाम्बरीषावृषी†। "हर्यतः" सर्वैः स्पृहणीयं "हरिं" हरितवर्णं "बभ्रुं" बभ्रुवर्णं च "त्यं" तं सोमं "वारेण" बालेन पवित्रेण "परि‡ पुनन्ति" परिशोधयन्ति। "यः" सोमः "विश्वान्" सर्वानिन्द्रादीन् "देवानित्" देवानेव "मदेन" मदकरेण रसेन सह "परि¶ गच्छति" इति § ॥ ८ ॥ ८६

---

* उ० ६,२,३,१—१,२,२२,३ = ऋ० ७,५,२,३ = ऊहे १,२,१७—१,२,१८—६,२,१७—६,२,२०—११,२,२—११,२,३—११,२,१३—१५,१,१६—१६,१,१४—१८,१,१७—१९,२,१९—१९,२,२०—१९,२,२१—२२,२,७ = ऊह्य २,१,४—३,२,४—६,१.६।

† "ऋजिश्वा भारद्वाजः—अम्बरीषो वार्हस्पत्यः"—इति ऋषिमै०।

‡ 'परि समन्तात्'—इति वि०।

¶ 'परि देवं लक्षयित्वा'—इति वि०।

§ 'विनियोगोऽस्य नवमेऽहनि'—इति वि०।

२ १ ४र ५ १ २
(वैरूपम् ॥) प्रसुन्वा२३नायअन्धसा: । मर्त्तः ।
१ ३ २ ३ ५ २ र ३ २ ३ ५
नवा२ । ष्टतद्वा२३४चाः । अपश्वानमरा । धा२३४सा-
२ १र २ ३ २ ४
म् । हतामा२३खम् । नभृ३गा५वा६५६: ॥ ३८ ॥ ८७

॥ इति अर्द्धः प्रपाठकः ॥

प्रजापतिर्ऋषिः[*] । "सुन्वानाय" अभिषूयमाणाय [षष्ठ्यर्थे चतुर्थी[†]] अभिषूयमाणस्य "अन्धसः" सोमस्य "तत्" प्रसिद्धं "वचः" वचनं घोषं "मर्त्तान" मर्त्य इव कर्म-विघ्न-कारी "तवष्टन" कामयतां न शृणोत्विति यावत् । तथा हे स्तोतारः "अराधस" साधक-कर्म-रहितं[‡] । "श्वानम्" "अपहत" । तत्र दृष्टान्तः—"मखन्न"[¶] यथा पुरा अराधसं मखम् एतन्नामानं भृगवोऽपहतवन्तः तथा अपहतेत्यर्थः ॥

"सुन्वानाय"-"सुन्वानस्य"—इति, "वष्ट"-"द्वते"—इति च साम्न ऋचः पाठः ॥ ९ ॥ ८७

इति श्रीमत्सायणाचार्य्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे
छन्दोव्याख्याने पञ्चमस्याध्यायस्याष्टमः खण्डः ॥ ५ ॥

॥ इत्यानुष्टुभम् ॥

---

[*] "वाभ्रयः"—इति ऋषि-नं० ।

[†] "षष्ठ्यर्थे चतुर्थीति वाच्यम् (२, ३, ६२)"—इति का० वा० ।

[‡] "अधनं धन-रहितम्"—इति वि० ।

[¶] "हतामखम्"—इति मन्त्र-पाठस्य 'हता'—'मखम्'—इति पदकारस्य छेदः ।

जगत्योऽभिप्रियाणीति मुख्या द्वादश सम्मताः* ।
आद्यास्तिस्र ऋचो दृष्टाः कवि†नाम्ना महर्षिणा ।
उत्तरा विप्रकीर्णत्वाद्वक्ष्यन्ते ऋषयः पृथक्‡ ॥

अथ नवमे खण्डे—

सैषा प्रथमा ।

३ २ ३१ २ ३ १ २ ३
अभिप्रियाणिपवतेचनोहितो
१ २ ३ २उ ३ १ २ १ २
नामानियह्वोअधियेषुवर्द्धते ।
१ २र ३ २ ३ १उ ३
आसूर्यस्यबृहतोबृहन्नधि
२ ३ १ २ ३ २
रथंविष्वञ्चमरुहद्विचक्षणः ॥ १ ॥ ८८ ¶

भगवान् सायणोऽपि तथैव व्याख्यातवान् । अत्र मते ऋतेत्याकारस्य द्व्यचोऽतस्तिङ इति (६,३, १३५) दीर्घे 'ऋता'—इति रूपम् ॥ विवरणकारस्तु 'ऋत'—'अमतम्'—इत्येवं छेदं स्वीकृत्य 'अमतं यज्ञ वर्द्धिष्णुतम्'—इति व्याचख्यौ ।

* अत्र नवमे खण्डे अभिप्रियाणीत्याद्याः द्वादश ऋचः सम्मताः पूर्वाचार्य्याणामिति शेषः ।

† "कविः भार्गवः"—इति ऋषि नं० ।

‡ तत्र द्वादशसु आद्यास्तिस्र ऋचः कविनाम्ना महर्षिणा दृष्टाः । उत्तराः ऋचः नैकेन दृष्टा इति तत्र ऋषि-विप्रकीर्णत्वम् तस्मात् तत्र ऋषयः पृथग् वक्ष्यन्ते ।

¶ उ० १,१,१९,१=ऋ० ७,२,२३,१= आरण्ये २,१,६ ऊहे =१,१,१९—९,१,२—१४,१,१८—१६,१,१५—१९,१,१४=ऊह्ये १४,१,१—१४,१,१९ ।

२ २ ५ २ ३
ओम् ॥ (कावम् ॥) आभिप्री२३४या । णीपावा२३४
५ २र १र २ ३ ५ २ २
ताइ । चानोहिता२३ः । नामानी२३४या । ह्वोअधी
५ २र १ ५ २ ३ ५ २ २
२३४ये । षूवर्द्धतायि३ । आसूरी२३४या । स्याबृहा
५ २र १ २ २ ३ ५ २ २
२३४ताः । बृहन्नधायि३ । रथंवा२३४इष्वा । चामारु
५ ३ २
२३४हात् । विचा३१उवा२३ । क्षा२३४णाः ॥ १ ॥

४ ४ ५ ३ ४ ५
(ऐडकावम् ॥) ए५ । अभिप्रिया२ । णिपवताइ ।
४ ४ र ५ ४ ४र र ५ ३र ४
ए५ । चनोहिताः । ए५ । नामानीया२ । ह्वोअधि
५ ४ ४ ५ ४ ४र र ५ २
याइ । ए५ । षुवर्द्धताइ । ए५ । आसूरिया२ । स्य
४ ५ ४ ४ ५ ४ ४ ५ २ ४
बृहताः । ए५ । बृहन्नधी । ए५ । रथंविष्वा२ । चम
५ ४ ४ ५ ४
रुहात् । ए५ । विचक्षणाः । ह्वो५इ । डा ॥ २ ॥

५ र र र र ४ ५ १ २
(वाजसनि ॥) अभ्यौहोवाहाइप्रियाणी । पवता
३ ५ २ १ १र १ २ र र १
इचा२३४नो । हिताः । नामानियह्वोअधियेषुवर्द्धताइ ।

२र १ २ र १ २१ २ १ २
आहूर्यस्येव हृतोव हृन्नधाइ । रथम् । वाइषस्वमरुहृत् ।
२ १ १११
विचा३१उवार३ । हो३णा२३४५ः ॥ २ ॥

२ १ २र १ १
(वाजजित् ॥) अभिप्रिया । णीपवताइ । होइहो
२ १२ ५र ४ ५र ४ ५ २र
वा३होये३४ । चनोहिताः । हाहो । वाहाइ । ना
र १ २र १ १ २ १२ ५
मानिया । क्रोअधियाइ । होइहोवा३होये३४ । षुव
४ ५र ४ ५ २र र १ २र १
ह्वताइ । हाहो । वाहाइ । आहरियां । स्याव हताः ।
१ २ १ २ ५ ४ ५र ४ ५
होइहोवा३होये३४ । व हन्नधी । हाहो । वाहाइ ।
२ १ २र १ २ १ २ ५
रथंविषा । चामरुहान् । होइहोवा३होये३४ । विच
४ ५र ४ ५ ५ २र१र २ १
क्षणाः । हाहो । वा६हाउ । वा । वाजीजिगी३वा
ऽ१ ॥ ४ ॥

२ १ २र १ २र१र
(वाजजित्साम ॥) अभिप्रिया । णीपवताइ । चानो
२ १ २र र १ २र १
हिताः । होवा३होइ । नामानिया । क्रोअधियाइ ।
२र १ २ १ २र र १ २र १
षूवह्वताइ । होवा३होइ । आहरिया । स्योबृहताः ।

२र १ २ १ २ १ २र १
बृहन्नधाइ। होवा३हो। रथविष्वा। चामरुहात्।
२र १ २ १ ३ ५र र २र १र
वीचक्षणाः। होवा३हो२। वा२३४औहोवा। वाजी
२र १र २र १ऽर २ १ १ १ १
जिगीवाविश्वाधना२नी२३४५॥ ५॥

५ ४ २ १र २
(स्वारकावम्॥) अभ्योवा। प्रियाणिपवताइ। च
र १ १र र र २ १
नोहाइता२ः। नामानियह्वोअधियाइ। षुवर्द्धाता२इ।
१र र २ १ १ २ ४ ५
आसूर्यस्यबृहतो। बृहन्नाधी२३। राथा३०वाइषा।
२ १ १ २० ४
चमरुहा२३त्। वाइचा३क्षणा६५६ः॥ ६॥ ८८

“चनोहितः” [चन इत्यन्ननाम* चायतेरसुनि·चन इत्यौणादिक-सूत्रेण निपातितः] चनसेऽन्नाय हितः। यद्वा। हितान्नः सोमः “प्रियाणि” जगतः प्रीणयितृणि नामानि नमनशीलानि तान्युदकानि “अभिपवते” अभितः क्षरति करोति। “येषु” अन्तरिक्ष-स्थितेषु उदकेषु “यह्वः” महानह सोमः “अधि

---

* “चक्रीन्द्र प्रस्थितानीमानि हवींषि चनो दधिष्व। चन इत्यन्ननाम”—इति नि० ६, १६।

अथ द्वितीया।

३ १ २ ३ १ २ ३
अचोदसोनोधन्वन्त्विन्दवः
२ ३ १ २ ३ २ ३ २ २ १ २
प्रस्वानासोबृहद्देवेषुहरयः।
१ २ ३ २ ३ २र १ २ र
विचिदश्नानाइषयोअरातयो
१ २ ३ १ २ २ १ २
र्योनःसन्तुसनिषन्तुनोधियः॥ २ ॥ ८९*

२ र १ २र १
(आङ्गिरसानि त्रीणि ॥) अचोदासो२३। नोधनूवा
२र १ २ र १ २ १ २र
२३। तूइन्दवाः। प्रस्वानासो२३। बृहद्धाइवे३३। षू
१ २ १ २र १ २र १र
हरयाः। विचिदाश्ना२३। नाइषाया२३ः। आरातयाः।

वर्द्धते" अधिकं प्रवृद्धो भवति। अपां मध्ये सोमो वसति खलु। ततः "बृहन्" महान् सोमः "बृहतः" महतः परिवृढस्य "सूर्यस्य" "विष्वञ्च" विष्वग्गमनं रथम् "अधि" उपरि† "विचक्षणः"‡ विश्वस्य द्रष्टा सन् "आरुहत्" आरोहति। "अग्नौ प्रास्ताहुतिः सम्यगादित्य मुपतिष्ठते(म० ३,७६)"—इति ॥१॥ ८८

---

* ऋ० ७,३,४,१।

† "अधि उपरि आदित्यमण्डलात् चतुर्थं मण्डलं रथं विष्टब्धं नाम"—इति वि०।

‡ विचक्षणः विविधं प्रकाशयत इत्यर्थः"—इति वि०

२ र १ २र १ २र १र २ १
अर्य्यौनाःसार२३। तूसंनाइषार२३। तूनाधियाइ१उवार-
१ १ १
३४५ ॥ ७ ॥

१ २र ३ २ ३र ४ ५ ४ ५ १ २र
आचोदसो। नोधनुवन्तु। इन्दवाः। प्रास्वा
र २ ३ ४ र र ५ ४ ५ १ २ ३ २ ३र ४
नासो। बृहद्देवेषु। हरयाः। वाइचिदश्ना। नाइ
र ५ ४र ५ १ ३र ३ २ ३ ४ ५ ४
षयोअ। रातयाः। अर्य्यौनःसा। तुसनिष। तुनो
५धियाउ। वा ॥ ८ ॥

२र र २ र र र र र ०
हाउहोवा३हाइ। अचोदसोनो३धा। नुवा३न्तू
२ २ १ १ १ १ १ २र र २ र र र
३। इन्दवा२३४५ः। हाउहोवा३हाइ। प्रस्वानासोवृ३
१ २र ४ २ ३ १ १ १ १ १ २र र २
३हात्। देवे३षू३। हरया२३४५ः। हाउहोवा३हाइ।
र ५र १ २ ४ २र २ १ १ १ १ २र
विचिदश्नाना३आइ। षयो३आ३। रातया२३४५ः। हा
र २ र १ २ ४ २र
उहोवा३हाइ। अर्य्यौनःसन्तू३सा। निषा३न्तू३। नोधि
१ १ १
या३२उवा२३४५ ॥ ९ ॥

५ ४ १ र र २
(मामराजम ॥) अचोह्वाइ । दासोनोधनुवा । तु
१ १ र र र र २ १ २
इन्दावा २ः । प्रस्वानासोबृहद्देवाइ । षुह्वरायार ः । वि
५ २ ५ २र २
चो२३४ह्वाइ । अश्मो२३४ह्वाइ । नाइषयः । अरो२३४
५ १ २ ३ ५ ३ ५ २
ह्वाइ । तायाः । अर्यो२३४ह्वाइ । नःसो२३४ह्वा । तू
३ ५ १ ऽ २ ५
सानी२३४षा । तूनां३उवा३ । धी२३४याः ॥ १० ॥

५ र ४ ५ १ र र
(सामराजम् ॥) अचौह्वेवा । दासोनोधनुवाः ।
२ १ १ र र र र २ १
तुइन्दावा २ः । प्रस्वानासोबृहद्देवाइ । षुह्वराया२३ः ।
१ २ ४ ५ २ ३ ५ २ २ २ २
वाइचो३दाश्मा । नाइषा२३४या । ह्वोइ । अरातार
५ ३ १ २ ४ ५ २ ३ ५
३४याः । ह्वो३इ । आर्यो३भाःमा । तूसानी२३४षा ।
२ ३ २ ४
ह्वो । तुनो३धा५याई५६ः ॥ ११ ॥

५ र ४ ५ १ र
(सिमानांनिषिधः ॥) अचो । वाह्वाइ । दासो
र २ १ १ र र र र २
नोधनुवा । तुइन्द्र२ावाः । प्रास्वानोसोबृहद्देवाइ । षुह्व

१ १ २ १ २ २र ४
रायाऽ२३ः। वाऽ३इचौत्। आऽ२३। आ३४। मा६
३ ४र ५र २ २ १ २ १ २
षयोअ९। ताऽ३याः। आऽ२३र्या। नाऽ२३ःसा३४।
३ ४ ५ ३ २ ४
तुसनिष। तुनो३धा५या६५६ः॥ १२॥ ८९

"अचोदसः"* अचोदनाः अनन्यप्रेरिताः "इन्दवः" सोमाः "नः" अस्माकं† "प्रधन्वन्तु" प्रगच्छन्तु [धन्वतिर्गति-कर्मा‡]। कुत्र? "बृहद्देवेषु हरयः" प्रभूत-देवयुक्तेषु यज्ञेषु [यथा वा बृहद्देवकुलजेषु मध्यते इति सम्बन्धः] कीदृशा इन्दवः? "स्वानासः" सूयमानाः "हरयः" हरितवर्णाः¶। किञ्च। "अरातयः" धनादि-दान-रहिताः "नः" अस्माकम् "अर्यः"§ अरयः "इषयः" इषोऽन्नानि इच्छन्तः "अश्नानाः"‖ अशनेन भोजनेन वियुक्ता एव सन्तु। किञ्च। नोऽस्माकं "धिया" कर्माणि देव--विषयाणि स्तोत्राणि+ "सनिषन्तु" देवान् सम्भजन्तु॥

---

* 'चोदयति'—इति वि०।

† 'नः अस्मान्'—इति वि०।

‡ निघ २,१४,६४।

¶ 'हरयः हरणशील'—इति वि०।

§ 'अर्यः स्वामिन'—इति वि०।

‖ 'अश्नानाः विनाशयन्ति'—इति वि०।

+ 'धियः कर्माणि प्रज्ञा वा'—इति वि०।

अथ तृतीया।

१ २ ३   ३ १ २   २
एषप्रकोशेमधुमाँ२अचिक्रद
१ २ ३ २ ३ १ २ ३ १ २
दिन्द्रस्यवज्रोवपुषोवपुष्टमः।
३ २   १ ३.२ १ २   ३ १ २
अभ्यृ३तस्यसुदुघाघृतश्चुतो
३ ५ २   ३ १ २   ३ १ २
वाश्रा अर्षन्तिपयसाचधेनवः॥ ३॥ ९०*

२र १   १
(वासिष्ठम॥) एषप्रकोशे२। म। धुमाँ२२।
३ २   ३   ५   २ १ . २ १   १   ३
अचाइक्रा२३४दात्। इन्द्रास्यवाज्रा२ः। पुषो२। व
३ २   ५   २ १ २ १   १   ३
पुष्टा२३४माः। अभाऋतास्या२। सु। दुघा२ः। घृ
२ ३   ५   २र १र २ १   १
ताश्चू२३४ताः। वाश्राअर्षान्ती२। प। यसा२३।
२   ४
चधा३इनापुवाई५६ः॥ १३॥ ९०

"देवेषु"—"दिवेषु" इति पाठौ॥ "विचिदश्नाना इषयो अरातयोर्या नः सन्तु सनिषन्तु नः धिया"—इति छन्दोगाः। "विचिनश्नन इषो अरातयोर्यो नः सन्तु सनिषतनो धिया" बह्वृचाः॥ २॥ ८९.

---

* ऋ० ७,३,२,१।

अथ चतुर्थी।

१ २   ३ . २ ३ १ २   ३ २उ.
प्रोअयासीदिन्दुरिन्द्रस्यनिष्कृतꣳ
३ २ ३ १र २र   ३ १ २
सखासख्युर्नप्रमिनातिसङ्गिरम्।

"एषः" अयं सोमः "मधुमान्" मधुर-रसः "कोशे" द्रोणकलशे "प्राचिक्रदत्" प्रकर्षेण शब्दायते। कीदृश एषः? "इन्द्रस्य" "वज्रः" वज्रस्थानीयः बलकरत्वेन वज्रवत् प्रहरण-साधनत्वाद् वज्रत्वोपचारः*। "एषः" एव हि सोमः "वपुषः" वीजानां वप्तुरन्यस्मात् "वपुष्टमः"† अतिशयेन वप्ता। वीजावापस्य सोमकर्त्तृकत्वात् [सोमो वै रेतोधा इति श्रुतेः]। "ऋतस्य" सत्यफलस्य सोमस्य धारा इति शेषः। ता "अभ्यर्षन्ति" अभिगच्छन्ति‡। कीदृश्यः? "सुदुघः" सुष्ठु दोग्ध्र्यः फलानाम्। "घृतश्चुतः" उदकस्य रसस्य वा धारयित्र्यः "वाश्राः" शब्दयन्त्यः¶। पयसा युक्ता वाश्रा धेनव इव§ लुप्तोपममेतत्॥

"वपुष्टमः"-"वपुष्टरः"—इति, "अभ्यृतस्य" "अभीमृतस्य"—इति, "पयसा च धेनवः"-"पयसेम धेनवः"—इति च छन्दोगबह्वृचानां पाठाः॥ ३॥ ९०

---

* 'प्रीते वज्र चेष्टु समर्थः'—इति वि०।

† 'दीपिताः'—इति वि०।

‡ 'अर्षन्ति चरन्ति'—इति वि०।

¶ वाश्राः कामयमानाः'—इति वि०।

§ 'चरन्ति पयः धेनव आदित्यरश्मयः'—इति वि०।

१ २ ३ २ १ १ २ २
मर्यइवयुवतिभिःसमर्षति

१ २ ३ १ २ ३ १ २ ३ २
सोमःकलशेशतयामनापथा ॥ ४ ॥ ९१ *

२ ३ ५ १ ४
(लौशम् ॥) प्रोया२३४सीत्। इन्दुरिन्द्रा२३। स्या

२ ३ ५ ३ २र ३ ५ १ ४ २ ३
३निष्कृतम्। सखासख्युः। नप्रमिना२३। तौ३सङ्गि

५ ३ २ ३ ५ १ ४ २ ३ ५ ३र २
रम्। मर्यइव। युवतिभा२३इः। सा३मर्षति। सोमः

३ ५ १र २ ४
कला। शेशतया२३। मनाउपा५था६५६ ॥ १४ ॥

३र ४र र ३ ४ ३ ४ ५ ३ २
(उत्तरलौशम् ॥) प्रोयासीदिन्दुरिन्द्रस्यनिः। कृता

३ १ १ १ १ ३ २ ५ ४ ५ र
म्। कृतां२३४५म्। सखा३१२३४। सख्युर्नप्रमिना

४ ५ ४ ५ ३ २ ५ ४ ५
तिसम्। गिराङ्गिराम्। मर्या३१२३४ः। इवयुवतिभिः

४ ५ ४ ५ ४ ५ ३र २ ५र ४ ५र
सम। षताइषताइ। सोमा३१२३४ः। कलशेशतया।

३ २ ४
मनाउपा५था६५६ ॥ १५ ॥

---

१ उ० ४, २, ७, १ = ऋ० ७, ३, १५, १ = ऊहे ४, १, ७—६, २, १०—७, २, ११—१७, १, ५—१३, २, १५—२१, २, १८।

२र १र २ १
(प्रवङ्गार्गवम् ॥) प्रोअयासाइत्। इन्दुरिन्द्रा। स्या
१ २र १ २१ १
२निष्कृताम्। सखासख्यूः। नप्रमिना। ता२इमङ्गि
२ १ २ १ १ २र
राम्। मर्यईवा। युवतिभाइः। मा२मर्षताइ। सो
१ २र१ १र २ ११११
मः कला। शेशतया। मा२नापथा२१उ। वा२३४५॥
॥ १६ ॥

२र १र २ १ २र
(तन्त्वम् ॥) प्रोअयासाइत्। इन्दुरिन्द्रा। स्या
१ २र २ ५ ३ २ ३ ५र २ २ ३
निष्कृता२३म्। सखासख्युः। नप्रामिना। तिसङ्गा
५ २ १ २ १ २र१ २
२३४इराम्। मर्यइवा। युवतिभाइः। सामर्षतायेइ।
र २ ३ ५ ३र २ ३ ५र २ २ ४
सोमःकला। शेशतया। मना३पा५था६५६ ॥ १७ ॥

१ र र ७
(यामम् ॥) आ२इ। इया। प्रोअयासाइदिन्दु
४ २ ३ ५ १ २ ७
रिन्द्रा२३। स्या३निष्कृतम्। सखासख्यु न प्रमिना-
४ २ ३ ५ १ ७ ४ २
२३। ती३सङ्गिरम्। मर्यइवायुवतिभा२३इः। सा३म

२ ५ १ र २
षँति । आ २इ । इया । सोमः कलाशे१शतयार२३ ।
२ ४
मनाइपापृथाईपुई ॥ १८ ॥ ९१

ऋषिगणऋषिः* । "इन्दुः" सोमः "इन्द्रस्य" "निष्कृतं" संस्कृतं स्थानमुदरं "प्रो अयासीत्" प्रकर्षेणैव गच्छति। गत्वा च "सखा" सखिभूतः सोमः "सख्युः" इन्द्रस्य "सङ्गिरं" सम्यग्गिरणाधारभूतमुदरं† "न प्रमितानि" न हिनस्ति। किञ्च। सः "मर्य इव"‡ "युवतिभिः" मर्त्यो यथा तरुणीभिः सह सङ्गतो भवति तद्वत् अयमपि सोमो युवतिभिर्मिश्रणशीलाभिर्वसतीवरीभिरद्भिः सह "समर्षति" सङ्गच्छते अभिषवकाले। स च सोमः "शतयामना" याम्ना अनेकया मनसाधनच्छिद्रोपेतेन "पथा" मार्गेण दशापवित्रसम्बन्धिना "कलशे" द्रोणकलशे गच्छतीति शेषः। यद्वैकमेव वाक्यम्। यथा मर्यो युवतिभिः सह सङ्गच्छते एवं कलशे शतयाम्ना पथा सङ्गच्छतेऽद्भिः॥

"शतयामना"-"शतयाम्ना"—इति पाठौ ॥ ४ ॥ ९१

---

[*] "सिकतानिवारी"—इति ऋषि-मं०।

[†] 'सङ्गिरं स्तुतम्'—इति वि०।

[‡] 'निष्कृतं समवायम्'—इति वि०।

[¶] 'मर्य्याः'—इति मनुष्यनामसु एकादशं नैघण्टुकम् २,३। "छन्दसि निष्टर्क्य (पा० ३,१,१२३)"—इत्यादिना सिध्यति मर्य इति।

अथ पञ्चमी ।

३ २ ३ १ २ ३ २ ३ २ ३
धर्त्तादिवःपवतेकृत्व्योरसो
१ २ ३ १ २ ३ २ ३ १ २
दक्षोदेवानामनुमाद्योनृभिः ।
१ २ ३ १उ ३ १र २र ३
हरिःसृजानोअत्योनसत्वभि
२ ३ १ २ ३ २
र्वृथापाजाꣳसिकृणषे*नदीष्वा ॥ ५ ॥ ९२ †

२ १ २ ४र
(वात्सप्रिरसो द्वे ॥) धर्त्तादाइवा३ । ओवा५ए ।
२ र १ २ ४र २ १ २
पवतेकृत्वौ३योरासा३ । ओवा५ए । दक्षोदाइवा३ ।
४र २र र १ २ ४र २
ओवा५ए । नामनुमादौ३योनभा३ । ओवा५ए । ह
१ २ ४र २र र १ २
राइःसार्जा३ । ओवा५ए । नोअतियोनां३सात्वा३भा३ ।
४र २ १ २ ४र २
ओवा५ए । वृथापांजा३ । ओवा५ए । सिकृणुषाइन
१ २ ४र ४
दाइषूवा३ । ओवा३ए । हो५इ । डा ॥ १८ ॥

---

* “कृणुते”—इति ऋग्वेदीय-पाठः ।

† उ० ५,१,१२,१ = ऋ० ७,३,१,१ = आरण्ये १,२,४—१,२,२५—१,२,२६—१,२,२७—१,२,२९ = ऊहे ४,२,१४—९,१,१६—१५,१,१५—१७,१,२०—२२,२,१६—२९,२,१९ = ऊह्ये ३,१,१०—४,१,४ ।

५ र र ४ ५ २ १ १ ३र ५
धर्त्ता औहोहोहाइ। दिवः। पवतेका। औहो३
२ ५१ १र र २ ३र ५ २
हा३। हा। त्वियोरसो। दक्षोदेवा। औहो३हा३।
२ १र २ १र २ ३र
हा। नामनुमा। दियोंनृभाइः। हराइःसार्जा। औ
५ २ २ १र २ १ र
हो३हा३। हा। नोअतियो। नसत्वभाइः। वृथापा
२ ३र ५ २ २ १ २ ३र ५ २
जा। औहो३हा३। हा। सिक्तणूषा। औहो३हा३।
२ ३ र २ १ २र ५ २ २ ५र र
हाइ। नदीषुवा। औहो३हा३। हा३४। औहोवा।
२ ३ १र २
ए३। नदीषुवा२॥ २०॥ ९२

कविर्ऋषिः*। "धर्त्ता" सर्वस्य धारकः सोमः "दिवः" अन्तरिक्षात् अन्तरिक्षस्थितादशापवित्रात् "पवते" पूयते। कीदृशः सोमः? "क्रत्वः" कर्त्तव्यः शोध्य इत्यर्थः। "रसः" रसात्मकः। "देवानां" "दक्षः†" बलप्रदः। यद्वा। दक्षः प्रवर्द्धनीयो देवाना

---

* "भार्गवः"—इति ऋति-नै०।

† 'दक्षः शोध्यः'—इति वि०। "दक्षः"—इति बलनामसु सप्तदशम्, नैघण्टुकम् २,९।

अथ षष्ठी।

१ २ २ १ २ ३ २उ:
वृषामतीनाम्पवतेविचक्षणः
२ १ २ ३ १र २र ३ २
सोमो अह्ना*प्रतरीतोषसा†न्दिवः।
३ १र २र ३ १ २ २
प्राणासिन्धूनांकलशाँ२अचिक्रद
१ १ ३.१ २ ३ १ २ ३ १ २
दिन्द्रस्यहार्द्याविशन्मनीषिभिः ॥ ६ ॥ ९३ ‡

मर्थाय। तथा "नृभिः" नेतृभिर्ऋत्विग्भिः "अनुमाद्यः" अनुमादनीयः स्तुत्यो वा। "हरिः" हरितवर्णः। "सत्वभिः" प्राणिभिः अस्मदादिभिः "सृजानः" सृज्यमानः "अत्यो न"¶ अश्व इव स यथार्भितोऽनसेन गच्छति तद्वत्। "वृथा" अप्रयत्नेन "पाजांसि" बलानि§ स्वीयान् वेगान् "कृणुते" कुरुते "नदीषु"‖ वसतीवरीषु ताभिरित्यर्थः। प्रसिक्त इत्यर्थः। अथ मभिषव-समयाभिप्रायः+ ॥ ५ ॥ ९२

---

* "अह्नः"—इति } ऋग्वेदीय पाठौ।
† "उषसो"—इति }

‡ उ० २,१,१७,१ = ऋ० ७,३,१४,४ = ऊहे २,१,१०—९,१,५—१६,१,१७ = ऊह्य ४,१,२।

¶ "अत्यः"—इति अश्व-नामसु प्रथमं नैघण्टुकम् १,१४।

§ 'पाजांसि अन्नानि'—इति वि०। "पाजः"—इत्यन्ननामसु पाठभेदेन तृतीयं नैघण्टुकम् (२,१)—बलनामसु च द्वितीयम् (२,९)।

‖ 'नदीषु रश्मिषु'—इति वि०।

+ 'योगोऽस्याष्टमेऽहनि'—इति वि०।

२ र १ २र १
(ऐडयामम् ॥) वृषामातीर३ । नापवातार३इ ।
२ २ २र र १ २ १
ए३ । विचक्षणए३ । सोभोआक्षार३म् । प्रतराईतार२
२ २ र २र र १ २र
३ । ए३ । उषसान्दिवए३ । प्राणासाइन्धूर३ । नाङ्क
१ २ २ २ १
लाशा२३ । ए३ । अचिक्रदादे३ । इन्द्रस्याहार३ ।
२ र १ २ २ र १
दियावाइआर३न् । ए३ । मनिषिभिर३४३ । ओर३४५
इ । डा ॥ २१ ॥

१ २र र १र २
(यामम् ॥) वृषामतीनाम्पव । ताइवा१इचार३४ ।
५ ३ १ १ १ १ १र २र १ २र १ २र १ २
। च । णार३४५ः । सोमोअक्षाम्पतरी । तोषा१सार३४
५ २ १ १ १ १ २र १र १र र १
म् । दि । वार३४५ः । प्राणासिन्धूनाकल । भा२
२ ५ ३ १ १ १ १ १ २ १र
आ१चार३४इ । क्र । दार३४५त् । आइन्द्रस्यहादिं
र ३ ५ १ १ १
यावि । भान्मा१ना२३४ई । पिभा२३उ । वा३४५ ॥ २२ ॥

१ १ १र र२१ २ १र
वृषा२मता२इ। नाम्पवतेविचक्षा२३णाः। सोमो
१ १ रर २१र २ १र १
२अह्ना२म्। प्रतरीतोषसान्दा२३इवाः। प्राणा२सि
१र र २१ २ १ १
न्धू२। नाङ्कलशा९अचिक्रा२३दात्। इन्द्रा२स्यहा२।
१र १ १र १ १
र्दियाविशन्मनीषा२३इभा३४३इः। ओ२३४५इ। डा॥

॥२३॥ ९३

खिगण ऋषिः*। अयं "सोमः" "पवते" अभिषूयते†। कीदृशः सोमः? "मतीनां" मतयः स्तोतारस्तेषां‡ "वृषा" वर्षकः कामानाम्। "विचक्षणः" विद्रष्टा¶ "अह्नाम्" उषसां "दिवः" द्युलोकस्यादित्यस्य वा "प्रतरीता" प्रवर्द्धयिता§। किञ्च। "सिन्धूनां" स्यन्दमानाना मुदकानां‖ "प्राणा" [प्रकर्षेण अनिति चेष्टते इति प्राणा] कर्त्ता सोमः "कलशान्" "अचिक्रदत्" धारया अध्वनयत् प्रवेष्टुम्। यद्वा। "सिन्धूनां" [तृतीयार्थे षष्ठी]

---

* "कविः भार्गवः"—इति ऋषि-नै०।

† यज्ञपात्रेषु क्षरते इत्यर्थः।

‡ "मतीनां प्रज्ञानाम्"—इति वि०। "मतयः"—इति मेधावि-नामसु च द्वात्रिंशत्तमं नैघण्टुकम् ३,१५।

¶ "विचक्षणः विविधं प्रकाशयिता सोमः"—इति वि०।

§ 'प्रतरीता प्रकर्षेण तारयिता'—इति वि०।

‖ "सिन्धवः"—इति नदीनामसु एकत्रिंशत्तमं नैघण्टुकम् १, १३।

अथ सप्तमी ।

१ २ ३१२१२
त्रिरस्मैसप्तधेनवोदुदुह्रिरे

३ २ ३ १ २ ३ १ २
सत्यामाशिरम्परमेव्योमनि ।

३ २ ३ १र २र ३ २ ३
चत्वार्यन्याभुवनानिनिर्णिजे

१ २ ३ २ ३ १र २र
चारूणिचक्रेयदृतैरवर्द्धत ॥ ७ ॥ ९४ *

१ ५र ४ ५र ४
(मरुतान्धेनुमाम ॥) चार३४इः । अस्मैसप्तधेन

५र र ४ ५ २ १र र २ र
वोदुदौ । दोहाइराइ । सत्यामाशिरम्परमाइ । वियो

सिन्धुभिरद्भिः “प्राणा” [प्रा पूरणे (अ० प०] पूर्णः “सोमः” कलशान् “अभि” लक्ष्य क्रन्दते । किं कुर्वन् ? इन्द्रस्य “हार्दि” हृदयम् “आविशन्” प्रविशन् “मनीषिभिः” मनसईशित्रीभिः स्तुतिभिः सहेति शेषः [यद्वा । व्यवहितमपि मनीषिभिरित्येतत् पवतइत्यनेन सम्बध्यते † ॥

“प्राणा”—इति, “क्राणा” ‡—इति, “अचिक्रदद्”—“अवीविशत्”-इति पाठाः ॥ ६ ॥ ९३

---

* उ० ६,२,१७,१ = ऋ० ७,२,२३,१. = जद्द ८,१,१२ ।

† ‘विनियोगोऽस्य ‘तृतीयेऽहनि’—इति वि० ।

‡ क्राणाः—इत्यस्य कुर्वाणा इत्यर्थः स्वीकृतो यास्केन न० ४, १९ ।

१ २
मानो२। चत्वार्यन्याभुवना। निर्णिणोइजा२३इ। चा
२ ५ २र१ २र १ २ ४
रूणा२३४इचा। क्रि यदृतैः। आवाइर्द्धोपूता६५६ ॥२४॥९४

रेणुऋषिः*। "अस्मै" पवमानाय "परमे" उत्कृष्टे "व्योमनि" [विविधं ओम अवनं गमनं देवाना मत्रेति]व्योमा यज्ञः तस्मिन् स्थिताय। यद्वा। परमे व्योमन्यन्तरिक्षे वर्त्तमानाय "त्रिः सप्त" एकविंशति-सङ्ख्याकाः "धेनवः" प्रीणयित्र्यो गावः "सत्याम्" यथार्थभूतं "आशिरम्" आश्रयण-साधनं चीरादि "दुदुह्रिरे" दुहन्ति [यद्वा। त्रिःसप्त=द्वादश मासाः—पञ्चर्त्तवः—त्रयइमे लोकाः—असावादित्य एकविंशइति। एतैः सर्वैः सह गोषु पय उत्पाद्यते तद्गावो दुहन्तीति]। किञ्च। अयं सोमः "अन्या" अन्यानि चत्वारि "भुवना" उदकानि वसतीवरीस्तिस्रश्चैकधना इति तानि चतुःसङ्ख्यानि† "चारूणि" कल्याणानि "निर्णिजे" निर्णेजनाय परिशोधनाय परिपोषणाय वा "चक्रे" तदा करोति। "यद्" यदा अयम् "ऋतैः" यज्ञैः "अवर्द्धत" वर्द्धितवान् तदा करोति‡।

"दुदुह्रिरे"-"दुदुह्रे"—इति, "परमे"-"पूर्व्ये"—इति च पाठः ॥ ७॥ ९४

---

* "वैश्वामित्रः"—इति ऋषि-नि०।

† वसतीवरीसञ्ज्ञाना मपा माधार एको घटः, एकधन नामकाश्च त्रयः। तत्र वसतीवरी-घटोदकेनाभिषुतसोमरसस्य वर्द्धनं भवति, एकधनघटानान्तु सोमाभिषवे उपयोगः।

‡ विनियोगोऽस्याभिहितः। अस्मै सोमाय। सप्त धेनवः सप्तच्छन्दांसि। त्रिः=प्रातःसवन-

अथाष्टमी ।

१ २   ३ १ २ ३ १ २ ३ १र
इन्द्रायसोमसुषुतःपरिस्रव
२र   ३ १ २   ३ २
अपामीवाभवतुरक्षसासह ।
३ १ २   ३ २ ३
मातेरसस्यमत्सतद्वयाविनो
१ २   ३ २ ३ १ २
द्रविणस्वन्तइहसन्त्विन्दवः ॥ ८ ॥ ९५ *

---

* उ० ७,२,१०,१।

माध्यन्दिन-तृतीयसवनेषु दुदुह्रिरे। अथवा त्रिभिः सवनैः सप्त धेनवः सप्तहोतारो वा वषट्कारिणः होता मैत्रावरुणः ब्राह्मणाच्छंसी पोता नेष्टा अच्छावाक अग्नीध्रः। एतेषां वाचः दुह्यन्ते। अथवा धेनवः दुह्यन्ते सत्या माशिरम्। आश्रयणीयं मिश्रणं वा परमे प्रकृष्टे व्योमनि स्थाने यज्ञे वा। चत्वारि अत्यग्निष्टोम उक्थ्यः षोड़शी अतिरात्रश्चतुर्थः। अथवा पृथिवी अन्तरिक्षं द्यौर्दिश इति। अथवा चत्वारो वेदाः। अथवा चत्वारो महर्त्विजः। अथवा चत्वारः समुद्राः। भुवनानि निर्णिजे चतुर्दश भुवनानि सप्त भूरादयो लोकाः सप्त पातालानि तान्यपि चारूणि चक्रे कृतवान्। केन प्रकारेण नयतः ऋतैः ऋतैः यज्ञैः सत्यैर्वा अवर्द्धत। अथवा तत् तस्मै सप्त धेनवः सप्त रश्मयः। दुदुह्रिरे। अथवा सप्ताश्वाः। अथवा सप्त पावकजिह्वाः। सप्त मातरो वा सप्त भूरादयो लोकाः। सप्त पातालानि सप्त सोमसंस्थाः सप्त समुद्राः सप्त द्वीपानि सप्त स्वराः। एता दुदुह्रिरे सप्त। आशिरम् उदकं परमे व्योमनि। चत्वारि अन्याः भुवनानि पृथिव्यादीनि चारूणि चक्रे। यत् ऋतैः यज्ञैः अवर्द्धतेत्यथवा त्रिः अस्मै सप्त धेनवः सप्त प्राणाः शीर्षण्यादिति त्रिः उत्पत्ति-स्थिति-प्रलयेषु स सत्याम् अवितथाम् आशिर ज्ञानं चत्वारि भुवनानि जाग्रत् स्वप्न सुषुप्ति-तुरीयासु अद्वैतावस्थे नित्याम् तैर्जनैः अवर्द्धत विश्वानाय"—इति वि०।

(अपामीवम॥) इन्द्रा। यसोमसुषुता३:पा३रिस्र
व। अपा। मीवाभवतुरा३क्षा३सासह। मातइ।
रसस्यमत्सता३दा३याविनः। द्रवाइ। णास्वन्तइहस।
तुवा३इन्दा५वा६५६ः॥ २५॥

(वायोरभिदः॥) इन्द्रायसोमसुषुतःपर्यौ॥ चोइस्रा
वा। अपामोवाभवतुरक्षसां१सा३ंहा। मातेरसस्यमत्स
तद्या१वी३नो। द्रा२३४वा। णा२३४स्वा। ताइहसा
३। हा२३। तुवा३इन्दा५वा६५६ः॥ २६॥ ९५

वेनोभार्गवऋषिः। हे "सोम!" त्वं "सु षुतः" सन् "इन्द्राय" तदर्थं "परिस्रव" परितो गच्छ रसं मुञ्च। "अमीवा" रोगः "रक्षसा सह" "मा ते रसस्य मत्सत द्वयाविनो द्रविणस्वन्त इह" "अप भवतु" अपगतो वियुक्तो भवतु "ते" तव "रसस्य" स्वांशं रसं पीत्वा "मा मत्सत" मा माद्यन्तु। कः? "द्वयाविनः" द्वयं सत्यानृतं तेन युक्ताः पापिन इत्यर्थः। किञ्च "इन्दवः" ते रसाः

अथ नवमी ।

१ २ ३ १ २ ३ २उ ३ २३
असाविसोमोअरुषोवृषाहरी
१ २ ३ ३ २ ३ १र २र
राजेवदस्मोअभिगाअचिक्रदत् ।
३ २उ ३ १ २ ३ १ २ ३१र
पुनानोवारमत्येष्यव्ययꣳश्येनो
१र २ १ २ ३ १ २
नयोनिङ्घृतवन्तमासदत् ॥ ९ ॥ ९६ *

२ र १ २र १
(यामानि त्रीणि ॥) असाविसो । मोअरुषो२३४ ।
५र ४ २र र १ २र १ ५ ४
वृषाहराइः । राजेवदा । स्मोअभिगा२३४: । अचिक्र
२ र १र २र १ ५ ४
दात् । पुनानोवा । रामतिया२३४इ । षिअव्ययाम् ।
२र र १ २ १ ४ ४
श्येनोनया । निङ्घृतवा२३ । तमा५सदात् । हा५इ ।
डा ॥ २७ ॥

"इह" अस्मिन्यज्ञे "द्रविणस्वन्तः" अस्माकं धनवन्त "सन्तु" भवन्तु† ॥ ८ ॥ ९५

---

* उ० ५,९,१३,१ = ऋ० ७,३,७,१ = ऊहे ५,२,६—८,१,२—१९,२,४—२१,२, १७—२३,२,१० = ऊह्ये १,२,८ ।

† 'रसवन्तो भवन्तु देवानां न तु राक्षसादीनाम्'—इति वि० ।

२ २ १ १ ३ ५ २र १र २
आसावी२३४सो। मोअरु२३४षाः। वार्षाहराये
२ ३ ५ २ ३ ५ २र १
३ः। राजिवा२३४दा। स्मोअभी२३४गाः। आँचिक्रदा
१ ३ ५ २ ३ ५ २र १
२३त्। पूनानो२३४वा। रामाती२३४ये। पौअव्यया
२ ३ ५ २ ३ ५ ३ २
२३म्। श्येनोना२३४यो। निङ्घात्ता२३४वा। तमा३।
१ ३ ५र र २ ५ १ १ १ १
सा२दा२३४औ होवा। दे३। दिवी२३४५॥ २८॥

४ ५र ४र ५र ४र ५र ४ र ५र ४र
असाविसोमोअरुषोवृषाह। राङ्। राजेवदस्मो
५ ४ र ५ ४ ५ र ४र र ५ ४ ५र ४
अभिगाअचिक्र। दात्। पुनानोवारमत्येष्यव्य। याम्।
५र ४र र ५ ४ ३ २ १ ३ ५र
श्येनोनयोनिङ्घृत। वां। तमा२। सार्दा३३४औ
र २ १ १ १ १ १
होवा। ए३। दिवी२३४५॥ २९॥ ९६

भरद्वाजो वसु ऋषिः। "सोमः" "असावि" अभिपुतोऽभूत्। कीदृशः सोमः? "अरुषः" आरोचमानः* "वृषा" वर्षकः "हरिः"

---

* 'अरुषः आरोचमितः'—इति वि०। "अरुषम्"—इति रूपनामसु पञ्चदशं नैघण्टुकम् ३,७।

अथ दशमी ।

२ २उ ३ १२ ३२ ३१
प्रदेवमच्छामधुमन्तइन्दवो
१ २ २३ २उ ३१२
सिष्यदन्तगावआनधेनवः ।
३ १२ २१२ ३१२
बर्हिषदोवचनवन्तऊधभिः
३ १२ ३ १२ ३ १२
परिस्रुतमुस्रियानिर्णिजन्धिरे ॥ १० ॥ ९७*

हरितवर्णः† । स च "राजेव" "दस्मः" दर्शनीयः सन् "गाः" उदकानि‡ "अभि" लक्ष्य "अचिक्रदत्" शब्दङ्करोति स्व-रस-निर्गम-समये । पश्चात् "पुनानः" पूयमानः "अव्यम्" अविभवं "वारं" वालं पवित्रम् "अत्येषि"¶ हे सोम ! अतिक्रम्य गच्छसि । ततः "श्येनो न" श्येन इव "योनिं" स्वीयं स्थानं "घृतवन्तम्" उदकवन्तम् § "आसदत्" वसतीवरीष्वासीदतीत्यर्थः ‖ ॥

"अत्येषि"-"पर्येति"—इति, "आसदत्"-"आसदम्"—इति च पाठः ॥ ९ ॥ ९६

---

* ऋ० ७,२,१९,१ ।

† 'हरिः हरणशीलः'—इति वि० ।

‡ इह मानं मृग्यम् ।

¶ 'अत्येषि अत्येति व्यत्ययेन'—इति वि० ।

§ "घृतम्"—इति उदकनामसु दशमं नैघण्टुकम् ११२।

‖ 'विनियोगोऽस्य नवमेऽहनि'—इति वि० ।

४ ५ २ १ २र १ २
(मरुतान्धेनु॥) प्रादे। वमच्छामधुम। न्तआ२-
१ २ ३ ५ २ १र २र
इन्दवाः। आसिष्या२३४दा। तगावआ। नधा२इन
१ २ ३ ५ २ १र ५ र १
वाः। बर्हिषा२३४दाः। वत्सावा२। तऊ२धभाइः।
२ ३ ५ २ १ र २
परिस्रु२३४ताम्। उस्रियानिर्णिजन्धाइरायेर। धाइ
२ ५र र २ १ १ १ १ १
रा३४औहोवा। धा३इरा२३३५इ॥ ३०॥ ९७

वत्स ऋषिः*। "मधुमन्तः" मदकर-रस-युक्ताः "इन्दवः" सोमाः "देवं" द्योतमानं सोमात्मकम् इन्द्रम् "अच्छ" प्रति "प्रासिष्यदन्त" परिस्यन्दन्ते ग्रहादिषु† प्रचरन्ति। [स्यन्दतेर्ण्यन्तस्य लुङि चङि रूपम्] तत्र दृष्टान्तः। "गाव आ न धेनवः" पयस्विन्यः प्रीणयित्र्यः गावो यथा वत्सं प्रति पयांसि प्रस्रवन्ति

---

* "वत्सप्रीः भालन्दनः"—इति ऋषि-नि०।

† यज्ञीयदेवानुद्दिश्य ग्रहणयोग्यत्वात् सोमा तदाधारत्वात्तदीयचतुरद्रघटादयोऽपि ग्रहा उच्यन्ते। ते च प्रातःसवने, पञ्चविंशति-सङ्ख्यका भवन्ति। तथाहि—१उपांशुः—२अन्तर्यामः—३ऐन्द्रवायवः—४ मैत्रावरुणः—५ आश्विनः—६ शुक्रः—७ मन्थी—८ आग्रयणः— ९उक्थ्यः— १०ध्रुवः—११-२३ऋतुग्रहाश्च त्रयोदश—२४ऐन्द्राग्नः—२५वैश्वदेवश्चेति। माध्यन्दिनसवने चत्वारि—तत्र, मरुत्वतीयास्त्रयो माहेन्द्रश्च चतुर्थः। तृतीयसवने तु पञ्च, तद्यथा—१आदित्यः—२सावित्रः—३महावैश्वदेवः—४पात्नीवतः—५हारियोजनश्चेति।—इत्येव सङ्कलनया ग्रहास्त्रिंशदिति।

अथैकादशी ॥

१ २·३क२र ३ १ २ ३
अञ्जतेव्यञ्जतेसमञ्जते
१ २. ३ २ ३क २र
क्रतुꣳरिहन्तिमध्वाभ्यञ्जते।
१ २ ३ २·३ १ २ ३ १ २
सिन्धोरुच्छ्वासेपतयन्तमुक्षणꣳ
३ २ ३ २ ३ १ २
हिरण्यपावाःपशुमप्सुगृभ्णते ॥ ११ ॥ ९८ *

२ १ २ १ २
(भार्गाणि त्रीणि ॥१) अञ्जताइ। वियञ्जताइ। सम
१ १ २र १ २ १
ञ्जाता२इ। क्रतुꣳरिहा। तीमधुवा। भियञ्जाता

तद्वत्। किञ्च। "बर्हिषदः" बर्हिषि सीदत। "वचनवन्तः" हम्भा-रवादि-शब्दवन्तः [उस्रियेति गोनाम †] तादृश्यो गावः ऊधभिः पयआधारकैः स्वैः स्वैरूधोभिः तेभ्यः "परिस्रुत" परितः स्रवणशीलं "निर्णिजं" शुद्धं पयोभूतं सोमरसं "धिरे" दधिरे इन्द्रार्थं धारयन्ति ॥ १० ॥ ९७

---

* उ० ७,२,११,१ = ऋ० ७,३,२०,३ = ऊहे १२,१,१७।

† "उस्रिया"—इति गोनामसु तृतीयं नैघण्टुकम् २.११।

र १ २र १ २ १
२इ । सिन्धोरुच्छ्वा । सेपतया । तमुक्षाणा२म् । हिर
१ १र १ २र १ २ १ १ १ १
ण्यपा । वाःपशुमा । प्सुगृभ्णता३१उवा२३४५ ॥ ३१ ॥

३ २ १ २ १ २ ४ २ ३ ५
अञ्जा३हो । ते३होइ । वियञ्जते२सा३मञ्जताइ ।
३ २ १ ३ २ १ २ ४ २ ३ ५
क्रतू३ꣳहोइ । रिहा३हो । तिमधुवा२भी३अञ्जताइ ।
३ २ १ ३ २ १ १र ४ ३ ३ ५
सिन्धो३होइ । उच्छ्वा३हो । सेपतया३न्ता३मुक्षणाम् ।
३ २ १ ३ २ १ २र ३ २ ४
हिरा३हो । ण्यपा३हो । वाःपशुम् । प्सुगा३भ्णा५
ता६५ईइ ॥ ३२ ॥

५ ५ १ ३ ४ ५ र ३ ४ ५ र १ ३ २
हावाञ्जा । तार३४इ । वियञ्जतेसमञ्जते । एहिया ।
१ २ २ ५ १ ३ ४ र ५
एहिया३४ । हाउक्रातुम् । रार३४इ । हान्तिमधुवाभि
४ ५ र १ ३ २ १ ३ २ ५ १
यञ्जते । एहिया । एहिया३४ । हाउसाइन्धोः । ऊ२
३र र ४ ३ ४ ५ १ ३ २ १ ३ २
३४त् । श्वासेपतयन्तमुक्षणाम् । एहिया । एहिया३४ ।

अथ द्वादशी।

२ १ १ २ १ २
पवित्रन्ते विततम्ब्रह्मणस्पते
३ १र २र ३ १ २ ३ १ २
प्रभुर्गात्राणिपर्य्येषिविश्वतः।

५ १ र ३र ४ ३ ४ ३ ४ ५ र १ २
हाउहाइरा। ण्या२३४। पावाःपशुमप्सुगृभ्णते। एहि
१ १ ३ २ ५ ४
या। एहिया३४। हाउ। वा५इ। डा॥ २२॥ ९८

'अत्रिऋषिः*। सोमम् ऋत्विजः "अञ्जते" गोभिः तथा "व्यञ्जते" विविधमञ्जति "समञ्जते" सम्यगञ्जति। स्तुत्यर्थत्वादपुनरुक्तिः † तथा "क्रतु" बलकर्त्तारं "रिहन्ति" लिहन्ति आस्वादयन्ति देवाः तथा पुनः "मध्वा" मधुना गव्येनाभ्यञ्जते। तमेव सोमं "सिन्धोः" उदकस्य रसस्याधारभूते "उच्छ्वासे" उच्छ्रिते देशे "पतयन्तं" गच्छन्तं [पतॢ गतावित्यस्मात् स्वार्थिके णिचि वृद्ध्यभावश्छान्दसः] "उक्षणं" सेक्तारम् "हिरण्यपावाः" हिरण्येन पुनन्तः "पशु" द्रष्टारं ‡ [पशुः पश्यतेरिति निरुक्तम्] "अप्सु" वसतीवरीषु "गृभ्णते" गृह्णन्ति ¶॥

"मध्वा"--"मधुना"—इति, "अप्सु"--"आप्सु"—इति च पाठः॥ ११॥ ९८

---

* "भौमः"—इति ऋषि-नि०।

‡ पुनरुक्तिदोषो नेति भावः।

† 'पशुं सोमम्'—इति वि०।

¶ 'विनियोग उपसद्ये प्रवर्ग्ये च'—इति वि०।

१ २ ३ २उ ३ १ २
अतप्ततनून्नु तदामोअश्नुते
३ २ ३ १र २ १ १र २र
शृतासइद्वहन्तःसन्तदाशत ॥ १२ ॥ ९९ *

॥ द्वितीय-दशति ॥

२ १ २र १ २ १ २ १
(अर्कपुष्पम् ॥) पवित्रन्ते विततम्ब्रह्मणस्पते३ । ऊवे
१ २ २ २ १ र २र १ ०र
२३ । २ । होवा३हा३ । हाइ । प्रभुर्गात्राणिपर्येषि
१ १ १ २ २ २ १
विश्वता२३ः । ऊवे२३ । २ । होवा३हा३ । हाइ । अत
२ र १ ऽर १र ३ १ १ २ २ २
प्ततनूर्मतदा२मोअश्नुते३ । ऊवे२३ । २ । होवा३हा३हा
१र २ १ २ १ ऽर १ १
इ । शृतासइद्वहन्तःसन्तदा२शत । ऊवे२३ । २ । हो
२ २ २ ५र र २ १र र र ऽ१ १र
वा३हा३ । हा३४ । औहोवा । अर्कोदेवाना२म्परमेवि
ऽर ३ १ १ १ १
यो२मा२३४५न् ॥ ३४ ॥

२ १ २र १ २ १ २
(अर्कपुष्पोत्तरम् ॥) पवित्रन्तेविततम्ब्रह्मणस्पते३ ।

---

* उ० २,२,१६,१ = ऋ० ७,३,८,१ = आरण्ये १,१,११—१,१,१२—ऊहे ७,२,१ -७,२,१—१५,१,१ = ऊह्ये १,१,८—४,१,३ ।

१ २र १ र १र १ २र १
ऊवाइ। औहोवा२। प्रभुगात्राणिपरियेषिविश्वता२३ः।
१ २र १ १ २ र१ ५र १र २ १
ऊवाइ। औहोवा२। अतप्ततनूर्नतदा२मोअश्नुते३। ऊ
२र १ १र २१ २ १ ५र
वाइ। औहोवा२। शृतासइद्वहन्तःसन्तदा२शत।
१ २र १ ३ ५र र २ १ २
ऊवाइ। औ। हो२। वा२३४। औहोवा। अर्कस्य
र १र २ १र ५र ३ १ १ १ १
देवाःपरमेवियो२मा२३४५न् ॥ ३५ ॥ ९९

॥ इति ग्रामे गेये षोड़शः प्रपाठकः ॥

पवित्रऋषिः*। हे “ब्रह्मणस्पते” मन्त्रस्य स्वामिन्! सोम! “ते” “पवित्रं” शोभन मङ्ग “विततं” सर्वत्र विस्तृतम्। स “प्रभुः” प्रभविता त्वं “गात्राणि” पातुरङ्गानि “पर्येषि” परिगच्छसि। “विश्वतः” सर्वतः तव तत्पवित्रम् “अतप्ततनूः” पयोव्रतादिना असन्तप्तगात्रः† “आमः” अपरिपक्वः “नाश्नुते” न व्याप्नोति। “शृतासः‡ इत्” शृताएव परिपक्वाएव “वहन्तः” यागं निर्वहन्तः तत् पवित्रं “समाशत” व्याप्नुवन्ति¶॥

---

* “आङ्गिरसः”—इति ऋषि-नै०।

† ‘अतप्तशरीरः मुक्तैरपि छिद्रैः दशापवित्रस्य’—इत्यादि वि०।

‡ ‘शृतासः निष्पन्न-सोमाः’—इति वि०।

¶ ‘व्याप्नुवन्ति द्रोणकलशम्’—इति वि०।

"सन्तदाशत"-"ततसमासत"—इति पाठौ* ॥ ६ ॥ ९९

इति श्रीमत्सायणाचार्य्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे
छन्दोव्याख्याने पञ्चमस्याध्यायस्य नवमः खण्डः ॥

॥ इति जागतम् ॥

* * *

इन्द्रमच्छेतिखण्डेऽस्मिन् ऋचो द्वादश संस्थिताः।
सकला उष्णिहस्तत्र वक्ष्यन्ते ऋषयः पृथक् ॥

तत्र दशमे खण्डे—

सैषा प्रथमा।

२ ३ १ २ ३ २ ३ १र २र   ३ १ २
इन्द्रमच्छसुताइमेवृषणंयन्तुहरयः।
३ २ ३ २ ३ १ २ ३ १ २
श्रुष्टे†जातासइन्दवःस्वर्विदः॥ १ ॥ १०० ‡

५ २ १ २ २र ५
(पदे द्वे ॥) इन्द्रमच्छा। सुताइमा। औहो२३४वा।

---

[*] तप्तमुद्राधारिणां वैष्णवसम्प्रदाय-विशेषाणां मतेऽयमेव मन्त्रः शरीरे तप्त-चक्राङ्कनस्य; तथाच "अतप्ततनूः" शङ्खचक्रादिभिः न तप्ता तनूः यस्य स पुरुषः "आमः" अपरिपक्वः असंस्कृतः अतएव "तत्" प्रसिद्धं कैवल्यं "न अश्नुते" इत्यर्थः। वस्तुतोऽस्य विनियोगो ज्योतिष्टोम-तृतीयेऽहनि।

† "श्रुष्टी"—ऋ०।

‡ उ० १,१,१७,१ = ऋ० ७,५,९,१ = ऊहे १,१,१०—२,६,७—६,१,१७—६,२,८—९,१,२०—१०,१,१६—१०,२,१—१२,१,१०—१३,१,१—१३,१,१०—१४,१,११—१४,१,१७।

१ २ १ ७ २ ३र ५ २ १ २र १
वृषणंय। तूहरया। औहो२३४वा। प्रुष्टाइजाता।

२ ३ २ १ २ १ २ १
सइन्दवाः। सुववो२३इदा३४३ः। ओ२३४५इ। डा॥१॥

५ २ १ २ १ २ २ १
इन्द्रमच्छा। सुताइमा३इ। ताइ३माइ। वृ

२ १ ७ १ २ २ र र ऽर १
षणंय। तूहरया२ः। हारा३याः। अष्टे जाता३सा

७ १ २ २ १ २ ५र र
इन्दवा२ः। आइन्दा३वा३ः। सुवरा३४। औहोवा।

२ र १ १ १ १ १
विदोवौ३दा२३४५ः॥ २ ॥

४ ५ ४ २ १ २
(अनुपदे द्वे॥) इन्द्रम्। इन्द्राम्। अच्छा३सुता

१ १ २ १ ० १
१इमे२। आइमे२। वृषणंय। तूहरया२ः। राया

र र ऽर ७ १ १ २
२ः। अष्टेजाता३साइन्दवा१ः। दावा२३ः। सुवरा

५र र २ १ १ १ १ १
३४। औहोवा। विदो३विदा२३४५ः॥ ३ ॥

३ ४ ३ ४ ३र ४ ३र ४ ५ २ २ २ ६
इन्द्रमच्छसुताइमेवृषणंयन्तुहा। हो३४३। रयाभा

अथ द्वितीया।

१२　　３१ २ ३१ २　　२१ २
प्रधन्वासोमजागृविरिन्द्रायेन्दोपरिस्रव।
३ १ ३　२ ३ १ २　३ १ २
द्युमन्तꣳशुष्ममाभरस्वर्विदम् ॥ २ ॥ १०१*

१ २　　१ २　　३ ४ ५　　२
अृष्टाउवा। जाताउवा३४। सइन्दवःसुवा। हो।
२ २
विदश्रो२३४५इ। डा ॥ ४ ॥

२ १ २　४ ५　　१ २　　५
(पौष्कलम् ॥ इन्द्रमा३च्छसु। तांइ२३४माइ।
२ १ २ १　　२ ३　　५　　२ १ २　　०
वृषाणंया। तूह्वांरा२३४याः। अुष्टाइजाता। सइ२
３　　２ १ ३ १ १ १ १ १
न्दा२३४५वाई५६ः। सुवर्विदा२३४५ः ॥ ५ ॥ १००

अग्निश्चाक्षुषऋषिः। "अुष्टे" अुष्टौ क्षिप्रं "जातासः" जाताः "इन्दवः" पात्रेषु चरन्त; "स्वर्विदः" सर्वज्ञाः † - "हरयः" हरितवर्णाः "सुताः" अभिषुताः "इमे" सोमाः "वृषणं" कामानां सेक्तारमिन्द्रम् "अच्छ यन्तु" अभि गच्छन्तु ॥ १ ॥ १००

---

* ऋ० ७,५,९,४ = ऊहे ११,२,१।

† 'स्वर्विदः स्वर्गं लोकं विदन्ति'—इति वि०।

२ १र र
(ऐषिराणि पञ्च ॥) प्रधन्वासौहोइ। औ३हो२३४
५ २ १र २ र १र र २ ५
वा। मजागृविः। इन्द्रायेन्दौहोइ। औ३हो२३४वा।
१ २ १ र २ ५ १ १र
परिस्रव। द्युमन्तꣳशौहोइ। औ३हो२३४वा। ष्ममा
२ १र २ २
भर। सुवर्विदौहोइ। औ३हो२३४५वा६५६। ऊ२३
५
४पा ॥ ६ ॥

२ १र र २ १ २ र १ र १र
प्रधन्वासौहो। वा३हो। मजागृवौ२ः। इन्द्राये
र २ १ २ १ १ र
न्दौहो। वा३होइ। परिस्रावा२। द्युमन्तꣳशौहो।
२ १ २ र १ १र २ १
वा३हो। ष्ममाभारा२। सुवर्विदौहो। वा३हो२।
२ ५र र ३ ५
वा२३४औहोवा। ऊ२३४पा ॥ ७ ॥

२र १र १ १ र १र २ र १
औहौहोइ। प्रधन्वासो२। औहौहो। मजागृ
वौ२ः। औहौहोइ। इन्द्रायाइन्दा२। औहौहोइ।
२ १ र १र २ १ र १र
परिस्रावा२। औहौहोइ। द्युमन्ताꣳशू२। औहौहो।

२ र १ र १र २ २ ३
ष्ममाभारा२। औहोहोइ। सुवः। वा२इ। दा२३४।
५र र ५
औहोवा। ऊ२३४पा॥ ८॥

१ १ १ १ र १
ऊवा२इ। ऊवा२इ। हुवा२३होयि। प्रधन्वासो
र १ र १ १
२। मजागृवी२ः। इन्द्रायाइन्दा२। परिस्रावा२।
१ र १ १
द्युमन्ताꣳस्तु२। ष्ममाभारा२। सुवर्वाइदा२म्।
१ १ १ १ ३ ५र र
हुवा२इ। हुवा२इ। हुवा२३होर२। वा२३४औहोवा।
ऊ२३४पा॥ ९॥

१ १ ४र ५र
प्रधन्वा२३सोमजागृवीः। इन्द्रा२या२३४इन्दो। ओइ।
२ १ २ २ १ ३ ५ १ ७
पा३राइस्रा३वा। द्युमा२न्ता२३४ꣳस्तुः। ओ। ष्ममा
२ १ १ १ १ १
भा२३४५रा६५६। सुवर्विदा२३४५म्॥ १०॥ १०१

चक्षुर्मानवऋषिः। हे "सोम!" "जागृविः" जागरणशीलस्त्व "प्रधन्व" प्रचर। हे "इन्दो" सोम! "इन्द्राय" "परि

अथ तृतीया।

१ २ ३ १ २ ३ २ ३ १ २
सखायआनिषीदतपुनानायप्रगायत।
३ २ ३ १र २र ३ २
शिशुन्नयज्ञैःपरिभूषतश्रिये ॥ ३ ॥ १०२*

२ ३र १ १र
(श्रौक्तानि पञ्च ॥) सखा३याआ२। निषीदता।
र २ १र २ र ३
पुनाना२३या। प्रगायता। शिशुन्ना२३या। यज्ञैःपरा
१ २ १
इभू२। षताआ२३या३४३इ। ओ२३४५इ। डा॥ ११ ॥
४ ५ ४ ५ २ ३ ५ १ ३ ५
साखायाआ। निषीदा२३४ता। पुना२ना२३४या।
१ ३ ५र र ३ ५ २ १ २ १ २र ३
प्रा२गा२३४औहोवा। या२३४ता। शिशून्नया। यज्ञैःप
२ १ १ ३ ५र र २
रिभू२३। षा२ता२३४औहोवा। श्रिये१ ॥ १२ ॥

स्रव” परितः पात्रेषु चर। किञ्च “द्युमन्तं” दीप्ति-युक्तम् †। “स्वर्विदं” सर्वस्य लम्भकं “शुष्म” शत्रूणां शोषकं बलम् ‡ “आभर” आहर ॥ २ ॥ १०१

* उ० ४,२,९,१ = ऋ०७,५,७,१ = ऊह २,२,१—४,१,२—७,१,१८—७,१,१९-९,१,१८—१४,१,२५।

† “द्युमत्”—इति दीप्तिकर्मसु अन्तिमं नैघण्टुकम् १,१६।

‡ “शुष्मम्”—इति बलनामसु एकादशं नैघण्टुकम् २,९।

४ ५र ४र　५र ५　१ र १र र
सखायआनि। षीदाईता। पुनानायप्रगायाता।
र　१र २　१ २
शिशुन्नयज्ञैःपरा२इ। भूषा२३ता३। आ२३र्यां३४३इ।
१
ओ२३४५इ। डा॥ १३॥

५र र　४ ५र ४र　५र　५ १ र १र
ओहाइ। सखायआनि। षीदाईतां। पुनानौहाइ।
२र १र ५　४ ५ ४　२र १ र　२र १ र २
पुनानौहोयि३। यापायापा। गायतौहोइ। गायतौहोयि३।
४ ५ ४ ५　२ १ र　२ १ र　२　४ ५
शाइशू२शाइशूम्। नयज्ञौहोइ। नयज्ञौहोये३। पारी।
३ १　५र र　२　२र　३ २
परा३४औहोवा। ए३। भूषतश्रिये१॥ १४॥

५ र　३ २ ३　५ २ १　२ २　५
सखा। यआओ२३४वा। निषाइ। दाताओ२३४वा।
१ र १र ५र　१ २ ३　५　१ र
पुनानायप्रगा२यत। शाइशाओ२२४वा। नुयज्ञैःपरि।
२　१ १ ३　५　२
भू३। षाताओ२३४वा। श्रिये१॥ १५॥ १०२

पर्वतनारदावृषी*। हे "सखायः" सखिभूताः! "स्तोतारः"

---

* पर्वतो देवः काश्यपिः, नारदश्च, शिखण्डी अप्सरसः इति ऋषि-गेय-लभ्यः।

अथ चतुर्थी ।

१ २ ३ १ २ ३ २ २ १ २
तंवःसखायोमदायपुनानमभिगायत ।
३ २ ३ १ २ ३ १ २
शिशुन्नहव्यैःस्वदयन्तगूर्त्तिभिः ॥ ४ ॥ १०३ *

३
(कार्णश्रवसानि त्रीणि ॥) ता२३४०वः । सा२३४
५ २र १ २ १ र २ १र २
खा । योमदा२३या । पूनानम । भिगाया२३ता ।
१ २ १ २ ३र २ १ २ ३र २ १
शाइशुन्नह । व्यःस्वदया२३ । तङ्गूर्त्तिभा३४३इ । ओ२
३४५इ । डा ॥ १६ ॥

ऋत्विजः "आ नि षीदत" स्तोतु मुपविशत । अथ "पुनानाय" पूयमानाय सोमस्य "प्रगायत" प्रकर्षेण गायत तमभिष्टुत ततः अभिषुतं सोमं "यज्ञैः" यजनीयैः हविर्भिः मिश्रितैः "श्रिये" शोभार्थं "परिभूषत" परितोऽलङ्कुरुत । तत्र दृष्टान्तः—"शिशुं न" यथा शिशुं बालं पुत्रं पितरः † आभरणैरलङ्कुर्वन्ति तद्वत् ॥ ३ ॥ १०२

---

* उ० ४,१,१९,१ = ऋ० ५,८,१ = ऊहे ३,२,१२—८,१,१०—८,१,११—९,२,२०—१८,१,२ ।

† 'मातरः'—इति वि० ।

२ ३ ४ ५ २र १ २ २ ५ १ र
ओ३इतंवःसखा। योम। दायाओ२३४वा। पुना

ऽ २ ३ ५ ३ १ ३ ५
नमभिगा३। आ। ओ२३४वा। यताओ२३४वा।

१ २ १ २ १र २ २ ३ ५ ३ २
शिशुन्नह्न। व्यैःस्वदया३। अर। ओ२३४वा। तगा

३ ५ र ५
ओ२३४वा। तीर३४भीः॥ १७॥

५ र र ५ २ र १ ऽर १
तंवःसखायोमदा६या। पुनानमभिगा२यत। शा

७ २ ४र ५ ३ १ १ ४ २
इशुन्नह्वा३। व्यैःस्व। दया३। ता२३गू३। ता३४५इ

५
भो६ह्वाइ॥ १८॥ १०३

पर्वतनारदावृषी। हे "सखायः!" ऋत्विजः "वः" यूयं "मदाय" देवानां मदार्थं "पुनानं" पूयमानं "तं" सोमम् "अभिगायत" अभिष्टुत। तमिमं सोमं "शिशुं न" शिशुमिवालङ्कारैः क्षीरादिभिश्चालङ्कुर्वन्ति तद्वत्। "हव्यैः" हविर्भिर्मिश्रयणैः "गूर्त्तिभिः" स्तुतिभिश्च *"स्वदयन्त" स्वादूकुरुत।

"हव्यैः"-"यज्ञैः"—इति पाठौ॥ ४॥ १०३

---

* गूर्त्तिभिरिति अर्चति-कर्मणो (नै०३,१४) गूर्धयते रूपमिदम् भाष्यकारस्य। 'गूर्त्तिभिः उद्यमानै रत्नै र्धनैर्वा'—इति वि०।

अथ पञ्चमी ।

३ १र २र ३ १ २ ३ २ ३ २ ३ १ २
प्राणाशिशुर्म्महीनाᳩहिन्वन्नृतस्यदीधितिम् ।
३ १ २ ३ १ २ ३ १ २ ३ २
विश्वापरिप्रियाभुवदधद्विता ॥ ५ ॥ १०४*

४ ५ ३ ५ २ २
(वाचः सामनी द्वे ॥) प्राणा । शा३३४इश: । मह्वा
५ १ ३ ५ २ १ २ २
२३४इनाम् । हिन्वा२ना२३४त्ता । स्या३दाइधी३तीम् ।
१ २र १ २ ३र २ १ २ ३ २ १
वाइश्वापरि । प्रियाभुवा२३त् । अधद्विता३४३ । ओ२३
४५इ । डा ॥ १९ ॥

४ ५ ४ ५ १ १ ६ २
प्राणाप्राणा । शाइशु २:शाइशू२: । मह्वा३१उवाये३ ।
१ १ १ १ २ १ २ २
ना२३४५म् । हिन्वन्नार्त्तस्यदा३१उवाये३ । धी२३४
५ १ र २ ५ २
तीम् । विश्वापारिप्रिया३१उवा२३ । भू२३४वात् । अधौ
१ २ १ ३ ५र र
२ । द्वौ२ । ऊवाये३ । द्वा२इता२३४औहोवा ।
२ ५
ऊ३२३४पा ॥ २० ॥

---

* उ० २,२.१८,१ = ऋ० ७,५,५,१—काठ० ३,१,१२,—४,१,२—७,१,१०—७,२,२१—९,१,१४—६,२,२—१२,२,५—१५,२,८—१६,२,८ ।

४र ५र ४ २ १ र
(इन्द्रसामनी द्वे ॥) प्राणाशिशूः। महाऽ२इनाम्।
र ५ १ र २ १ २
औहो३वा। हिन्वन्नतस्यदीधितिम्। वाइश्वाउवा।
१ २ १ ३ २ २ २
प्राराउवा। प्रिया२भुवत्। अधाउवा३। ए३। हिता१
॥ २१ ॥

५र र २ ४ ५ १ २ १
प्राणा। हो३इ। इयाहाइ। शाइशुमहाइ। ना
२र ३ २र ३ ऽ २ १ र
२३म्। आउहाउ। हो३वा। हिन्वन्नृतस्यदीधिता
२र ३ २र २ ऽ २ १ र २इ १र २ ३
इम्। आउहाउ। हो३वा। विश्वापा। यौउहाउ।
ऽ २ १ १ ३ ५र र १ २ ३
हो३वा। प्रिया२३। भू२वा२३४औहोवा। अर्धहि
२
ता१ ॥ २२ ॥

४र र ३ २ २ ५
(मरुतां प्रेङ्खम्॥) प्राणा। हहोइ। शा२३४इशूः।
३ २ २ १र १ २ १ २ ५
हहो३इ। महोना२३म्। होवा३होये३४। हिन्वन्।
३ २ ३ ५ ३ २ २ १र
हहोइ। आ२३४र्ता। हहो३। स्यदीधिता२३इम्।

१ २ १ २ ५ र २ १ २ ५ १ २
होवा३होयि३४। विश्वा। हवोइ। पार३४री। हवो

२ १ २ १
३इ। प्रियाभूवार३त्। होवा३होये३। आर२३धा३।

२ ५
हा३४५इतोईहाइ॥ २३॥ १०४

त्रितऋषिः* ; "प्राणा" यज्ञं कुर्वाणा इत्यर्थः †। "महीनां" महतीनां मंहनीयानां वा अपां ‡ "शिशुः" स्थानीयः सोमः ¶ "ऋतस्य" यज्ञस्य "दीधितिं" दीप्तिमन्तं प्रकाशकं वा स्वीयं रसम् "हिन्वन्" प्रेरयन् §। "विश्वा" सर्वाणि "प्रिया" प्रियाणि हवींषि "परि भुवत्" परिभवति व्याप्नोति। अपि च "द्विता" द्विधा भवति ||। दिवि पृथिव्यां च वर्त्तत इत्यर्थः। +

"प्राणा"-"क्राणा"—इति पाठः॥ ५॥ १०४

---

* "आप्त्यः"—इति ऋषि-नै०।

† भाष्यकारस्तु क्राणाइति ऋग्वेदीयपाठमनुसृत्यैवं व्याख्यातवान्; तथाच यास्कः —"गोभिः क्राणा अनूषत—गोभिः कुर्वाणा अस्तोषत"—इति ४,१९। सामवेदीय-पाठस्तु प्राणाइति अतएव 'प्राणभूताः'—इति विवरण-व्याख्यानम्।

‡ 'गवाम्'—इति वि०।

¶ 'शिशुः शंसनीयः'—इति वि०।

§ 'व्याप्नुवन्'—इति वि०।

|| 'द्वैमवर्णा सोमदेवता एव'—इति वि०।

+ 'विनियोगोऽस्य षष्ठेऽहनि'—इति वि०।

अथ षष्ठी।

१.२ ३ १ २ ३ २ ३ १ २ ३ १ २
पवस्वदेववीतयइन्दोधाराभिरोजसा।
२ ३ १ २
आकलशम्मधुमांत्सोमनःसदः॥ ६ ॥ १०५*

१ ३ २ ३ ५
(प्राजापत्ये द्वे ॥) पवस्वदारेंइ। ववीतार२३४याइ।
१ र र ३ २ ३ ५ १र
आइन्दोधारा२। भिरोजा२३४सा। आकालशाम्।
२ ३ ५ १ २र१ ४ ४
माधूमा२३४०त्सो। मनएमाना२३ः। सदा५ए। हो५
इ। डा॥ २४॥

५ २ १र र २ र
पवस्वदा। ववीतयाइ। इन्दोधा२३रा३४। भिरो
५ ५ १ २ २ १ १ २ २
जसा६ए। आका३ह्वा। लाशा२म्। माध३ह्वाइ।
१ २ १ ५ ४ ५
मांत्सो२३। मनो२३४वां। सा५दो५हाइ॥ २५॥ १०५

मनुर्ऋषिः †। हे "इन्दो" सोम! "देववीतये" देवानां भक्ष-

---

* उ० ५,२,१७,१ = ऋ० ७,५,१०,५ = ऋग्वे० ५,२,१७—१६,२,१९—९,६,४—२४,१,१३।

† "आप्सवः"—इति ऋषिर्नै०।

अथ सप्तमी ।

१ २ ३ २३ २र ३ २१ १ २
सोमः पुनानऊर्म्मिणाव्यंवारंविधावति ।
१ २ ३ १र२र४ ३ १ २
अग्रेवाचःपवमानःकनिक्रदत् ॥ ७ ॥ १०६ *

५र २ र १ २
(सुज्ञाने द्वे ॥) सोमःपुना । नऊर्मिणा । अव्यं
१ र १ २ र १ १
वारा२म । विधावताइ । अग्रेवाचा २ः । पव । मार
३ ५र र १ २ र १ ३ ११११
२ना२३४औहोवा । कनिक्रददे३पा२३४५ ॥ २६ ॥
५र २.र १ २ १ ३ ५र
सोमःपुना । नऊर्मिणावा३ । ओ२ । वा२३४ । औ
र १ र २र ३ १ १ २ १
होवा । अव्यंवारंविधावति । अग्रे३ । होवा३ । हो

णाय "ओजसा" बलेन "धाराभिः" आत्मीयाभिः "पवस्व" क्षर । हे "सोम" "मधुमान्" मदकररसवांस्त्वं "नः" अस्मदीयं "कलशं" द्रोणाख्यम् "आसद" आसीद । [सदेर्लिङ्रूपम् † ॥ ६ ॥ १०५

उ० ३,१,१८,१=ऋ० ९,५,१०,५=ऊह्ये २,२,१७—७,२,९—९,३,४—१५,२,११।

† 'विनियोगोऽस्य नवमेऽहनि'—इति वि० ।

३ ५र र २र १ १र ३ २
२। वार२३४। औहोवा। वाचःपवमानः। कमा३।
१ २ १ ३ ५र र ३ ५
होवा३। हो२।: वार२३४। औहोवा। क्रा२३४दात्॥२७॥

४र ५ र ४ १ र
(द्यौते द्वे ॥) सोमःपुनानऊ। मिणा। अव्यवार-
३ १र २ १ र र २ १ र २ ४ ५
विधावार३ती। अग्रेवाचाः। पवमानाः। का३निक्र।
२ १ १ १ १
दा२३४पुत्॥ २८॥

२र र र ३ ५र २ र र २
सोमःपुनाऽनऊर्मिणा२३४ऐही। अव्यंवारंविधावता
५र २ र र र ३ ५र ४ ५ २
२३४ऐही। अग्रेवाचःपवमाना२३४ऐही। कानी। क्र
५ ५ ४
ददे३४। हियाईहा। हिंपुइ। डा॥ २९॥

२र ४ ५ र १ २ ३ ५
(आतीषादीये द्वे ॥०) सोमःपुना। नऊ३र्मी२३४णा।
१ २र १ २ २ ऽ १ ५
अव्यंवारम्। विधावति। अग्रा३इ। वा२३४चाः।
१ ऽ १ ५ ३ २ ४
पवा३२। मा२३४नाः। कना३इक्रा५दा६५ईत्॥ ३०॥

अथाष्टमी।

१ २ ३ १ २र २ ३ १ २ ३ १ २
प्रपुनानायवेधसेसोमायवचउच्यते।
३ १र २र ३ १ २ ३ १ २
भृतिन्नभरामतिभिर्जुजोषते ॥ ८ ॥ १०७ *

३र ४ ५ र २ ३ ४र ५ ५ १ र २
सोमःपुना। हो। नऊर्मिणा६ए। अव्यंवारविधा
र २ ३ ३ १ १ १ १ १ १ २
१वा२ती। अग्रेवा२३४५। चा२३४५ः। पवमा२३ना३ः।
१ २ ५र र २ ३ १ १ १ १
का२ना२३४औहोवा। क्रददे२३४५ ॥ ३१ ॥ १०६

अग्निर्ऋषिः †। “पुनानः” पूयमानः “सोमः” “ऊर्मिणा” स्वीयया धारया “अव्यम्” अविभवं “वारं” वालं पवित्रं “विधावति” विविधं गच्छति। कीदृशः? “पवमानः” पूतः “वाचः” स्तोत्रस्य “अग्रे” “कनिक्रदत्” पुनः पुनः शब्दं कुर्वन् विधावति ‡ ॥

“अव्यम्”—“अव्यः”—इति साम्न ऋचः पाठः ॥ ७ ॥ १०६

---

* ऋ० ७, ५, ६, १।

† “चाक्षुषः”—इति ऋषि-नै०।

‡ दाधर्त्ति दर्धर्त्तीत्यादिना (पा० ७, ४, ६५) सिद्धम्।

¶ ‘विनियोगोऽस्य चतुर्थेऽहनि’—इति वि०।

२ १ ४र ५र
(सोमसामानि चत्वारि ॥) प्रपुना२३नाय वेधसाइ।
१ र र ७ १
होइ। होइ। सोमायवचाउच्याता२इ। भृतिन्नभरा
७ १र २ १
मतिभा २इः। जुजोषा२३ता३४३इ॥ ओ२३४५इ। डा
॥ ३२॥

४ र र र ४ २र १ २ २
प्रपुनानौहो५यवेधसाइ। सोमाऔ३हो३४। यव
५ ४ २ १ २ २ ५ र ४ २
चउच्यताइ। भृताऔ३हो३४। नभरामतिभाइः। जु
५
जा३१उवा२३। षा२३४ते॥ ३३॥ १०७

द्विती नाम ऋषिः* आत्मानं प्रत्याह। "पुनानाय" पवित्रेण पूयमानाय† "वेधसे" कर्मणो विधात्रे सोमाय‡ "वचः" स्तोत्र-लक्षणं "प्रोच्यते" त्वया प्रोच्यताम्। किञ्च। "मतिभिः" स्तुतिभिः "जुजोषते" प्रीयमाणाय स्तुतिं "प्रभर" प्रकर्षेण धारय। तत्र दृष्टान्तः। "भृतिन्न" यथा भृतकाय भृतिं सम्पादयति तद्वत्।

"वच उच्यते"-"वच उद्यते"—इति साम्न ऋचः पाठः।

॥ ८ ॥ १०७

---

* "आप्त्यः"—इति ऋषि वि०

† 'सोमपानाय'—इति वि०

‡ 'मेधाविने सोमाय'—इति वि०। "वेधाः"—इति मेधाविनामसु षष्ठं नैघण्टुकम् ३,१५।

अथ नवमी ।

३ १ २ ३ १ २
गोमन्नइन्दोअश्ववत्सुतःसुदक्षधनिव ।
१ २ ३ २ ३ २ ३ १ २
शुचिञ्च*वर्णमधिगोषुधारय ॥ ९ ॥ १०८ †

१ ५ २ ३ ४र ५ ५ १
गो४मन्नः । होइ । इन्दोअश्ववाईदे । सुतःसुदक्ष
१ २ २ १ ३ २ ३ ५र र
धा१नी३वा । शुचिञ्चवा२३४५ । र्णमधिगो२३४औहो
३ ५ २ १ २ ४ ५ ४
वा । षू२३४धा । रया । औ३होवा । हो५इ । डा ॥
॥ ३४ ॥ १०८

पर्वतनारदावृषी । हे "सुदक्ष" सुबल ! हे "इन्दो" सोम । "सुतः" अभिषुतस्त्वं "नःअस्माकम्"‡ "गोमत्" यज्ञ-साधन-गो-युक्तं धनं "धनिव" धन्व [वर्णविकारः ¶] गमय [धन्वतिर्गत्यर्थः §] ततो हे "शुचिं" पूतन्दीप्यमानं "वर्णं" रसञ्च "गोषु" क्षीरादिषु "अधिधारय" अधिकं प्रापयामि ॥

---

* "ते"—इति क० ।

† उ० ७,३,१०,१=ग्रे० ७,५,८,४=ऊहे १२।१,१४—१७,१,२—१८,२,६ ।

‡ 'नः अस्मभ्यम्'—इति वि० ।

¶ "व्यत्ययो बहुलम् (३,४,९८)"—इति पाणिनी-सूत्रस्य सुप्तिङित्यादिवचनेनेत्यर्थः ।

§ नि० नै० २,१४,६४ ।

अथ दशमी ।

२ १ २ ३ १ २ ३ १र २र
अस्मभ्यन्त्वावसुविदमभिवाणीरनूषत ।
१ २ ३ १ २ ३ १ २
गोभिष्टे वर्णमभिवासयामसि ॥ १० ॥ १०९ [*]

४ ५ ३ ५ २ ३ ५
हावास्मा । भ्या२३४न्त्वा । वाहवी२३४दाम् ।
६ ५ ३ १ ३ ५ ६ ५
आभा२इवा२३४णीः । अनाओ२३४वा । षा२३४ता ।
१र २ र १ २ ३ २ १ २ र ३
गोभिष्टे व । र्णमभिवा२३ । सयामसिहो२३४५इ । डा ॥

॥ ३५ ॥ १०९

“धनिव”-“धन्व”—इति, “धारय” “दीधरम्”—इति च छन्दोग-बह्वृचानां पाठभेदः ॥ ९ ॥ १०८

पर्वतनारदावृषी । सोम ! “वसुविदं” धनस्य दातारं “त्वा” त्वाम् “अस्मभ्य” धनादिदानार्थं “वाणीः” अस्मदीयावाचः “अभ्यनूषत” अभिष्टुवन्ति [नू स्तवने (अदा० प०)] । वयं “ते” तव “वर्णम्” आवरकं रसं “गोभिः” गो-विकारैः क्षीरादिभिः “अभिवासयामसि” अभिवासयामः अभित आच्छादयामः ॥ १० ॥

---

[*] ऋ० ७,५,७,४ ।

अथैकादशते।

१२ ३ २उ ३ २ ३ १ २ ३ १ २
पवतेहर्यतोहरिरतिह्वराꣳसिरꣳह्या।
३क २र ३ १ २ ३ २ ३ १ २
अभ्यर्षस्तोतृभ्योवीरवद्यशः॥ ११ ॥ ११०

५ र २ १र २
(यशाꣳसि त्रीणि॥) पपतेहा। र्यतोहरिः। औ
२ ३ ५ १ २ १ ऽर १ २ र
३हो३१इ। औ२हो२३४वा। आतिह्वरा२ꣳसिरꣳहिया।
३र २ ३ ५ २ १ ० र १ २र १
औहो३१इ। औ२हो२३४वा। अभ्यर्षस्तोतृभ्योवा।
२ २ ३ ५ २ ३ ५र र
औ३हो३१इ। औ२हो२३४वा। रा२वा२३४औहोवा।
१ र १ ३ १ १ १ १
यशोयशा२३४५ः॥ ३६॥

३ २ ४ ५र २ १र २र १ ऽ
पवा३। पवतेहा। र्यतोहरिः। औहोइ। औ३
२ ३र २ १ २ १ ऽर १ २ र र १
होइ। औहोइ। आतिह्वरा२ꣳसिरꣳहिया। औहो
ऽ २ ३र २ १ २ र १ ३र १ २र
इ। औ३होइ। औहोइ। अभ्यर्षस्तोतृभ्योवा। औ

---

* उ० १.२,२२.२=ऋ० ७,५,११,३=ऊहे १,२,१६—६,२,१५—६,२,१६—९,२,२=ऊह्य ९,१,१९।

१ ऽ २ ३र ३ १ २ ५र र
होइ । औ३होइ । औहो३ । रा२वा२३४औहोवा ।

२ र १ २ १ १ १ १
यशोयशा२३४५ः ॥ ३७ ॥

३ ४ ५र ३ २ १
पवतेहर्यतः । हरी३ः । आ२३४ । तिह्वराᳲसिर ।

५ २ १ र ५ ३र २ १ २
ह्यिया । अभ्यर्षा२३४ । स्तोतृ । भ्योवा३इ । रा२वा

५र र २ ५
२३४औहोवा । या२३४शाः ॥ ३८ ॥ ११०

अग्निश्चाक्षुष ऋषिः । "हर्यतः" स्पृहणीयः* "हरिः" हरितवर्णः सोमः "रंह्या" [तृतीयाया आकारः†] साधु वेगेन "ह्वरांसि" कुटिलानि अनृजूनि पवित्राणि "अति पवते" अतीत्य गच्छति । अथ प्रत्यक्षस्तुतिः—हे सोम ! त्वं "स्तोतृभ्यः" "वीरवत्" पुत्रयुक्तं "यशः" "अभ्यर्ष" अभिगमय प्रयच्छेत्यर्थः‡ ।

"अभ्यर्ष"-"अभ्यर्षन्"—इति साम्न ऋचः पाठौ ॥ ११ ॥ ११०

---

* 'हरिभिर्यन्ता'—इति वि० ।

† "सुपांसुलुक् (७,१,३९)"—इत्यादिनेति भावः ।

‡ 'विनियोगोऽस्य प्रथमेऽहनि'—इति वि० ।

अथ द्वादशी।

३ १ २ ३ २ ३ १ २ ३ १ २
परिकोशम्मधुश्चुतꣳसोमः पुनानोअर्षति।
३ २उ ३ १ २ ३ १ २
अभिवाणीऋषीणाꣳसप्ता[*] नूषत ॥ १२ ॥ १११[†]

॥ तृतीय-दशति ॥

२ १ २ ४ ५ १र
(भारद्वाजम् ॥) परिकोꣳशम्मधुश्चुताम्। सोमः
२ र १र २ १ २ २ ३ २र १ २र
पुनानोअर्षति। होयि३। अभिवा२३४५। णीऋषी
र १ २ ३ ४ २ ५
णाꣳस। प्तानाओ२३४वा। षा२३४ता ॥ ३८ ॥१११

॥ इति अर्द्धःप्रपाठकः ॥

द्वितऋषिः[‡]। सः "पुनानः" पूयमानः सोमः "मधुश्चुतं" मधुर-रसस्य श्चावयितारं द्रोणकलशं प्रति आत्मीयं रसं "पर्यर्षति" परि गमयति। तमिमं सोमम् "ऋषीणां" "सप्त वाणीः" सप्तच्छन्दांसि[¶] "अभ्यनूषत" अभिष्टुवन्ति [नू स्तवने कुटादिः (प०)।

---

[*] "सप्त"—इति ऋ०।

[†] ऋ० ७,५,६,२।

[‡] "आप्त्यः"—इति ऋषि-नि०।

[¶] गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पङ्क्तिः, त्रिष्टुप्, जगती चेति सप्तच्छन्दांसि।

३ २ १ १र १र २ १र २ १र २र १
सहःसाहा२ः। तेभिस्तेजआपः। आपा२। येभिर्व्यं
२ १र २ २ २र १ २ १ ३
न्तरिक्षमैरया३ः। हाउवा। ए। आपः। २। आपा
१ १ १
२३४५ः॥ २४॥

१ १ १ २ १ र र
हा२ऊवाक्। ३। होवा। ३। यज्जायथा। अ
१ १ १ १
पूहो२। वीया२। मघवन्वृत्रहाहो२। त्यायः२। तत्
र १ १ र
पृथिवीमप्राहो२। थायाः२। तदस्तम्भाउनोहो
१ १ १ १ २
२इ। दाइवा२म्। हा२ऊवाक्। ३। होवा। २।
२ २ २र १र र २१ र २ र १
होवा३। हाउवा। ए। तेजोघर्मःसङ्क्रीडन्तेभि

२ र र १ र २र१र २.र १ २१ १र ३ १ १ १ १
श्रुमतीर्वायुगोपास्तजस्वतीमँहङ्गिभुवनानिचक्रद्र २ ३ ४ ५:
॥ २५* ॥ १६

नृमेध-पुरुमेधौ द्वाहृषी ऐन्द्री अनुष्टुभः ॥

हे "अपूर्व्य" त्वत्तोव्यतिरिक्तेन पूर्वेण वर्जित !† । हे "मघवन्" मंहनीयतम धनवन्निन्द्र ! "वृत्रहत्याय"‡ वृत्रासुरहननाय "यद्" यदा त्वं "जायथाः" उत्पन्नः प्रादुर्भूतोसि "तत्" तदानीमेव "पृथिवीं" प्रथमानाम् "अप्रथयः" प्रसिद्धां दृढामकरोः । "उत" अपि च "दिवं" द्यां द्युलोकम् अन्तरिक्षेण "अस्तभ्नाः" निरुद्धा मकार्षीः ॥ ईदृशं वीर्यं त्वदन्यस्य न भवतीत्यर्थं द्योतयितुम् अपूर्व्येति पदम् ॥ ७ ॥ १६

इति श्रीमत्सायणार्य्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे छन्दोव्याख्याने षष्ठस्याध्यायस्य द्वितीयः खण्डः ॥ २ ॥

---

* आ० गा० २प्र० ३, २, ९.—२५ ।

† 'अपूर्व्या पूर्वेषु मध्यरात्रादिकालेषु विद्यमाना'—इति २प्र० २,७, ४र्थर्चि० सायणः । 'यतः पूर्वं नास्ति सा अपूर्वा, अपर्वा एव अपूर्व्या, स्वार्थिकस्तद्धितः ; प्रथमेत्यर्थः'—इति च तत्रैव वि० ।

‡ 'अथास्य कर्म—रसानुप्रदानं वृत्रवधो या च का च बलकृतिरिन्द्रकर्मैव तत्'—इति नैरुक्तम् ३का० ७अ० १०ख० । 'वृत्रवधो मेघवधः'—इति च तत्रत्य-भाष्यम् । "तत्को वृत्रो मेघ इति नैरुक्ताः । त्वाष्ट्रोऽसुर इत्यैतिहासिकाः । अपाञ्च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते तत्रोपमार्थेन युद्धवर्णा भवन्ति"—इति निरु० नै० २,१६ ।

अथ तृतीय-खण्डे—

सैषा प्रथमा।

२ ३ १ ३ २ ३ १ २र २ २ ३ १ २र
मयिवर्च्चो अथोयशोथोयज्ञस्ययत्पय
३ २ ३ १ २ ३ १ २र
परमेष्ठीप्रजापतिर्दिविद्यामिवदृꣳहतु ॥ १ ॥ १७*

२र १ १ १
† हाउ। ३। आनो२ब्रवाइ। २। आनो२ब्र
१ ३ ५र र १ २ र र ३र ३ १ १ १ १
वा। २। या२३४औहोवा। रक्षतनोरक्षितारा२३४५ः।
२र १ २र र १ २र र
हाउ। ३। आनो२ब्र (पूर्वपाठः) गोपायतगोपायि
र ३ १ १ १ १ २र १ १ २ १ २
तारा२३४५ः। हाउ। ३। आनो२ब्रु०। मयिवर्चः।
१ २ १ २र १ १ २ २
अथोया१शा२ः। अथोयज्ञ। स्ययात्पा१या२ः। पर
र १र १ २ २ १ र १ २
मेष्ठी। प्रजापा१ती२ः। दिविद्यामि। वदृꣳहा१नू२
२र १ १ २ र र ३ १
३। हाउ। ३। आनो२ब्रु०। रक्षतनोरक्षितारा२
१ १ १ २र १ २र र १ २र र
३४५ः। हाउ। ३। आनो२ब्रु०। गोपायतगोपायि-

---

* ऋ० ८,७,१७,७। † "प्राजापत्यस्य व्रतम्"—इति आ०ब्रा०१,२,२०।

अथ द्वितीया ।

२ ३ २   ३ १ २   २ २ २
सन्ते पयाꣳसिसमुयन्तुवाजाः
१र   २र   ३ १ २
संवृष्ण्यान्यभिमातिषाहः ।
२ ३ १ १ १ १   २र   १र   २र   १
तारा२३४५ः । हाउ । ३ । आनो२व्रु० । ए । रक्ष
२ र   र र र र १   २र र   र   २र   १
तनोरक्षितारोगोपायतगोपायितारः । २ । ए । रक्ष
२ र   र र र र   र २र र   र ३ १ १ १
तनोरक्षितारोगोपायतगोपायितारा२३४५ः ॥ ७ * ॥ १७

वामदेवऋषिः प्रोक्तो मयीत्यस्याः प्रजापतिः ।
देवता स्यात्ततश्छन्दोऽनुष्टुप् सद्भिरितीरितम् ॥

"परमेष्ठी" परमे लोके तिष्ठतीति परमेष्ठी "प्रजापतिः" † "दिवि" द्योतमाने स्वर्गे "द्यामिव" द्योतमानां कान्ति मिव । "मयि" अस्मदीये शरीरे "वर्चः" तेजः ब्रह्माख्यं "दृंहतु" वर्द्धयतु । "अथो" अपिच "यशश्च" दृंहतु । "अथो" किञ्च "यज्ञस्य" यागस्य सम्बन्धि अतएव स उत्तमं "पयः" हविर्लक्षण मन्नं च दृंहतु ॥ १ ॥ १७

---

* आ० गा० १पं० ४, १, ७ ।

† 'प्रजापतिः प्रजानां पाता पालयिता वा'—इत्यादि नैरुक्तम ३का० १०ख० ४२, ४३ ख० ।

२ १ २ ३ १ २
आप्यायमानोअमृतायसोम
३ १र २र ३ १ २
दिविश्रवाᳬस्युत्तमानिधिष्व ॥ २ ॥ १८ *

१र २ १र २ १ १ २
† ओवा२ । ३ । सन्तेपया । सो३समु । यन्तु
४र ५ १ १ २ १ २र ३ ४र ५
वाजाः । संवृष्णिया । नो३अभि । मातिषाह्वाः ।
२र १र २ २ २र ३ ४र ५ २ १
आप्यायमा । नो३अमृ । तायसोमा । दिविश्रवा ।
२ १ २र ३ ४ ५ १र १
सो३उत्त । मानिधिष्वा । ओवा२ । २ । ओ२ ।
३ ५र २
वा२३४ । औहोवा । ३ ॥ ८ ‡ ॥

१ २ १र १ १ १ ३ ४र ५
¶ ई२ । ३ । सन्तेपया । सो३समु । यन्तुवाजाः ।
२ १र २ १ १ ३ ४र २र १र
संवृष्णिया । नो३अभि । मातिषाह्वाः । आप्यायमा ।
२ १ २र ३ ४र ५ २ १र २ १ २र ३ ४
नो३अमृ । तायसोमा । दिविश्रवा । सो३उत्तमानिधि
५ १ १ २ ४र १ १
ष्वा । ई२ । २ । ई२आ२३४औहोवा । चᳬ ॥ ११ § ॥ १८

---

* ऋ० १, ६, २२, २ । † "सोमव्रतम्"—इति व्या० ब्रा० ३,३,२० ।

‡ व्या० गा० २प० ४, १, ९ ।

¶ "सोमव्रतम्"—इति व्या० ब्रा० ३, २, २४ ।

§ व्या० गा० २प० ५, १, ११ ।

अथ तृतीया ।

२ ३ १र २र ३ २ ३ २ ३ १ २ ३ २
त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वङ्गाः ।
१र २र ३ २ऽ १ २ ३ १ २र ३ १र २र
त्वमाततनोरुर्वा३न्तरिक्षन्त्वञ्ज्योतिषा वितमो ववर्थ ॥ ३॥१९

२र २ ३र २र
* हाउ । ३ । हौवा३ । ३ । हाइ । हौवा३ ।
२र ४ २ १ १ १ ४ २
३ । हौवा३ । ३ । हा३वा३४५ । २ । हो३वा३४ ।
५र र १ र र २र र १ २र १ २ १र २
औहोवा । त्वमिमा ओषधीः सोम विश्वाः । त्वमपो अज

त्रिष्टुभः पावमान्याः स्यादृषिर्गोतमनामकः ।

हे “सोम !” “अभिमातिषाहः” अभिमातीनां शत्रूणां हन्तुः “ते” तव एवम्भूतं त्वां “पयांसि” अपणार्थानि क्षीराणि “संयन्तु” सङ्गच्छन्ताम् । तथा “वाजाः” हविर्लक्षणान्यन्नानि च त्वां सङ्गच्छन्ताम् । “वृष्ण्यानि” वीर्याणि च सङ्गच्छन्ताम् । हे “सोम !” त्वम् “अमृताय” आत्मनः अमृतत्वाय अमरत्वाय “आ” समन्ताद्वर्द्धमानः सन् “दिवि” नभसि स्वर्गे “उत्तमानि” उन्नततमानि उत्कृष्टानि “श्रवांसि” अन्नानि अस्माभिर्भोक्तव्यानि हविर्लक्षणानि “धिष्व” धारयते । [“क्रियाग्रहणं कर्तव्यमिति (पा० २, ३, १३) कर्मणः सम्प्रदानत्वात् चतुर्थ्यर्थे षष्ठी † ॥ २॥ १८

---

* “सोमव्रतम्”—इति आ० ब्रा० ३,२,२५ ।

† “चतुर्थ्यर्थे बहुलं छन्दसि”—इति पा० २, ३, ६२ ।

१ र   १ र ३र १   २   १ र   २र १ र
नयस्त्वङ्गाः। त्वमातनोरुर्वन्तरिक्षं। त्वञ्ज्योतिषावितमो
२   २र   २   ३र   १
ववर्थं। हाउ। ३। हौवा३। ३। हाइ। हौवा
२र   ४ १ १ १ १   ४
३। ३। हौवा३। ३। हो३वा३४५। २। हो३
२   ५र र   २र   १   २ १   २   १र २
वा३४। औहोवा। ए। जनद्दिवमन्तरिक्षम्पृथिवीवि
१ र २   १ र २र   र   १   १ १ १ १
श्वभोजसम्पुरुरूपाअजीजनः। इट्। इडा२३४५॥१०*॥१९

हे "सोम !" "त्वम्" "इमाः" भूम्यां वर्तमानाः "विश्वाः" सर्वाः "ओषधीः" "अजनयः" उत्पादितवानसि। तथा "त्वम्" "अपः" तासामोषधीनां कारणभूतानि वृष्ट्युदकानि अजनयः। तथा त्वं "गाः" सर्वान् पशून् † उदपादयः। "उरु" विस्तीर्णम् "अन्तरिक्षं" "त्वम्" "आ ततनोः" विस्तारितवानसि! तस्मिन्नन्तरिक्षे यत् "तमः" अस्मद्दृष्टि-निरोधकम् अन्धकारं तदपि "त्वं" "ज्योतिषा" आत्मीयेन प्रकाशेन "वि ववर्थ" विशिष्टं कृतवानसि। [ववर्थ वृञ् वरणे लिटस्थलि, "बभूथाततन्थजगृम्भववर्थेति" (पा॰ ७, २, ६४) निपात्यते॥

"आततनोः"—"आततन्थ"—इति साम्न ऋचः पाठौ॥३॥१९

---

* आ॰ गा॰ ३ प॰ ४, १, १०।

† "अथापि पशुनामेह भवत्येतस्मादेव" — द्र॰ नि॰ २, ५

अथ चतुर्थी ।

३ १ २ ३१ २ ३१ २२२३ १ २
अग्निमीडेपुरोहितंयज्ञस्यदेवमृत्विजम् ।
१ २ ३१ २
होतारꣳरत्नधातमम् ॥ ४ ॥ २० *

२र र २ र र २ र र २ १
† मनोहाउ । वयोहाउ । वर्चोहाउ । अग्निम् ।
१र ३ २ ३ ५: २ र २ र र
इडारइ । पुरोहा२३४इताम् । इहहाउ । इडाहा
२र र २ १ १ ३ २ ३ ५
उ । आयुर्हाउ । यज्ञ । स्यदा२इ ‡ वमृत्वी२३४जाम् ।
२१र २र र २ र १र र १
स्वर्हाउ । ज्योतिर्हाउ । ऋतꣳहाउ । होता । रꣳ
३ २ ४ २ १ ३ ११.११
रा२३ । त्नधा३ता५मा६५६म् । ए३ । महा२३४५ः॥ १३ ‡ ॥
२ऽ २ १ र २र. १र २ २र.१र. २ १र
¶ हाउ३वा । अग्निमीडेपुरोहितम् । देवेषुनिधिमाꣳ
२.१ २ऽ २ १ २र १ ३ १ २र १र. २
अहम् । हाउ३वा । यज्ञस्यदेवमृत्विजम् । देवेषुनि
१र २ १ २ऽ १र र २ १र २ २र
धिमाꣳअहमः । हाउ३वा । होतारꣳरत्नधातमम् । दे

---

* ऋ० १,१,१,१ । † गवां व्रताज्ञिमम् (आ० ग्रा० ३,२,२१) ।

‡ आ० गा० ३प० ४,१,१३ । ¶ यमव्रताद्यम् (आ० ग्रा० ३,२,२१) ।

१र २ १र २ १ २ऽ १र १र१र २ १र
वेषुनिधिमाऽअहम्। हाउ३वा। ए। देवेषुनिधिमाःऽ
२ १
अहम्। (एतं क्ति)॥ १८ *॥ २०

अग्नि मीडे मधुच्छन्दा गायत्र्येषाग्नि-संस्तुतिः।

“अग्नि”-नामकं “देवम्” “ईडे” स्तौमि [ईड स्तुताविति (अदा०आ०) धातुः मन्त्रस्यास्य होत्रा प्रयुज्यमानत्वात् अहं होता स्तौमीति लभ्यते] कीदृशम् अग्निम्? “यज्ञस्य पुरोहितं” यथा राज्ञः पुरोहितः तदभीष्टं सम्पादयति तथाग्निरपि यज्ञस्यापेक्षितं होमं सम्पादयति। यद्वा यज्ञस्य सम्बन्धिनि पूर्वभागे आहवनीयरूपेणावस्थितम्। पुनः कीदृशम्? “होतारम्” ऋत्विजम् [देवानां यज्ञेषु होतृनामक ऋत्विगग्निरेव। तथाच श्रूयते— “अग्निर्वै देवानां होतेति”। पुनरपि कीदृशम्? “रत्नधातमं” यागरूपाणां रत्नानाम् अतिशयेन धारयितारं पोषयितारं वा †। अत्राग्नि-शब्दस्य यास्को बहुधा निर्वचनं दर्शयति— “अथातोनुक्रमिष्यामोऽग्निः पृथिवीस्थानस्त प्रथमं व्याख्यास्यामो अग्निः कस्मादग्रणी भवति, अग्रं यज्ञेषु प्रणीयतेऽङ्गं नयति सन्नममानोऽक्नोपनो भवतीति स्थौलाष्ठीवि र्न क्नोपयति न स्नेहयति त्रिभ्य आख्यातेभ्यो जायतइति शाकपूणिरितादक्ताद्दग्धाद्वा नीतात्स खल्वेते रकारमादत्ते गकारमनक्तेर्वा दहतेर्वा नीः परस्तस्यैषा भवति(७,४,१)”इति ॥ ४ ॥ २०

---

* आ० गा० ३प० ४,१,१८।

† यास्कस्त्वमुमेवं व्याख्यातवान्—“अग्निमीळेऽग्निं याचामीळिरध्येषणाकर्मा पूजाकर्मा वा पुरोहितो व्याख्यातो यज्ञस्य। देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो

अथ पञ्चमी।

१ २   ३ १उ   ३ २ ३
तेमन्वतप्रथमन्नामगोना
२   ३ १ २ ३ १ र   २र
न्त्रिःसप्तपरमन्नामजानन।
१   २   ३ २ ३क २र   ३ २ ५
ताजानतीरभ्यनूषतक्षा
३   १ २   ३ १र   २र ३   १ २
आविर्भुवन्नरुणीर्य्यशसागावः ॥ ५ ॥ २१

२र   २र र र   २   र र
* हाउ। ३। गावोहाउ। ३। वृषभपत्नीर्हाउ। ३।

भवतीति वा यो देवः सा देवता। होतारं ह्वातारं जुहोतेर्होतेत्यौर्णवाभः। रत्नधातमम् रमणीयानां धनानां दातृतमम्"—इति ७,१५। "पुरोहितः पुर एनं दधति"—इति च यास्कः २, १२॥ अत्र कश्चित् स्वरसन्निवेशविधानप्रकारञ्चित्थमाह दीक्षितः—"तत्राग्निशब्दोऽव्युत्पन्नपक्षे फिषइत्यन्तोदात्तः व्युत्पत्तौ तु नि-प्रत्ययस्वरेण। अम्। सुप्तादनुदात्तः अभिपूर्वइत्येकादेश उदात्तेनोदात्तः। ईले। तिङ्ङतिङइति निघातः। संहितायां तूदात्तादनुदात्तस्येतीकारः स्वरितः। स्वरितात् संहितायामिति ले इत्यस्य प्रचयापरपर्यायः एकश्रुतिः। पुरः शब्दोऽन्तोदात्तः पूर्वाधरावराणामित्यसि प्रत्ययस्वरात्। हित-शब्दोऽपि धाञो निष्ठायां दधातेर्हिरिति ह्यादेशे प्रत्ययस्वरेणान्तोदात्तः। पुरोऽव्ययमिति गति-सञ्ज्ञायां कुगतीति समासे समासान्तोदात्ते तत्पुरुषे तुल्यार्थेत्यव्यय-पूर्वपद-प्रकृतिस्वरेण गतिकारकोपपदात् कृदिति कृदुत्तरपद-प्रकृतिस्वरे थाथादिस्वरे च पूर्वपूर्वापमर्द्देन प्राप्ते गतिरनन्तर इति पूर्वपद-प्रकृतिस्वरः। पुरः-शब्दौकारस्य संहितायां प्रचये प्राप्ते उदात्तस्वरितपरस्य सन्नतर इत्याद्यनुदात्तः। ऋत्विक् शब्दः कृदुत्तर-प्रकृतिस्वरेणान्तोदात्तः। होतृ-शब्दस्तृन्-प्रत्ययान्तो नित्स्वरेणाद्युदात्तः। रत्न-शब्दो नविषयस्येत्याद्युदात्तः रत्नानि दधातीति रत्नधाः। समासस्वरेण कृदुत्तरपद-प्रकृतिस्वरेण वान्तोदात्तः। तमपः पित्वादनुदात्तत्वे स्वरितप्रचयावित्यादि यथाशास्त्र मुन्नेयम्"—इति वै।

"गवां व्रते"—इति श्रा॰ ग्रा॰ ३, २, २१। तत्र पूर्वम्।

२र र र र २ र र र २ र
वैराजपत्नीर्हाँउ। ३। विश्वरूपाहाउ। ३। अस्मासुरम
र १र र १ १
ध्वꣳहाउ। ३। तेमन्वतप्रथमन्नामगो२नाम। त्रिःसप्त
र १र र र र १ १र
परमन्नामजा२नान। ताजानतीरभ्यनूषता२सा:। आ
१ र र १ २र २र र र
विर्भुवत्तरुणीर्यशसागा२वा:। हाउ। ३। गावोहाउ।
१ र र २र र र र २ र र
३। वृषभपत्नीर्हाँउ। ३। वैराजपत्नीर्हाँउ। ३। विश्वरूपा
र २ र र २ र
हाउ। ३। अस्मासुरमध्वꣳहाउ। ३। अस्मासुरमध्वा३ꣳ
२ २ २र १ र २ १ १र र र १ २र १ र २र
हाउ। वा। ए। गावोवृषभपत्नीर्वैराजपत्नीर्विश्वरूपा
१र २ २र १र र २ १ १र र र १ १र
अस्मासुरमध्वम्। २। ए। गावोवृषभपत्नीर्वैराजपत्नीर्वि
१ र २र १र २ ३ १ १ १ १
श्वरूपाअस्मासुरमध्वा२३४५म्॥ १७ *॥

२र १र र १
† हाउ। ३। तेमन्वतप्रथमन्नामगो। नाम्। ३।
२र १ र १ २र
हाउ। ३। त्रिःसप्तपरमन्नामज्ञा। नान्। ३। हाउ३।
१र र र र १ २र
ताजानतीरभ्यनूषता। सा:। ३। हाउ। ३।

---

* आ० गा० पूप० ४, १, १७।

† "गवां व्रते"—इति आ० ग्रा०३,२,२७। तत्र पूर्वम्।

आविर्भुवन्नरुणीर्यशसागा। वाः। ३। हाउ३। वा।
१र २र २र २र १ २ १ १ १ १
ए। दुघाः। २। ए। दुघा२३४५ः॥ १८*॥ २१

त्रिष्टुभा वामदेवोऽस्तौदग्निं तेमन्वतेति च।

हे "अग्ने!" "ते" स्तोत्रं कुर्वाणा अङ्गिरसः "गोनां" † गवां वाचां ‡ सम्बन्धि नाम स्तुति-साधकं शब्दमात्रं "प्रथमं" पूर्वम्, "अमन्वत" अजानत पश्चात्तस्या वाचः सम्बन्धीनि "त्रिःसप्त" एकविंशतिसङ्ख्याकानि "परमं" परमाण्युत्कृष्टानि "नाम" नामानि स्तुति-साधकानि स्तोत्राणि [जातावेकवचनम् ¶] छन्दांसि वा [तानि च गायत्र्यादीनि जगत्यन्तानि सप्त §, अतिजगत्यादीनि अतिधृत्यन्तानि सप्त ||, कृतिप्रभृतीन्युत्कृतिपर्यन्तानि सप्त +] 'जानन्' अजानन् अलभत एवंविधच्छन्दोयुक्तैर्मन्त्रैरग्निमस्तुवन्नित्यर्थः। "ताः" वाचः "जानतीः" सर्वं जानत्यः "उषाः" [चियन्ति गच्छन्त्युषःकालं प्रापयन्ति ताः] "अभ्यनू-

---

* ग्रा० गा० १प० ५,२,१८।

† "गोः पादान्ते (७, १, ५७)"—इति पा०।

‡ "गौः"—इति वाङ्नामसु चतुर्थं नैघण्टुकम् (१,११)।

¶ "जात्याख्यायामेकवचनं बहुवचनमन्यतरस्याम्"—इति पा० १,२,६०।

§ गायत्री, २ उष्णिक्, ३ अनुष्टुप्, ४ बृहती, ५ पङ्क्तिः, ६ त्रिष्टुप्, ७ जगती।

|| अतिजगती, २ शक्वरी, ३ अतिशक्वरी, ४ अष्टिः, ५ अत्यष्टिः, ६ धृतिः, ७ अतिधृतिः।

+ कृतिः, २ प्रकृतिः, ३ आकृतिः, ४ विकृतिः, ५ संस्कृतिः, ६ अभिकृतिः, ७ उत्कृतिः।

अथ षष्ठी।

१ ३ १र   २र ३ १
समन्यायन्त्युपयन्त्यन्याः
२ ३ २ ३ २ ३क२र
समानमूर्वन्नद्यस्पृणन्ति।
२ ३ २ ३ १ २ ३ १ २
तमूशुचिꣳशुचयोदीदिवाꣳस
३ १र २र ३ १ २ ३ १ २
मपान्नपातमुपयन्त्यपः॥ ६॥ २२ *

षत” अस्तुवन्। ततः सूर्यस्य “यशसा” तेजसा सह “अरुणीः”† अरुणवर्णाः “गावः” “आविर्भुवन्” प्रादुरभूवन्। यद्वा “ते” अङ्गिरसः “प्रथमं” पुरातनं “नाम” एहि सुरभि गुग्गुलुगन्धिनीति धेनु-नामधेयम् “अमन्वत” उच्चारयांमासुः। पश्चात् स्व-भूतानि पणिभिरपहृतानि त्रिःसप्त-रत्नान्यविन्दन्। तत उच्चारितं जानत्यो “गावः” “अभ्यनूषत” हम्भारवलक्षणं शब्दमकुर्वत। तदानीं उषाः प्रादुरभूदिति॥

“तेमन्वतप्रथमन्नामंगोनान्त्रिःसप्तपरमन्नामजानन्। ताजानतीरभ्यनूषतक्षाआविर्भुवन्नरुणीर्यशसागावः”—इति छन्दोगाः। “तेमन्वतप्रथमन्नामगोनान्त्रिःसप्तपरमन्नामजानन्। ताजानतीरभ्यनूषतक्षाआविर्भुवन्धेनोस्त्रिःसप्तमातुःपरमाणिविन्दन्। तज्जानतीरभ्यनूषतव्राआविर्भुवदरुणीर्यशसागोः” — इति बह्वृचाः॥ ५॥ २१

---

* ऋ० ८,७,१४,२।

† “अरुणो गाव उषसाम”—इति निघ० १. १५. ७।

२र   १र २   २१ र २   २र१
* हाउ । ३ । ऐरयत् । ३ । अपःसमैरयत् । ३ । भूत
र २   २ र र र २र र र
मैरयत् । ३ । अपाङ्गर्भोग्निरिडा । पाङ्गर्भोग्निरिडा । २ ।
२ र र र १ र   २ १ २
पृथिव्यागर्भोग्निरिडा । ३ । समन्यायन्त्युपयन्तिया२३न्याः ।
र र १ र   २ १ २ १ र   र र १ १
समानमूर्वन्नद्यस्पृणा२३न्ती । तमुशुचिꣳशुचयोदीदिवा२
२   २ १र र   २ १ २   २र
३ꣳसाम् । अपान्नपातमुपयन्तिया२३पाः । हाउ । ३ ।
१र २   २ १ र र   २र१ र २   २ र
ऐरयत् । ३ । अपःसमैरयत् । ३ । भूतमैरयत् । ३ । अपा
र र २र र र   २ र र र
ङ्गर्भोग्निरिडा । पाङ्गर्भोग्निरिडा । २ । पृथिव्यागर्भोग्निरिडा
२ र र र   २   २र २ १
। २ । पृथिव्यागर्भोग्निरिडा ३ । हाउवा । ए । अग्निःशि
२ १ २र २ १ २ १ २र १र २ १ २ १ २र
शुक्रः । ए । शुक्रःशिशुक्रः । ए । तेजःशुक्रस्यशुक्रम् । ए ।
१र २ १र र १र २र १र २ १ २र १ २र १ २र १ र ३
तेजःसप्राःसमीचीः । ए । तेजउषोनजारः । ए । सुवर्ज्योती
१ १ २ १
२३४५ः ॥ ३ ॥

२र   १र २   १र२   १
हाउ । ३ । ऐरयन् । ३ । समैरयन् । ३ । सम
३   १ र   २ १ २   २ र १ र
स्वरन् । ३ । समन्यायन्त्युपयन्तिया२३न्याः । समानमूर्व

---

* “अपां व्रते द्वे”—इति आ०ब्रा० ३,२,२२ ।

२ १ \ २ १र र र / २ १
न्नद्यंस्पृणा२३न्ती। तमूशुचिꣳशुचयोदीदिवा२ ३ꣳ
२ २१र र २ १ २ २र १र
साम्। अपान्नपातमुपयन्तिया२३पा३ः। हाउ। ३। ऐर
२ १ र २ १ २ १ २
यन्। ३। समैरयन्। ३। समस्वरन्। २। समस्वरा३न्।
२ ३ १ १ १ १
हाउवा३। ई२३४५॥ ४ * ॥ २२

इतीयं त्रिष्टुबाग्नेयी दृष्टा गृत्समदेन सा।

"अन्याः" वर्षाणाः "आपः" "संयन्ति" भूम्यां सङ्गच्छन्ति "अन्याश्च" "पूर्वं" तत्रावस्थिताः "उपयन्ति" उपगच्छन्ति। ताः सर्वा आपः "समानं" सह "नद्यः" नदीभूत्वा "ऊर्वं" समुद्रमध्ये वर्तमानं वडवानलं "पृणन्ति" प्रीणयन्ति [पृण प्रीणने(प०) तौदादिकः] "तमु" तमेव "अपान्नपातम्" "शुचिं" निर्मलं "दीदिवांसं" दीप्यमानं [दीदिवेति छान्दसो दीप्तिकर्मा लिटः क्वसुः॥ वस्वेकाजाद्घसा मिति नियमादिडभावः। छन्दसीवेति वक्तव्य मिति वचनाद्द्विवचनाभावः] एवम्भूतं "शुचयः" शुद्धाः "आपः" "उपयन्ति" समीपे गच्छन्ति॥

एष हि वैद्युताग्निरूपेण मेघे वर्तमानोऽस्मान् अजीजनदिति बुध्वा वडवानलरूपेण वर्तमानं तं पर्युपासत इत्यर्थः। यद्वा अन्या

---

* आ० गा० ३प० ४, २, ३-४।

एकधनाख्या* आपः संयन्ति । चात्वालोत्करयोर्मध्ये † वसतीवरीभिः सङ्गच्छन्ते । अन्या वसतीवर्याख्या आपश्च ‡ उपयन्ति उपगच्छन्ति एकमत्यं प्राप्ता भवन्ति । एताश्च मिलित्वा यज्ञं साधयन्त्यः तत्साध्य-वृष्टि-द्वारा नद्यो भूत्वा ऊर्वं पृणन्तीत्यादि समानम् । एवं हि आपो वा अस्पर्द्धन्त वयं पूर्वं यज्ञं वक्ष्याम इत्यादिको बह्वृच-ब्राह्मण-विनियोगश्चानुगृह्यते ॥

“अपान्नपातमुपयन्त्यापः”—“परितस्थुरापः”—इति साम्नऋचः पाठ-भेदः ॥ ६ ॥ २२

---

* “सोमकण्डनाय, यैर्जलमानीयते ते कुम्भा एकधनाः । एकं धनं सोमरूपं यन्तीति”—इति वेददीपः (य० मा० शा० स० ५अ० ७क०)।

† “उत्तरवेदिनिचयार्थं यत्र भूप्रदेशे मृदं खनति स प्रदेशश्चात्वाल उच्यते”—इति वेददीपः (य० मा० शा० स० ५अ० ७क०)। “स्फ्योत्खातां मृदमुत्करे त्यजेत्”—इति वेददीपः (य० मा० शा० स० १अ० २५क०)।

‡ “अग्नीषोमीयस्य वपामार्जनान्ते वसतीवरीग्रहणम् स्यन्दमानानामनस्तमितेऽस्तमितस्य निनाह्यात् पुरेजानस्यानीजानोऽन्यस्यापि समीपावसितस्य पुरेजानस्योभयाभाव उल्कुषीं हिरण्यं वोपर्युपरि धारयन् हविष्मतीरिति”—इति का० सू० ८, ९, ७-१० । अग्नीषोमीयस्य पशोर्वपामार्जनपर्यन्ते कर्मणि कृते अनस्तङ्गते रवौ वहन्तीनामपामेकदेशाद् वसतीवरीसञ्ज्ञानां सोमार्थानामपां ग्रहणं कार्यं हविष्मतीरिति (य० मा० शा० स० ६अ० २३क०) मन्त्रेण । यदि रविरस्तङ्गतो यजमानश्च पुरा ईजानः सोमयाजी तदा गृह एव निनाह्यान्मणिकाद् वसतीवरीग्रहणम् निखननीयो निनाह्यः । यदि च यजमानः पुरा न सोमयाजी तर्हि समीपस्थितस्य यष्टुः मणिकाद् ग्रहणम् तस्य अन्यस्य च यज्ञकर्तृलाभावे उल्कां कनकं वा वहन्तीनामपां समीपे धारयन् वहन्तीभ्यो वसतीवरीर्गृह्णीयादिति सूत्रार्थः ॥

अथ सप्तमी।

१र २र ३ १ २ ३ १र २र ३ १ २र
आप्रागाद्भद्रायुवतिरह्नः केतूंत्समीर्त्सति।
१ २ ३ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २
अभूद्भद्रानिवेशनीविश्वस्य जगतोरात्री॥ ७॥ २३ *

१ १र र र २ १र २ १ १
ओ॰ हो रइ। ३। आप्रागाद्भद्रायुवतिः। हो रइ। ३।
१ २र १र र २ १ १ र २ १र २ १र २र
अह्नःकेतूंत्समीर्त्सति। हो रइ। ३। अभूद्भद्रानिवेशनी।
१ १ २ १ २र १र २र १ १
हो रइ। ३। विश्वस्यजगतोरात्री। हो रइ। २। होर।
२ २ ३ १ १ १ १
वा३। हांउवा३। ई२३४५॥ ६ †॥ २३

अस्तौदनुष्टुभा रात्रिं वामदेव ऋचानया।

"भद्रा" सूर्यप्रकाशसन्तापं निवारयन्ती सुखकरी "युवतिः" तमसो मिश्रयित्री¶ "रात्रिः" "आ प्रागाद्" आभिमुख्येन प्रगच्छति। "अह्नः"§ चन्द्रमसः "केतून्" रश्मीन् "समीर्त्सति" सम्यक्सम्बन्धयितु

---

* ऋ०४,५,१०,१।

† "रात्रे रुत्तरम्"—इति आ०ता०३,१,२१।

‡ आ०गा०३प०४,२,६।

¶ युवतिरिति मिश्रणार्थ-यौते रूपम्; तथात्तिवमर्थः प्रकृति-लभ्यः।

§ "अहर्नामान्युत्तराणि द्वादश। अक्तुः कस्मादुपाहरन्त्यस्मिन् कर्माणि"—इत्यादि निरु० नै० २, २०।

अथाष्टमी।

३ २ ३ १ २ ३ २ ३ २उ ३
प्रत्नस्यवृष्णोअरुषस्यनूमहः
२ ३ १ २ ३ १ २ ३ १ २
प्रनोवचोविदथाजातवेदसे ।
३ १ २ ३ १र २र ३ २ ३
वैश्वानरायमतिर्नव्यसेशुचिः
१ २ ३ १ २ ३ १ २
सोमइवपवतेचारुरग्नये ॥ ८ ॥ २४ *

२र १ १ऽ २ २
† हाउ। ३। ऊ२। २। ऊ२। वा३। हाउवा३।
१ २१ ३ १ र र २ र २ १र
हस्ह्हस्अर्चिःशोचिस्तपोहरः। प्रत्नस्यवृष्णोअरुषस्यनूमा
२ १ र र र र २१र २ २र र १र
२३हाः। प्रनोवचोविदथाजातवेदा२३सांइ। वैश्वानराय
२ १र र १र र र २ १ २
मतिर्नव्यसेशू२३चीः। सोमइवपवतेचारुरग्ना२३या३इ।

मिच्छति च। अतएव "भद्रा" कल्याणी रात्री "विश्वस्य" सर्वस्य "जगतः" "निवेशनी" निवेशकारिणी "अभूत्" भवति। अहनि स्व-स्व-व्यापारात् खिन्नान् सर्वप्राणिनः स्वाश्रयेषु स्वापयतीत्यर्थः ॥ ७ ॥ २३

---

* ऋ० ४,८,१६,२।

† "विष्णोर्व्रतम्"—इति आ०आ०१,२,२२।

२र १र १ऽ २ २ २
हाउ। ३। ऊ२। २। ऊ२। वा३। हाउवा३। ई२
१ १ १
३४५॥ ७*॥

२र २र ३र २र ३र२र २'र १
† हाउहाउहाउ। ओहा। २। ओहाइ। वयोहाइ।
२ र १ २ १ २र १ २र १
३। पयोहोइचक्षुर्होइ। ३। श्रोत्रꣳहोइ। ३। आयुर्होइ।
२ र १ २ र १ २र र १ २
३। तपोहोइ। ३। वर्चोहोइ। ३। तेजोहोइ। ३। सुव
१ २र १ २ १ र २र १
र्होइ। ३। ज्योतिर्होइ। ३। प्रत्नस्यवृष्णोअरुषस्यनूमा२३-
२ १ र र र र २ १र २ २र र १र
हाः। प्रनोवचोविदथाजातवेदा२३साइ। वैश्वानरायमति
२ १र २ १र र र ० १ २ २र
र्नव्यसेशू२३चीः। सोमइवपवतेचारुरग्ना२३या३इ। हाउ
र ३र २र ३र २र १ र र २ र १
२हाउ। ओम्हा२। ओहाइ। वयोहाइ। ३। पयोहोइ।
२ १ २र १ २र १
३। चक्षुर्होइ। ३। श्रोत्रꣳहोइ। ३। आयुर्होइ। ३।
२ र १ २ र १ २र र १ २ १
तपोहोइ। ३। वर्चोहोइ। ३। तेजोहोइ। ३। सुवर्हो
१र १ २र १ ३ ५र र
इ। ३। ज्योतिर्होइ। २। ज्योतिर्हा२। वा२३४ओहो

---

* आ० गा०३प० ४,२,७।

† "महावैश्वानरव्रते द्वे"—इति आ० ब्रा० ३,२,२८। तत्र पूर्वम्।

२र २ १ २ १ र २ २र २ १ २र १र २ १

वा। ए। अग्निःसमुद्रमार्चयन्। ए। अग्निमूर्द्धाभिवह्दिवः।

२र १र २ १ २ र १र र र ३ १ १ १ १

एं। आयुर्द्धा अस्मभ्यं वर्चोधादेवेभ्या२३४५ः॥ ३* ॥ २४

वैश्वानरं जगत्यास्तौद्भरद्वाजो बार्हस्पत्यः।

"प्रक्षस्य" सम्पृक्तस्य व्याप्तस्य [यद्वा पृक्षं हविर्लक्षणमन्नं† तद्वतः] "वृष्णः" सेक्तुः "अरुषस्य"‡ आरोचमानस्य "वैश्वानराय"¶ "महः" पूजायुक्तं बलं तेजो वा "नु" क्षिप्रं स्तौमि। अत एव "नः" अस्मदीयं "वचः" वचनं "विदथे" यागे§ "प्रयच्छति" स्तौतीत्यर्थः। "जातवेदसे" जातप्रज्ञाय जातधनाय|| वा तमुद्दिश्येत्यर्थः। उक्तमेव प्रकारान्तरेणादरादाह—"नव्यसे" नवतराय "वैश्वानराय" अग्नये "शुचिः" निर्मला स्तोतृणां

---

* आ० गा० २प० ६, १, २।

† "पृक्षः"—इति अन्ननामसु पञ्चमं नैघण्टुकम् २, ७।

‡ "अरुषीरारोचनान्"—इति निरु० दै० ६, ७।

¶ वैश्वानरः कस्माद् विश्वान् नरान् नयति विश्व एनं नरा नयन्तीति वापि वा विश्वानर एव स्यात् प्रत्यृतः सर्वाणि भूतानि तस्य वैश्वानरः। तस्यैषा भवति * * * इतो जातः सर्वमिदमभिविपश्यति वैश्वानरः संयतते सूर्येण राजाऽयः सर्वेषां भूतानामभिश्रयणीयस्तस्य वयं वैश्वानरस्य कल्याण्यां मतौ स्यामेति। तत्को वैश्वानरः मध्यम इत्याचार्या वर्षकर्मणा ह्येनं स्तौति"—इति निरु० दै० २, २१-२२।

§ "विदथः"—इति यागनामसु पञ्चमं नैघण्टुकम् ३, १७। "विदथानि वेदनानि। विदथानि प्रचोदयन्नित्यपि निगमो भवति"—इति नि० नै० ६, ७।

|| "जातवेदाः कस्माज्जातानि वेद जातानि वैनं विदुर्जाते जाते विद्यत इति वा जातवित्तो वा जातधनो जातविद्यो वा जातप्रज्ञानो यत्तज्जातः पशूनविन्दतेति तज्जात-

शोधयित्री ता "चारुः" कल्याणी "मतिः" मननीया स्तुतिश्च "पवते" मत्सकाशात् प्रभवति स्वयमेव गच्छतीत्यर्थः। "सोमः इव" यथा सोमो दशापवित्रात् स्रवति तद्वदित्यर्थः * ॥

"प्रशंस्य"- "प्रशस्य"—इति "महः"-"सहः"— इति, "प्रनोवोच"-"प्रनुवोचम्"—इति, "जातवेदसे"-"जातवेदसः—इति, "नव्यसे"—"नव्यसि"—इति च साम्न ऋचः पाठभेदः॥ ८ ॥ २४

वेदसो जातवेदस्त्वमिति ब्राह्मणं तस्मात् सर्वानृतून् पशवोऽग्निमभि सर्पन्तीति च तस्यैषा भवति ॥ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः। स नः पर्षदतिदुर्गाणि विश्वा नावेव सिन्धुं दुरितात्यग्निः। जातवेदस इति जातवेदसे वैव जातवेदसेऽर्चाय सुनवाम सोममिति प्रसवायाभिषवाय. सोमं राजानममृतमरातीयतो यज्ञार्थमनिसत्रो निदहाति। निश्चयेन दहति भस्मीकरोति. सोमो दददित्यर्थः। स नः पर्षदतिदुर्गाणि विश्वानि दुर्गमानि स्थानानि नावेव सिन्धुं नावा सिन्धुं सिन्धुं नावा नदीं जलदुर्गां महाकुलां तारयति दुरितात्यग्निरिति दुरितानि तारयति। तस्यैषा परा भवति॥ प्रनूनं जातवेदसमश्वं हिनोत वाजिनम्। इदं नो बर्हिरासदे। प्रहिणुत जातवेदसं कर्मभिः समश्नुवानमपि वोपमार्थे स्यादश्वमिव जातवेदसमितीदं नो बर्हिरासीदत्विति तदेतदेकमेव जातवेदसं गायत्रं तृचं दशतयीषु विद्यते। यत्तु किञ्चिदाग्नेयं तज्जातवेदसानां स्थाने युज्यते स न मन्येतायमेवाग्निरित्यप्येते उत्तरे ज्योतिषी जातवेदसी उच्येते। ततो नु मध्यमः। अभिप्रवन्त समनेव योषा इति तत्पुरस्ताद्व्याख्यातमथासावादित्यं उदुत्यं जातवेदसमिति तदुपरिष्टाद्व्याख्यास्यामो यस्तु सूक्तं भजते यस्मै हविर्निरुप्यते अयमेव सोऽग्निर्जातवेदा निपातमेवैते उत्तरे ज्योतिषी एतेन नामधेयेन भजते"—इति निरु० दै० १. १९—२०।

* "दशापवित्रेण परिमृज्यैष ते योनिरिति ग्रहसादनमिति का० ९, ५, २५। दशापवित्रेण गृहीतं ग्रहं परिमृज्य पात्राद्बहिर्निर्गतं सोमं मार्जयित्वा एष ते योनिरिति मन्त्रेण ग्रहस्य सादनं करोति। वीप्सा सर्वग्रहार्था इति सूत्रार्थः॥

अथ नवमी।

१ २ ३ १ २र ३ २
विश्वे देवा मम शृण्वन्तु यज्ञ
३ १र २र ३ १र २र३ १ २
मुभे रोदसी अपान्नपाच्च मन्म
२ ३ १ २ ३ १ २
मा वो वचा सि परिचक्ष्याणि
३ २उ ३ १ २
वोच सुम्ने ष्विद्वो अन्तमा मदेम ॥ ९ ॥ २५

२र १ २ १ २
* हाउ। ३। आइहौ। ३। आइहौ२। ३। आइ-
२ १ २ १ १ र र र २ १
हिहा२इ। २। आइहिहाइ। विश्वे देवा मम शृण्वन्तु या
२ २ १र र र र र २ १ २ १र र
२३ज्ञाम्। उभे रोदसी अपान्नपाच्च मे२३न्मा। मावोव
र र २ १ २ २र १ २
चा सि परिचक्ष्याणि वो२३चा३म्। हाउ। ३। आइहौ
१ १ २ १ २ १
। ३। आइहौ२। ३। आइहिहा२इ। २। आइहिहाइ।
१र र र ई २ ३ १ १ १ १ १
सुम्ने ष्विद्वो अन्तमा मदा२ई माउवा३। ई२३४५ ॥ ८ † ॥ २५

---

* "विश्वेषां देवानां व्रतम्"—इति ब्रा० ब्रा० ३, २, २२।

† ग्रा० गा० ३प० ४, २, ९।

एषा त्रिष्टुब् वैश्वदेवी भरद्वाजेन वीक्षिता।

"विश्वे" सर्वे "देवाः" "मम" मदीयं "मन्म" मननीयं "यज्ञं" यजनीयं पूजां हवींषि वा "शृणवतु" गृह्णन्त्वित्यर्थः। "अपान्नपात्" मध्यस्थानोऽग्निश्च* "उभे रोदसी" द्यावा-पृथिव्यौ अस्मदीयं स्तोत्रं शृण्वन्तु चित्ते अवधारयन्तु।

अथ प्रत्यक्ष-कृताः—हे "देवाः"! "वः" युष्माकं "परिवक्ष्याणि" परिवर्जनीयानि यानि "वचांसि" स्तोत्राणि "आ

---

* "अपान्नपात् तनूनपा व्याख्यातः"—इत्यादि निरु० दै० ४,१८—१९। "तनूनपादाज्यं भवति नपादित्यननारायाः प्रजाया नामधेयम्"—इत्यादि निरु० दै० २, ५॥ "आपः—इत्यन्तरिक्षनामसु अष्टमं नैघण्टुकम् १,३। "नपात्"—इति अपत्यनामसु त्रयोदशं नैघण्टुकम् २,२। अग्नेर्मध्यस्थानत्वं जातत्वादिकञ्च यथा—"अपामुपस्थ उपस्थाने महत्यन्तरिक्षलोके आसीना महान्त इति वा गृह्णन् माध्यमिका देवगणा विश इव राजानमुपतस्थुः ऋग्मियमृग्मन्तमिति अर्चनीयमिति वा पूजनीयमिति वा। अहरद्दूतो देवानां विवस्वत आदित्याद्विवस्वान्विवासनवान् प्रेरितवतः परागतादस्याग्नेर्वैश्वानरस्य मातरिश्वानमाहर्तारमाह। मातरिश्वा वायुर्मातर्यन्तरिक्षे श्वसिति मातर्याश्वनितीति वाथैनमेताभ्यां सर्वाणि स्थानान्यभ्यापादं स्तौति॥ मूर्धा भुवो भवति नक्तमग्निस्ततः सूर्यो जायते प्रातरुद्यन्। मायामू तु यज्ञियानामेतामपो यत्तूर्णिश्चरति प्रजानन्। मूर्धा मूर्तमस्मिन् धीयते मूर्धा यः सर्वेषां भूतानां भवति नक्तमग्निस्ततः सूर्यो जायते प्रातरुद्यन्त्स एव। प्रज्ञां त्वेतां मन्यन्ते यज्ञियानां देवानां यज्ञसम्पादिनामपो यत् कर्म चरति प्रजानन् सर्वाणि स्थानान्यनुसञ्चरति त्वरमाणस्तस्योत्तरा भूयसे निर्वचनाय॥ स्तोमेन हि दिवि देवासो अग्निमजीजनञ्छक्तिभी रोदसिप्राम्। तमू अकृण्वन्त्रेधा भुवे कं स ओषधीः पचति विश्वरूपाः। स्तोमेन यं हि दिवि देवा अग्निमजनयञ्छक्तिभिः कर्मभिर्द्यावापृथिव्योरापूरणं तमकुर्वंस्त्रेधा भावाय पृथिव्यामन्तरिक्षे दिवीति शाकपूणिर्यदस्य दिवि तृतीयं तदसावादित्य इति हि ब्राह्मणं तदग्नीकृत्य स्तौत्यथैनमेतयादित्यकृत्य स्तौति"—इति निरु० दै० १, २६—२८।

अथ दशमी ।

१ २ ३ १ २ ३ १र २र ३ २
यशोमाद्यावापृथिवीयशोमेन्द्रबृहस्पती ।
२ ३ १ २ ३ १ २ ३ १ २
यशोभगस्यविन्दतुयशोमाप्रतिमुच्यताम् ॥
२ २ २ ३ २ ३ १ २ ३ १ २
यशस्वय३ःस्याः सꣳसदोऽहम्प्रवदितास्याम् ॥ १० ॥ २६

२ऽ १र २र १र र २ १र २ऽ
* हाउ३वा । यशोमाद्यावापृथिवी । हाउ३वा ।
१ र २र २र २ऽ २ र २
यशोमेन्द्रबृहस्पती । हाउ३वा । यशोभगस्यविन्दतु ।
२ र २र १ २ र २ऽ २
हाउ३वा । यशोमाप्रतिमुच्यताम् । हाउ३वा । यश
१ र २ १ २ऽ २ १ २ १र र
स्वियस्याःसꣳसदः । हाउ३वा । अहम्प्रवदितास्याम् ।
२ऽ १ २ १
हाउ३वा । अस्वमिष्टयि३हस् ॥ १२ † ॥ २६

वोचं" न ब्रवीमि अपितु समीचीनानीति । अतः, "वः" युष्माकम् "अन्तमाः" अन्तिकतमाः सन्तो वयं "सुम्नेष्वित्" युष्माभिर्दत्तेषु सुखेष्वेव ‡ वर्तमानाः "मदेम" मोदेम ॥

"यज्ञम्"—"यज्ञियाः"—इति पाठौ ॥ ८ ॥ २५

---

* "यशः"—इति षां०ब्रा०३,२,२३ ।

† आ०गा०३प०४,२,१२ ।

‡ "सुम्नम्"—इति सुखनामसु षोडशं नैघण्टुकम् ३, ६ ।

अथ एकादशी।

१ २ ३ २ ३क २र ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २
इन्द्रस्य नु वीर्य्याणि प्र वोचं यानि चकार प्रथमानि वज्री।*
२ ३ २ ३ २ ३ १ २ ३ २ ३ १ २ ३ १ २
अहन्नहिमन्वपस्ततर्द प्र वक्षणा अभिनत् पर्वतानाम्॥ ११॥ २७

वामदेवो महापङ्क्त्या स्तौति लिङ्गोक्तदेवता।

"द्यावापृथिवी" द्यावापृथिव्योः "यशः" "मा" स्तोतारम् "आविन्दतु" लभतां प्राप्नोत्वित्यर्थः। किञ्च, "इन्द्रबृहस्पती" इन्द्राबृहस्पत्योः † "यशः" "मा" मां विन्दतु। किञ्च, "भगस्य" आदित्यस्य ‡ "यशः" "मा" मां विन्दतु। बहुलेन यशसा यशोमया "मा प्रतिमुच्यताम्" न प्रमुच्यताम्। "यशस्त्रस्याः" अस्याः मम "संसदः" समूहस्य "यशः" न प्रमुच्यताम्। "अहं" प्रवदिता सर्वत्र प्रवक्ता "स्याम्" भूयासम्॥ १०॥ २६

---

* ऋ० १,२,३६,१।

† "तिस्र एव देवता इत्युक्तं पुरस्तात्तासां भक्ति-साहचर्यं व्याख्यास्यामः। * * * "अथैतानीन्द्रभक्तीनि। * * *। अथास्य संस्तविका देवा अग्निः सोमो वरुणः पूषा बृहस्पतिः ब्रह्मणस्पतिः पर्वतः कुत्सो विष्णुर्वायुः। अथापि मित्रो वरुणेन संस्तूयते पूष्णा रुद्रेण च सोमोऽग्निना च पूषा वातेन च पर्जन्यः"—इति निरु० दै० १,१०।

‡ "भगो व्याख्यातः तस्य कालः प्रागुत्सर्पणात्"—इत्यादि निरु० दै० ६,१३—१४ "जार आ भगम्। जार इव भगम्। आदित्योऽत्र जार उच्यते"—इत्यादि निरु० नै० ३,१६।

* वृत्रहत्यायहोइ। ३। अधृष्णवेहोइ। ३। अपूरवे
२ र१ २ १र र २ १र
होइ। २। अपूराव्वा२इ। पृथिवीञ्चाहोइ। विवर्त्तयाहो
२ १ २ १ २र१र
इ। २। विवर्त्तीया२। अन्तरिक्षꣳहोइ। ३। सुधारया
२र१ २ १र र २र१र
होइ। २। सुधारराया२। दिवंवेपाहोइ। ३। अवेप्रयो
२ र१ १ १ऽ
होइ। २। अवेपाया२ः। होइ। २। इवे२। हा
१ ऽ १ २१ २ १
३१उवा२। इन्द्र२। २। इन्द्र। स्यनूं। २। स्यनू३। आ
१ २र १र ३१ २ १
उ। वा२। वीर्य्याणि। प्रवा। २। प्रवा३१उ। वा२३।
२ ११११ १र र ऽ १र २१ २
चा२३४५म्। यानी२। २। यानि। च्चका। २। चका३१
१ २ १र २१ २ १
उ। वा२। रप्रथमा। निवा। २। निवा३१उ। वा२३।
२ ११११ १ ऽ १ २१
ज्री२३४५। अह२न्। २। अहन्। अंहाइम्। २।
२ १ १२१ २१ २
अहा३१उ। वा२। अन्वपः। ततां। २। तता३१उ। वा
३ ११११ १ ऽ १ २१ २
२३। दा२३४५। प्रव२। २। प्रव। क्षणाः। २। क्षणा३१

---

* "वार्त्रघ्नम्"—इति आ० भा० ३, २, १३।

उ। वा२। अभिनत्या। वंता। २। वंता३१उ। वा२३।

२ १११र   २ १ र   २ १ र

नार३४५म्। वृत्रहत्यायहोइ। ३। अधष्णावेहोइ। ३।

२ र१र   २ र१   २ १र र

अपूर्वेहोइ। २। अपूरावा२इ। पृथिवीञ्चाहोइ। ३।

२ १ र   २ १   २१

विवर्त्तयाहोइ। २। विवर्त्तायां२। अन्तरिक्षंहोइ। ३।

२ र १र   २र१   २ १र र

सुधारयाहोइ। २। सुधरराया२। दिवंवेपाहोइ। ३।

२र१र   २र १   १   १ र

अवेपयोहोइ। २। अवेपाया२ः। होइ। २। ऊवे। २।

२   १र २ १र २ १र

हा३१उवा२। ए। वृत्रहासपत्नहा। ३॥ १७*॥ २७

दृष्टा हिरण्यस्तूपेन त्रिष्टुबेषेन्द्रदेवता।

"वज्री" वज्रयुक्त इन्द्रः "प्रथमानि" पूर्वसिद्धानि मुख्यानि वा "यानि" "वीर्याणि" पराक्रमयुक्तानि "कर्माणि" चकार। तस्य "इन्द्रस्य" तानि वीर्याणि। "नु" क्षिप्रं "प्रवोचं" प्रब्रवीमि। कानि वीर्याणीति? तदुच्यते—"अहिं" मेघम्† "अहन्" हतवान्। तदेकं वीर्यम्। "अनु" पश्चाद् "अपः" जलानि

---

* आ० गा० ३प० ४, २, १७।

† "अहिः"—इति मेघनामसु एकविंशतितमं नैघण्टुकम् १, १०।

अथ द्वादशी।

२ १२ ३१२ २ १२
अग्निरस्मिजन्मनाजातवेदा
३ २ ३ १ २ ३ १ २ ३ २
घृतम्मेचक्षुरमृतम्मआसन्।
२ १ २३ १र २र ३ १र
त्रिधातुरर्कोरजसोविमानो
२र ३ १ २ ३ १ २ ३ १ २
जस्रञ्ज्योतिर्हविरस्मिसर्वम् ॥ १२ ॥ २८*

२ऽ २ १ २ १ २र ३ १ र २र १ र
† हाउ३वा। अग्निरस्मिजन्मनाजातवेदाः। इडा।
१ १ र २ऽ २ १ २र १ २१ २ र १
सुवः। इडा। हाउ३वा। घृतम्मेचक्षुरमृतम्मआसन्।
१ र १ १र २ऽ २ १र २ १र २र
इडा। सुवः। इडा। हाउ३वा। त्रिधातुरर्कोरजसो

"ततर्द" हिंसितवान् भूमौ पातितवानित्यर्थः। इदं द्वितीयं वीर्यम्। "पर्वतानां" सम्बन्धिनीः "वक्षणाः" प्रवहणशीला नदीः† "प्राभिनत्" कूलद्वय-कर्षणेन प्रवाहितवानित्यर्थः। इदं तृतीयं वीर्यम् ‡ ॥ ११ ॥ २७

---

* ऋ॰२,२,२१,१—२,१,२०,२—२,२,५,१४।

† "अग्नेरिडाहम्पञ्चानुगानम्"—इति ग्रा॰गा॰४,२,२४। अस्यैव द्वितीयमेतत्।

† "वक्षणाः"—इति नदीनामसु नवमं नैघण्टुकम् १, १३।

‡ "अथास्य कर्म रसानुप्रदानं वृत्रवधो या च का च बलकृतिरिन्द्र-कर्मैव तत्"—इति निरु॰ दै॰ १, १०। वृत्रवधो मेघ-वध इति तद्भाष्यम्।

१र २ २ १ १ २ २१ १ २
विमानः। इडा। सुव.। इडा। हाउ३वा। अजस्र
१र २१ २ १ २ १ र १ १ र
ज्योतिर्हविरस्मिसर्व्वम। इडा। सुवः। इडा॥ २*॥ २८

विश्वामित्रऋषिस्त्रिष्टुप्छन्दस्त्वग्निरिति द्वयोः*।

उत्तराग्नेः स्तुतिः पूर्वा स्तुतिः सर्वात्मनात्मनः।

हे कुशिकाः! भोक्तृ-भोग्य-भावेन द्विविधम् इदं सर्वं जगत्। "एतावद्वा इदमन्नं चैवान्नादश्च सोम एवान्न मग्नि रन्नादः"—इति श्रुतेः। तत्र सकल-भोक्तृ-वर्ग-रूपेणान्नादोऽग्निः। स च अग्निवाय्वादित्य-भेदेन त्रेधा भूत्वा पृथिव्यन्तरिक्ष-द्युलोकानधितिष्ठति। तदुक्तं वाजसनेयके—"स त्रेधात्मानं व्यकुरुतादित्यं द्वितीयं वायुं तृतीयम्"—इति।

तत्र सः "अग्निः" अहं "जन्मना" एव "जातवेदाः" "अस्मि" श्रवण-मननादि-साधन-नैरपेक्ष्येण स्वभावत एव साक्षात्कृत-परतत्त्वस्वरूपोऽस्मि। "घृतं मे चक्षुः" यदेतद्विश्वस्यावभासकं मम स्वभावभूतम्प्रकाशात्मकं चक्षुः तद् घृतम् इदानी मत्यन्तं दीप्तम्। यदेतद् "अमृतं" कर्म-फलं दिव्यादि-विविध-विषयोपभोगात्मकं तत् "मे" मम "आसन्" आस्ये वर्तते। सकल-भोक्तृ-वर्गात्मना स्वयमेवावस्थानात् †। एवं स्वात्मनः पृथिव्याधिष्ठातृ-रूपता मभिधाय वाय्वात्मनान्तरिक्षाधिष्ठातृता माह—अर्को जगतः स्रष्टा

---

* आ० गा० ३प० ५, १, २।

प्राणः। "सोऽर्चन्नचरत्तस्यार्चत आपो जायन्तार्चतैव मेक मभूदिति तदेवार्कस्यार्कत्वम्"—इति श्रुतेः। स प्राणः अहं "त्रिधातुः" त्रिधात्मानं विभज्य तत्र वाय्वात्मना "रजसः" अन्तरिक्षस्य "विमानः" विमाता अधिष्ठातास्मि॥ तथा आदित्यरूपेण द्युलोकाधिष्ठातृता माह—"अजस्रं ज्योतिः" अनुपक्षीणं नित्यं तेजः प्रकाशात्मा द्युलोकाधिष्ठाता आदित्योऽप्यह मस्मि। एवं भोक्तृरूपता मात्मनोनुसन्धाय भोग्यरूपता मप्यनुसन्धत्ते। यत् "हविः" भोग्यं प्रसिद्ध मस्ति तत् "सर्वम्" अप्यह मेवास्मि*।

यद्वा। अहम् "अग्नि रस्मि" देवानां हविः-प्रापणात् अङ्गनादिगुण-युक्तोऽस्मि। किञ्च, "जन्मना" उत्पत्त्या "जातवेदाः" जातज्ञानोऽस्मि। उत्पत्ति-क्षण एव सर्वज्ञोऽह मस्मि। अथवा जातं सर्वं स्वात्मतया वेत्तीति जातवेदाः सर्वात्मक इत्यर्थः। तत् कथम्? इत्युच्यते—"घृतं मे चक्षुः" यदेतद् घृतं प्रसिद्धमस्ति तन्मे चक्षुः-स्थानीयम, यथा लोके चक्षुर्भासकम् एवं घृतमपि प्रक्षिप्तं ज्वालामुत्पादयत् मम भासकम्। "अमृतं" प्रभारूपं यदमृत मविनाशि ज्योतिः "मे" मम "आसन्" आस्ये वर्त्तते। "त्रिधातुः" प्राणापानव्यानात्मकस्त्रिधा वर्त्तमानोऽर्कोऽर्चनीयो यः प्राणोऽस्ति सोऽप्यह मेवास्मि। तथा "रजसः" अन्तरिक्षस्य "विमानः" विशेषेण मातृ परिच्छेत्ता वायुश्चाह मस्मि। किञ्च। "अजस्रं ज्योतिः" नैरन्तर्येण तापकः सूर्यश्चाह मस्मि। किं बहुना। आज्य-पुरोडाशादिरूपं यदेतद्धवि रस्ति तदुपलक्षितं तत्सर्व मप्यह मस्मि। "सर्वं खल्विदं ब्रह्म"—इति

---

* अत्र यट्टीकायितव्यं तत् पुरस्तादेवाहमस्मिप्रथमजा ऋतस्येत्यत्र टीकितम्।

अथ त्रयोदशी ।

२ ३ २ ३ १र २र ३ १र
पात्यग्निर्विपो अग्रम्पदंवेः
१र ३ १र २र ३ १ २
पातियह्वश्चरणꣳसूर्य्यस्य ।
३ १ २ ३ १ २ ३ १र
पातिनाभा सप्तशीर्षाणमग्निः
२र ३ १ २ ३ १ २ ३ २
पातिदेवानामुपमादमृष्वः ॥ १३ ॥ २९ *

॥ तृतीय-दशति ॥

१र २र र १ २र २
† हाउ । ३ । पात्यग्निर्विपो अग्रम्पदंवेः । हाउ३१उवा
३ ५ २ २ ३
२३ । सू२३४वाः । इह । हा३१उवा२३ । ज्यो२३४
५ १र २र र १ १र २
तीः । हाउ । ३ । पातियह्वश्चरणꣳसूरियास्या । हा३
३ ५ २ १ ३
१उवा२३ । सू२३४वाः । इह । हा३१उवा२३ । ज्यो२

श्रुतेः । तमनेकधाम्नः सर्वात्मकत्व-प्रतिपादनेन परब्रह्मत्व मुक्तं भवति ॥

“अजस्र”-“वर्मः”—इति साम-ऋचः पाठ-भेदः ॥ १२ ॥ २८

---

* ऋ० ३,१,९,१—३,१,२५,१—३,१,२५,३ ।

† इदमपि तस्यैवाम्नातं तृतीयम् ।

२र र र र र १ २ २
३४तीः। हाउ। २। पातिनाभासप्तशीर्षाणमग्निः। हा
३ ५ २ २ २
३१उवा२३। सू२३४वाः। इह। हा३१उवा २३ ज्यो२३४
५ २र २र र र र र १ २ २
तीः। हाउ। ३। पातिदेवानामुपपादमार्षः। हा३१
२ ५ २ २ २
उवा२३। सू२३४वाः। इह। हा३१उवा२३। ज्यो२३
५
४तीः॥ ३ * ॥ २९

"अग्निः" "वेः" गन्तव्याः † सर्वत्र व्याप्तायाः "विपः" रिपः भूम्याः ‡ "अग्रं" मुख्यं "पदं" "स्थानं" "पाति" रक्षति। "यह्वः" महान् ¶ अग्निः "सूर्यस्य" "चरणं" चरत्यनेनेति चरणमन्तरिक्षं § "पाति"। "नाभा" ‖ नाभौ अन्तरिक्षस्य मध्ये "सप्तशीर्षाणं" सप्तगणं मरुद्गणं "पाति"। "ऋष्वः" दर्शनीयोऽयम् +

---

* आ० गा० २प० ५, १, ३।

† "वेः—इति वेतेर्गतिकर्मणो रूपम्, नै० २, १४, १८।

‡ "विपः"—इति रिप इत्यस्य रेफव्यत्यये वकारभावे रूपम्, "रिपः"—इति तु पृथिवी-नामसु यथोद्दिष्टं नैघण्टुकम् १, १।

¶ "यह्वः"—इति महन्नामसु यथोद्दिष्टं नैघण्टुकम् ३, ३।

§ "चरणमन्तरिक्षनामसु "अध्वा"—इति (नै० १, ३, १२)

‖ सुपां सुलुगित्याले रूपम् (पा० ३, १, ३९)।

+ "ऋष्वः"—इति पठ्यते रूपमिदम् निरु० १,२०—१०,१६—१२,१७—१४,१३।

अथ चतुर्थखण्डे—

सैषा प्रथमा।

१ र   २ १ १ ३ २ ३ १ १
भ्राजन्त्यग्नेसमिधानदीदिवोजिह्वाचरत्यन्तरासनि।
१र २र २ १ २ १ २ ३१र २र २ १ २
सत्वन्नोअग्नेपयसावसुविद्रयिंवर्च्चोदृशेदाः॥ १ ॥ ३०

रर र र१ २ १र र २
* भ्राजाऔहोहोवाइ। त्यग्नेसमिधानादी१दिवा२ः।
२ र र१ २ १ २ २ र र
जिह्वाऔहोहोवाइ। चरत्यन्तारा१सानी२। सत्वाऔ
१ २ १र र र २ २ २१ २ २र २
होहोवाइ। नोअग्नेपयसावसू२वीत्। रयिंवर्चोदृशौहो
१ १ २ ४ ५ ४
३। ऊम्मा२। हा। औ३होवा। हो५इ। डा॥ ५ † ॥ ३०

"अग्निः" "उपमादम्" "देवानाम्" उपमादकं यज्ञं "पाति" रक्षति॥

"पात्यग्निर्विपोअग्रम्" — "पातिप्रियेरिपोअग्रम्" -- इति पाठौ॥ १३॥ २९

इति श्रीमत्सायणाचार्य्य-विरचिते माधवीये सामवेदार्थ-प्रकाशे
छन्दोध्याव्याख्याने षष्ठस्याध्यायस्य तृतीयः खण्डः॥ ३॥

---

* तस्यैव पञ्चम मिदम्।

† आ० गा० ३ प० ५, १, ५।

अथ द्वितीया।

३ १र २र ३ १र २र
वसन्तइन्नुरन्त्योग्रीष्मइन्नु रन्त्यः।
२ १र २र ३ १ २ ३ १र २र१ १र २र
वर्षाण्यनुशरदोहेमन्तःशिशिरइन्नुरन्त्यः ॥ २ ॥ ३१

२ ४ २ ४ ५ १र २
* वा५सन्तः। ई३न्नू३रन्तायाः। ग्रीष्मइन्नुरा१
२ २ २१र १ १ २ २ १र
सौ३याः। वर्षाण्यनुशा३। हुम्। रा३दाः। हेमन्तः
३ २ २ १ १ १
शिशिरइन्नुरा२र्न्तियाउ। वा३४५॥ ८ १† ॥ ३१

वामदेव ऋषिः पङ्क्तिर्भ्राजन्त्यग्न इति द्वयोः।
आग्नेयी प्रथमर्तव्या द्वितीया दृश्यते तयोः॥

"समिधान" ऋत्विग्भिः समिध्यमान ! दीप्त ! हे "अग्ने !" "भ्राजन्ती" प्रकाशमाना "आसनि" आस्ये "अन्तर्" मध्ये स्थिता त्वदीया "जिह्वाः"‡ हवींषि "चरति" भक्षयति। हे "अग्ने" ! "वसुवित्" ! धनलम्भक ! त्वम् "अस्मभ्यम्" "पयसा" अन्नेन सह "रयिं" रमणीयं धनं "दृशे" दर्शनाय "वर्चः" तेजश्च तेजस्वित्वं वा "अदाः" देहि ॥ १ ॥ ३०

---

* "ऋतुष्ठा"—इति आ० ब्रा० ३, २, २४।

† आ० गा० ३प० ५, १, ९।

‡ "जिह्वा"—इति वाङ्नामसु च दृश्यते १,११। अग्नेश्च जिह्वाः सप्त काली-करालीत्येवमाद्याः प्रसिद्धाः, ता एव पुनः ससाः इत्यप्यन्यत्र।

“वसन्तः इन्नु” वसन्तएव चैत्र-वैशाखरूपो 'वसन्तऋतुरेव “रन्त्यः” रमणीयः भवति। “ग्रीष्मइन्नु” ज्येष्ठाषाढरूपो ग्रीष्म ऋतुरेव “रन्त्यः” रमणीयः। “वर्षाणि” वर्षा श्रावण-भाद्रपद-रूपेणावयवीभूतः प्रावृट् ऋतुरेव “रन्त्यः” रमणीयः। “तान्यनु’ “शरदः” आश्विन-कार्त्तिकरूपेणावयवीभूत ऋतुः “रन्त्यः” रमणीयः। “हेमन्त ” मार्गशीर्ष-पौषरूप एव “रन्त्यः” रमणीयः। “शिशिरइन्नु” माघ-फाल्गुनरूप एव “रन्त्यः” रमणीयः * ॥ २ ॥ ३१

---

* अत्रोपनिषत् तद्व्याख्यानञ्च यास्क-कृतम्—सप्तयुञ्जन्तिरथमेकचक्रमेकोअश्वो वहतिसप्तनामा। त्रिनाभिचक्रमजरमनर्वं यत्रे माविश्वाभुवनाधितस्थुः। सप्त युञ्जन्ति रथ मेकचक्र मेकचारिणम् चक्रञ्चकतेर्वा चरतेर्वा क्रामतेर्वैको अश्वो वहति सप्तनामादित्यः सप्तास्मैरश्मयो रसानभिसन्नामयन्ति सप्तैन मृषयस्तुवन्तीति वेद मपीतरन्नामतस्मा देवाभिसन्नामात्। संवत्सरप्रधान उत्तरोऽर्द्धर्चस्त्रिनाभिचक्रं त्र्यृतुः संवत्सरो ग्रीष्मो वर्षा हेमन्त इति। संवत्सरःसंवसन्तेऽस्मिन् भूतानि। ग्रीष्म ग्रस्यन्ते अस्मिन्रसा वर्षा वर्षत्यासु पर्जन्यो हेमन्तो हिमवान्। हिमं पुनर्हन्तेर्वा हिनोतेर्वा न अजर मजरणधर्माण मनर्व मप्रत्यृत मन्यस्मिन्। यत्रेमानि सर्वाणि भूतान्यभि सन्तिष्ठन्ते तं संवत्सरं सर्वमात्राभि स्तौति। पञ्चारे चक्रे परिवर्त्तमान इति पञ्चर्त्तुतया। पञ्चर्त्तवः संवत्सरस्येति च ब्राह्मणं हेमन्त-शिशिरयोः समासेन षडर आहुरर्पित मिति षडृतुतया। अराः प्रत्यृता नाभौ। षट् पुनः सहतेः। द्वादशारन्नहितज्जराय। द्वादशप्रधयश्चक्रमेकमितिमासानां। मासा मानात्। प्रधिः प्रहितो भवति। तस्मिन् साकन्त्रिशतानशङ्कवोऽर्पिताःषष्टिर्नचलाचलासः। षष्टिश्च ह वै त्रीणि च शतानि संवत्सरस्याहोरात्रा इति च ब्राह्मणं समासेन। सप्तशतानि विंशतिश्चतस्थुः। सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्रा इति च ब्राह्मणं विभागेन”—इति निरु० नै० ४, २७।

अथ तृतीया ।

३ १ २　२ १ २　３ २ ३ १ २
सहस्रशीर्षाः पुरुषः सहस्राक्षः सहस्रपात् ।
१र २र ३१ २ ३ ७ २　३ २
स भूमिꣳ सर्वतो* वृत्वात्यतिष्ठद्दशाङ्गुलम् ॥ ३ ॥ ३२ †

२ १　२　२ १ र र　२　२
‡ उहुवाहाउ । ३ । सहस्रशीर्षाः पुरु२३षाः । सह-
र १ २ २　२　१र　२ १र　२ १
स्राक्षः सहस्रा२३पात् । स भूमिꣳ सर्वतोवा२३र्त्वा । अत्यति
२ १र　२　२ १ २　२ १ २
ष्ठद्दशाङ्गु२३लाम् । उहुवाहाउ । २ । उहुवा३हाउ ।
२　१　१ १ १ १
वा३ । इट् इडा २३४५ ॥ १३ ¶ ॥ ३२

सर्व-प्राणि-समष्टि-रूपो ब्रह्माण्ड-देहो विराडाख्यो यः पुरुषः सोऽयं "सहस्रशीर्षाः" सहस्र-शब्दस्योपलक्षणत्वात् ‖ अनन्तैः शिरोभिर्युक्त इत्यर्थः । यानि सर्व-प्राणिनां शिरांसि तानि सर्वाणि तद्देहान्तःपातित्वात्तदीयान्येवेति सहस्र-शीर्ष-त्वम् । एवं सहस्राक्षत्वं सहस्रपादत्वं च । स पुरुषो "भूमिं"

---

* "विश्वतो"—इति ऋ० ।　† ऋ० ८, ४, १७, १ ।

‡ "ह पुरुषव्रतं"—इति आ० ग्रा० ३,२,२५ ।

¶ आ० गी० ३प० ५, १, १३ ।

‖ "सहस्रम्"—इति [illegible] ३, १ ।

अथ चतुर्थी।

१ २ ३ २उ ३ १२१ १ २ ३ १२३ १२
त्रिपादूर्ध्व उदैत्पुरुषःपादोस्येहाभवत्पुनः।
२ ३ २ ३क १र ३ १ ३ २
तथा*विष्वङ्व्यक्रामदशना † नशनेअभि ॥ ४ ॥ ३३ ‡

२ १ र र २ १र र र २
¶ उहुवौहोवा २। ३। त्रिपादूर्ध्वउदैत्पुरु२३षाः।
१र र र र २१ २ १ र २ १ २
पादोस्येहाभवत्पू२३नाः। तथाविष्वङ्वियक्रा२३मात्।
२ र र २ २१रर २१
अशनानशनेआ२३भौ। उहुवौहोवा २। २। उहु
र १ ३ ५र ३ ५ २१
वौ। हो२। वा२३४। औहोवा। ई२३४डा। उहु
र र २१र १ ३ ५र र
वौहोवा२। २। उहुवौ। हो२। वा२३४। औहो

ब्रह्माण्ड-गोलक-रूपां सर्वतः "भूमिं" समन्तात् "वृत्वा" परिवेष्ट्य दशाङ्गुल-परिमितं देशम् "अत्यतिष्ठत्" अतिक्रम्य व्यवस्थितः। दशाङ्गुलमित्युपलक्षणम्। ब्रह्माण्डाद्बहिरपि सर्वतो व्याप्यावस्थित इत्यर्थः ॥ ३ ॥ ३२

---

* "ततो"—इति ऋ०।

† "साशना"—इति च ऋ०।

‡ ऋ० ८, ४, १७, ४।

¶ तच द्वितीयम्।

अथ पञ्चमी ।

१ २ १ २उ　　२ २ १ २उ २ १ २
पुरुषएवेद९*सर्वयद्भूतंय्यच्चभाव्यम् † ।

२　　५　　२ १ र २र
वा । ह्र२३४वाः । उहुवौहोवा २ । २ । उहुवौ ।

१　　२　　५र र　　२ १ १ १ १
होइ । वा२३४ । औहोवा । ऊ२३४५ ॥ १४ ‡ ॥ ३३

योऽयं "त्रिपात् पुरुषः" संसार-स्पर्श-रहितः बहुल-स्वरूपः सोऽयम् "ऊर्ध्व उदैत्" अस्मादज्ञान-कार्य्यात्संसाराद्बहिर्भूतः सन् तत्रत्यैर्गुणदोषैरस्पृष्टः उत्कर्षेण स्थितवान्। "अस्य" योयं "पादः" लेशः सोऽयमिह मायायां प्रादुरभवत्। सृष्टि-संहाराभ्यां पुनः पुनरागच्छदिति [अस्य सर्व्वस्य जगतः परमात्म-लेशत्वं भगवताप्युक्तम्—"विष्टभ्याह मिदं कृत्स्न मेकांशेन स्थितो जगदिति"] तथा मायाया मागत्यानन्तरं "विष्वङ्" देव-तिर्य्यगादि-रूपेण विविधः सन् "व्यक्रामत्" व्याप्तवान्। किं कृत्वा? "अशनानशने" अभिलक्ष्य अशनं भोजनादि-व्यवहारोपेतं चेतनं प्राणि-जातम्, अनशनं तद्रहित मचेतनं गिरि-नद्यादिकम्। तदुभयं यथा स्यात्तथा। यमेव विविधो भूत्वा व्याप्तवानित्यर्थः ॥ ४ ॥ ३३.

---

* "पुरुष्वेदं"—इति }
† "भव्यम्"—इति । } ऋग्वेदीय-पाठौ ।

‡ आ० गा० ४प० ५, १, १४ ।

१ २ ३ १ २ ३ १ २ ३ १ २ ३ १ २ ३ २
पादोस्यसर्वाभूतानित्रिपादस्यामृतन्दिवि *॥ ५॥ ३४†

२ र १ २ र २
‡ हुयौहोवा२। ३। पुरुषएवेद९सा२३र्वाम्।

१ र २ १ र २ र र र र २ २
यद्भूतंयच्चभावा२३याम्। पादोस्यसर्वाभुता२३नी। त्रि

१र र २ १ २ १ र र १र
पादस्यामृतन्दा२३इवी। हुयौहोवा२। २। हुयौहो२

२ ५र र ३ ५ १ र र
वा२३४। औहोवा। ई२३४डा। हुयौहोवा२। २।

१ र १ २ ५र र ३ ५ १ र
हुयौहो२। वा२३४। औहोवा। ज्यो२३४ती:। हुयौ

र १ र १ ३ ५र र
होवा२। २। हुयौ। हो२। वा२३४औहोवा

२ १ १ १ १
ई२३४५॥ १५ ¶॥ ३४

यत् "इदं" वर्त्तमानं जगत् तत् "सर्व" "पुरुषएव"। "यद्भूतम्" उत्पन्नं जगत् "यच्च भाव्यं" भविष्यज्जगत् तदपि पुरुषएव यथास्मिन् काले वर्त्तमानाः प्राणिनः सर्वेऽपि चराचरात्मकपुरुष-

---

* "उतामृतत्व"—इत्यादिश्च ऋग्वेदीयः।

† ऋ० ८, ४, १७, ४।

‡ "त्रीणि लोकानां-अमृतानि, दिवः"—इति षा० ब्रा० ३, २, २५।

¶ आ० गा० १प०५,१,१५।

अथ षष्ठी।

२उ ३ १ २ ३ १ २
तावानस्य*महिमाततो†ज्यायाꣳश्च पूरुषः।
३ १ २ ३ १ २र ३ १र ३र ३ १ २
उतामृतत्वस्येशानोयदन्नेनातिरोहति‡॥ ६ ॥ ३५¶

२र १र र २ १ २ २र
§ हाउ। ३। तावातस्य। महा२३इमा३। हाउ

स्यावयवाः तथैव गतागामिनो रपि कल्पयोर्द्रष्टव्य मित्यभिप्रायः। एतदेवोभयं स्पष्टीक्रियते—“अस्य” पुरुषस्य “सर्वाणि भूतानि” काल-त्रय-वर्त्तीनि प्राणि-जातानि “पादः” चतुर्थोंऽशः। “अस्य” पुरुषस्यावशिष्टं “त्रिपात्” स्वरूपम् “अमृतं” “विनाश-रहितं” सत् “दिवि” द्योतनात्मके स्व-प्रकाश-स्वरूपे व्यवतिष्ठत इति शेषः। [यद्यपि “सत्यं ज्ञान मनन्तं ब्रह्म”-इत्यनन्तस्य परब्रह्मणोहीयदन्तत्वाभावात् पादचतुष्टयं निरूपयितु मशक्यं, तथापि जगदिदं ब्रह्म-स्वरूपापेक्षया स्वल्पमिति विवक्षितत्वात् पादत्वोपचारः॥ ५ ॥ ३४

---

* “एतावानस्य”—इति,
† “यतो”—इति, } ऋ०।
‡ “पादोऽस्येहा”—इत्यादिश्च
¶ ऋ० ७, ४, १७, ३।
§ “अन्तरिक्षस्य”—इति आ० ब्रा० ९,२,२१। व्रतमिति शेषः।

अथ सप्तमी ।

१ २ २ १ २ ३ २ ३ १ ३१२
ततो*विराड† जायतविराजोअधिपूरुषः ।
२ ३ १र २र ३ २उ ३ १ २ ३ २
सजातोअत्यरिच्यतपश्चाद्भूमिमथोपुरः ॥ ७ ॥ ३६ ‡

१ र र र २ १र २ २र २ १र
३ । ततोज्यायाꣳश्चपूरू२३षा३ः । हाउ । ३ । उता-
र २ २र १ र र २ १र
मृतत्वस्येशा२३ना३ः । हाउ । ३ । यदन्नेनातिरोहा
२ २ऽ २ १ १ १ १ १
२३ती३ । हाउ३ । वा३ । इट् इडा२३४५ ॥ १६ ¶ ॥ ३५

अतीतानागतवर्त्तमान-रूप-जगदाद्याधारो योऽस्ति "तावान्" सर्वोऽपि "अस्य" पुरुषस्य "महिमा" स्वकीय-सामर्थ्य-विशेषः । न तु तस्य वास्तवं स्वरूपम् । वास्तवस्तु "पुरुषः" "ततः" महिम्नोऽपि "ज्यायान्" अतिशयेनाधिकइत्यर्थः । "उत" अपिच "अमृतत्वस्य" देवत्वस्य "अयम् ईशानः" स्व-मायया "यत्" यस्मात् कारणात् "अन्नेन" प्राणिनां भोग्येन अन्नेन निमित्त-भूतेन "अतिरोहति" स्वकीयां कारणावस्था मतिक्रम्य परिदृश्यमान-जगदवस्थां प्राप्नोति । तस्मात् प्राणिनां कर्म फल-भोगाय जगदवस्था-स्वीकारात् नेदन्तस्य वस्तु-तत्व मित्यर्थः ॥ ॥ ६ ॥ ३५

---

* "तस्माद्"—इति, } ऋ० ।
† "विराज"इति च, } ऋ० ।
‡ ऋ० ८,४,१७,५ । ¶ आ० गा० २प० ५,१,१६ ।

२ऽ   १ र २ १र २र   २ऽ   २ १र
हाउ३वा । ततोविराडजायत । हाउ३वा । विरा
३ २ १र २   २ ऽ   १ २र १र   २
जोअधिपूरुषः । हाउ३वा । सजातोअत्यरिच्यत ।
ऽ   २ १र र २ १ र २ १   २ ऽ २   २ १ १
हाउ३वा । पश्चाद्भूमिमथोपुरः । हाउ३वा३ । ई२३
१ १
४५ ॥ १७ ॥ ३६

"विष्वङ् व्यक्रामत्"—इति यदुक्तं तदेवात्र प्रपञ्चयते—"ततः" तस्मादादि-पुरुषात् "विराट्" ब्रह्माण्ड-देहः "अजायत" उत्पन्नः । [विविधानि राजन्ते वस्तून्यत्रेति विराट् ‡] "विराजो अधि" विराड्देहस्योपरि तमेव देहमधिकरणं कृत्वा "पुरुषः" तद्देहाभिमानी कश्चित् पुमानजायत । योऽयं सर्व-वेदान्त-वेद्यः परमात्मा सएव रूपेण प्रविश्य ब्रह्माण्डाभिमानी देवतात्मा जीवोऽभवत् [एतच्चाथर्वणिकउत्तरतापनीये विस्पष्टमामनन्ति—"स वा एष भूतानीन्द्रियाणि विराजं देवताः कोशांश्च सृष्ट्वा प्रविश्य मूढो मूढइव व्यवहरन्नास्ते माययैवेति"] । "स जातः" विराट् पुरुषः "अत्यरिच्यत" अतिरिक्तोऽभूत् । विराड्व्यतिरिक्तो देव-तिर्य्यङ्मनुष्यादिरूपोऽभवत् । पश्चाद्देवादि-जीव-भावादूर्ध्वं भूमिं ससर्जेति शेषः । "अथो" भूमि-सृष्टेरनन्तरं तेषां जीवानां "पुरः" ससर्ज [पूर्य्यन्ते सप्तभि र्धातुभि रिति पुरः] शरीराणि ॥ ७॥ ३६

---

* "पृथिव्याः"—इति छा० ब्रा० ३,२,२५ । व्रतमिति शेषः ।

† छा० आ० ३प० ५, १, १७ ।

‡ "विराट् विरमणाद्विराजनाद्वाविराधनाद्वा"—इति दै० ब्रा० ३, १२ ।

मन्येशामिति पञ्चर्चो वामदेवेन वीक्षिताः ।
अत्राद्यैकान्तिमे च द्वे त्रिष्टुभस्तासु चादिमा ॥
उपरिष्टाज्ज्योतिरिति बहु चैव विधीयते ।
अन्त्ये, अनुष्टुभौ द्यावा-पृथिव्योः प्रथमा तथा ॥
द्वितीयैन्द्री चतुर्थी च तृतीयाग्नेर्निजात्मनः ।
स्तुतिर्गवा मन्तिमेति छन्दोदेवत निर्णयः ॥

अथ अष्टमी ।

१ २ ३ १ २ ३
मन्येवान्द्यावापृथिवीसुभोजसौ
१र २र ३ १ २ ३ १र २र
येअप्रथेथाममितमभियोजनम् ।
१ २ ३ १ २ ३ १र २र ३ १ २
द्यावापृथिवीभवतꣳस्योनेतेनोमुञ्चतमꣳहसः ॥ ८ ॥३७*

१ २र १ २ र र र र र
† ऊवाइ । ३ । हुपम् । मन्येवान्द्यावापृथिवीसू३
१ २ र र र १ २
भोजा१सा२उ । येअप्रथेथाममितमभी३योजा१ना२म् ।

---

* ऋ० आ० ५, १९, २०, २१ ।

† "द्यावापृथिव्योः"—इति आ० ब्रा० ३, २, २५ ।

२र र र १ २ १र र १
द्यावापृथिवीभवा२स्ता३ऽस्यो१ना २इ । तेनोमुञ्चंता३मा३ऽ
१ २र ३ ५र र
हा१सा २: । ऊवाइ । ३ । हूपार । वा२३४औहोवा ।
२र र १
ए । हूपम् । ३ ॥ १९ * ॥

२ १र २ १ २ र र र र
† प्रतिष्ठासिप्रति । ष्ठा । ३ । वर्चोसिमनोसि । ए.ही ।
२ र र र र र र र र र २र र र
मन्येवान्द्यावापृथिवीसुभोजसावैही । येअप्रथेथाममितम
र र र र २र र र र र र र
भियोजनामैही । द्यावापृथिवीभवतऽस्योना । ऐही ।
२र र र र र २ १र २ १ २
तेनोमुञ्चतमऽहसाऐही । प्रतिष्ठासिप्रति । ष्ठा । ३ । व
र र र २ २र २र १
र्चोसिमनोसि । ऐही३ । हाउवा१ ए । भूतम् । ३ ।
॥ २१ ‡ ॥ ३७

हे "द्यावापृथिवी" द्यावापृथिव्यौ ! "वां" युवां "सुभोजसौ" शोभन-पालयिताराविति "मन्ये" अहं जानामि हे द्यावापृथिव्यौ! "अमितम्" अपरिमितं "योजनं" [युज्यते पुरुषोऽनेनेति योजनम्] धनादि, तत् "अभ्यप्रथेथाम्" अभिविस्तारयतम् । हे

---

* आ० गा० ३प्र० ५, १, १९ ।

† "विपरीते"—इति सा० ब्रा० ३, ९, २५ । तत्र द्वितीयम् ।

‡ आ० गा० ३प्र० ५, १, २१ ।

अथ नवमी ।

१ २ ३ १ २ ३ १ २ ३ २ २ १ २
हरीतइन्द्रश्मश्रूण्युतोतेहरितौइरी ।
१ २ ३ १ २ ३ १ २ ३ १ १
तन्त्वास्तुवन्तिकवयःपुरुषासोवनर्गवः ॥ ९ ॥ ३८

२ र १ २ २ १र र १ २ २ २ १र
* हरीतइन्द्रश्मश्रूणी । उतोतेहरिता१उहाइरी । तान्त्वा
२ ४ ५ २ १र र २ ४ ५
स्तुवन्तिका३ । वायाः । पुरुषासोवना३ । गावाः ।
१ र २ १ २ १ २ १ २ १ र
ऋष्यासइन्द्रभङ्क्तिमघवन्निन्द्रभुङ्क्तिभङ्तिप्रभुङ्क्तौ
२ र २ १ १ १ १
न्द्रस्तसरपूता२३४५ः ॥ २२ † ॥ ३८

"द्यावापृथिवी" द्यावापृथिव्यौ! युवां अस्माकं "स्योने" सुख-रूपे‡ स्व-सुख कार्य्यैं "भवतम्" "ते" द्यावापृथिव्यौ "वः" अस्मान् "अंहसः" पापात् "मुञ्चतम्" मोचयतम् ॥ ८ ॥ ३७

हे "इन्द्र !" "ते" तव "श्मश्रूणि" "हरी" सोम-पानेन हरितवर्णानि [तथाच श्रूयते—"इन्द्रः श्मश्रूणि हरिताभि पुष्णुते"-इति । "शेश्छन्दसि बहुलम् (६,१,८०)"—इति हरि-

---

* "ऋष्यस्य साम व्रतं वा"—इति आ० ब्रा० ३, २, २५ ।

† ग्रा० गा० ३प० ५, १, २२ ।

‡ "स्योनम्"—इति सुखनामसु पञ्चदशं नैघण्टुकम् ३,६ ।

अथ दशमी।

१उ २ १ २ २ २ ३ २ ३ १ २ ३ २
यद्वर्च्चोहिरण्यस्ययद्वावर्च्चोगवामुत।
३२ ३१ २ ३ २ ३१ २३ १ २
सत्यस्यब्रह्मणोवर्च्चस्तेनमासꣳसृजामसि॥ १०॥ ३९

१र २ १ २ १ २र४र १
*—हाउ। ३। अहमन्नम। ३। अहमन्नादो। हम
२र १र २र १र २र १ २र
चादो। २। हंविधारयो। २। हंविधारयः। हाउ।
१ २र १ २ १ १ र १ २र १ र २ १ २
३। यद्वर्च्चोहिरण्य। स्या। यद्वावर्च्चोगवामू। ता। स
१ २ २र १ १ १र २र १ २र १ २र
त्यस्यब्रह्मणोव। चाः। तेनेमासꣳसृजाम। साइ। हाउ

शब्दात्परस्य शेर्लुक्]। "उतो" अपिच। "ते" "हरी" अश्वौ† "हरितौ" हरिद्वर्णौ। "कवयः" मेधाविनः "पुरुषासः"‡ पुरुषाः "वनगवः" [वननीयाः सम्भजनीयाः धवनीयाः गावो येषां ते वनगवः मध्यरेफश्छान्दसः¶। गोस्त्रियो (१,२, ४८) रिति ह्रस्वत्वम्] तादृशाः "कवयः" "तं" "त्वा" त्वां स्तुवन्ति॥ ॥९॥ ३८

---

* "द्विशं व्रतं दशानुगानम्"—इति ग्रा० आ० २, २, २६।

† "हरी इन्द्रस्य"—इति निघ० १,१५,१।

‡ "आज्जसेरसुक्"—इति पा० ७, १,५७।

¶ "वर्णागमो वर्णविपर्ययश्च"—इति पा० २, ४, ९८ वा०।

२ १ २र १र १ २र १र
३। अहमन्नम्। ३। अहमन्नादो। हमन्नादो। २।
१ २र १र १ २र १ ५ २१ २
हंविधारयो। २। हंविधारयः। हाउ३। वा। ए।
२ १ २-९ २र १र १ २र १ १ र१
अहमन्नमहमन्नादोहंविधारयः। ३। ए। अहꣳसुव
र ३ १ १ १ १
र्ज्योतीर३४५ः॥ १* ॥

२र २ १ २र १ १र १
हाउ। ३। अहꣳसहो। हꣳसहो। २। हꣳ
२र १ २ १ २र १ २ १ र २ र १र
सासहिः। अहꣳसासहिः। २। अहꣳसासहानो।
१ र २ र १र १ र २ र १ २र १ २र १
हꣳसासहानोहꣳसासहानः। हाउ। ३। यदर्चोहिर
२ १ १ र १ २र १ र २ १ २ १ २ १ २र १ १
एय। स्या। यद्दावर्चोगवाम्। ता। सत्यस्यब्रह्मणोव। चाः।
१र २र १ २र १ २र २ १ २र
तेनमासꣳहजाम। साइ। हाउ। ३। अहꣳसहो।
१ २र १ २र १ २ १ २र १
हꣳसहो। २। हꣳसासहिः। अहꣳसासहिः। २।
२ १ र २ र १र १ र १र १र १ र १र १
अहꣳसासहानो। हꣳसासहानो। हꣳसासहानः।

---

* छा० गा० ३प्र० ५, २, ९।

१र　२　२र　२　१　१र　१　२र　१　२　१　र　२　र
हाउ । ३ । वा । ए । अहꣳमहोहꣳसासहिरहꣳसासहा
२र　२　१　र　२　१　१　१　१　१
नः । ३ । ए । अहꣳसुवर्ज्योती२३४५ः ॥ २ * ॥

२र　२　१　२र　१　२र　१　२र
हाउ । ३ । अहंवर्चा । हंवर्चो । हंवर्चः । हाउ ।
१　२र　१　२　१　१　२र　१　२र　१　र　२　१　२　१
३ । यद्वर्चोह्हिरण्य । स्या । यद्वावर्चोगवाम् । ता । सत्य-
२　१　२र　१　१　१र　२र　१　२र　१　२र
स्यब्रह्मणोव । चाः । तेनमासꣳहजामि । साइ । हाउ ।
१　१र　१　२र　१　२र　२　२र
३ । अहंवर्चो । हंवर्चो । हंवर्च । हाउ । ३ । वा । ए ।
२　१　२र　१　र　२　१　१　१　१
अहंवर्चः । ३ । ए । अहꣳसुवर्ज्योती२३४५ः ॥ ३ † ॥

२र　२　१　र　२र　१　र　२र　१　र
हाउ । ३ । अहन्तेजो । हन्तेजो । हन्तेजः ।
२र　१　२र　१　२　१　१　३र　१　२र　१　र　२
हाउ । ३ । यद्वर्चोह्हिरण्य । स्या । यद्वावर्चोगवाम् ।
१　२　१　२　१　२र　१　१　१र　२र　१　२र　१
ता । सत्यस्यब्रह्मणोव । चाः । तेनमासꣳहजामि । साइ ।
२र　२　१　र　२र　१　र　३र　१　र　२र
हाउ । ३ । अहन्तेजो । हन्तेजो । हन्तेजः । हाउ ।
२　१　र　२　१　र　३　१　१　१　१
३ । अहन्तेजः । ३ । ए । अहꣳसुवर्ज्योती२३४५ः ॥ ४ ‡ ॥

---

*, †, ‡ आ० गा० ३प० ६, २, १-३-४ ।

२र १ २र १ १र १ र
हाउ। ३। दिशन्दुहे। दिशन्दुहे। २। दिशो
२ र १ र २ र १ र २ र २र १ २र र
दुहे। ३। दिशोदुहे। ३। सर्वादुहे। ३। हाउ। यद्वर्चोहिर
२ १ १ २र १ २र १ र २ १ २ १ १ १ २र १ १
ण्य। स्या। यद्वावर्चोगवाम्। ता। सत्यस्यब्रह्मणोव। चा:।
१र २र १ २र १ २र १ २ र
तेनमासꣳसृजाम। साइ। हाउ। ३। दिशन्दुहे।
१ र २ र १ र २ र १ र २ र
३। दिशोदुहे। ३। दिशोदुहे। सर्वादुहो। ३।
२र २ २र १ २ र १ र २ र १ र २ र १ २ २ र
हाउ। वा। ए। दिशन्दुहेदिशोदुहेदिशोदुहेसर्वादुहे।
२र २ १ र ३ १ १ १ १
३। ए। अहꣳसुवर्ज्योती२३४५:॥ ५ *॥

२र १ र २ १ २
हाउ। ३। मनोजयित्। ३। हृदयमजयित्। ३।
१ र २ २ १ २र २र १ २र १
इन्द्रोजयित्। ३। अहमजैषम्। ३। हाउ। यद्वर्चोहिर
२ १ १ २र १ २र १ र २ १ २ १ २ १ २र १
ण्य। स्या। यद्वावर्चोगवाम्। ता। सत्यस्यब्रह्मणोव।
१ १र २र १ २र १ २र १ र २
चा:। तेनमासꣳसृजाम। साइ। हाउ। मनोजयित्।
१ २ १ र २ २ १ २र
३। हृदयमजित्। ३। इन्द्रोजयित्। ३। अहमजैषम्।

---

* आ० गा० २प० ५, २, ५।

२१ २ २र १ र ३ १ २ १ र २ १
३। हाउ३वा। ए। मनोजयिद्दयमजयिदिन्द्रोजयिदच्च
२र २र २१ र ३ १ १ १ १
मजैषम्। ३। ए। अहꣳसुवर्ज्योती२३४५ः॥ ६ ॥

२र १ १ र २ २र
हाउ। ३। वयः। ३। वयोवयः। ३। हाउ। ३।
१ २र १ २ १ १ २र १ २र १ र २ १ २ १ २
यद्वर्चोहिरण्य। स्या। यद्वावर्चोगवाम्। ता। सत्यस्य
१ २र १ १ १र २र १ २र १ २र
ब्रह्मणोव। चाः। तेनमासꣳसृजाम। साइ। हाउ।
१ १ र २ २१ २ २र १ र
३। वयः। ३। वयोवयः। ३। हाउ३। वा। ए। वयो
२र २ २र २ १ र ३ १र १ १
वयोवयः। ३। ए। अहꣳसुवर्ज्योती२३४५ः॥ ७ ॥

२र २र १ २र १ र २ २र
हाउ। ३। रूपम्। ३। रूपꣳरूपम्। ३। हाउ
१ २र १ २ १ १ २र १ २र १ र ३ १ २
३। यद्वर्चोहिरण्य। स्या। यद्वावर्चोगवामृता। स
१ २१ २र १ १ १र २र १ २र १
त्यस्यब्रह्मणोव। चाः। तेनमाꣳसꣳसृजाम। साइ।
२र २र १ २र १ र २ र २ २र
हाउ। ३। रूपम्। रूपाꣳरूपमः। ३। रूपम्। ३। ए।
२ १ १ ३ १र१ १ १
अहꣳसुवर्ज्योती२३४५ः॥ ८* ॥

---

* आ० गा० ३प० ५, २, ६-७-८।

१ २ १ २ १ २
हिꣳहियऊ२। ३। उदपप्तम्। उदपप्तम्। ३।

२र १र २ २ १ २र १ २
ऊर्द्ध्वनभाꣳस्यकृषि। ३। व्यद्यौत्सम्। ३। अततनम्।

२र २र २र १ ५र १ २ १
३। हाउ। हाउ। हाउ। यद्वर्चोहिरण्य। स्या।

१ २र १२र १ र २ १ २ १ २ १ १र १ १ १र
यद्वावर्चोगवाम्। ता। सत्यस्यब्रह्मणो व। चाः। तेन

२र १ १र १ १ २ १ २
मासꣳसृजाम। साइ। हिꣳहियऊ२। ३। उदपप्तम्।

२र तर र २ १ २र १ २
३। ऊर्द्ध्वनभाꣳस्यकृषि। ३। व्यद्यौत्सम्। ३। अतत

२ऽ २ २र १ २ र१र र २ १
नम्। ३। हाउ३वा। ए। उदपप्तमूर्द्ध्वनभाꣳस्यकृषिव्य

२र १ २ ३ १ ३ १ १ १ १
द्यौत्समततनम्। ए३। पिन्वस्वो२३४५॥ ८*॥

२र १र १ २र २र
हाउ। ३। प्रथे। ३। प्रत्यष्ठाम्। ३। हाउ। ३।

१ २र १ २ १ १ र १ २र १ र २ २ १
यद्वर्चोहिरण्य। स्या। यद्वावर्चोगवामृता। सत्य

२ १ २र १ १ १र २र १ २र ५ २र
स्यब्रह्मणोव। चाः। तेनमासꣳसृजाम। साइ। हाउ।

---

* छा० गा० ३प० ५, २, ९।

अथ एकादशी।

२ ३ १२ ३ २ ३१
सहस्तन्न इन्द्र दध्योज

३क २ ३ १ २
ईशे ह्यस्य महतो विरप्शिन्।

१र १ २र २५ ३ २ ०र १र
३। प्रशे। ३। प्रत्यष्ठाम्। २। ह्वाउ३। वा। ए। प्रथेप्रत्य
२र ०र २१ र २ १११
ष्ठाम्। ए। अहꣳसुवर्ज्योतीर३४५ः॥ १० *॥ ३९

वामदेव ऋषिः। अनुष्टुप् छन्दः। आश्वासने विनियोज्या।

“हिरण्यस्य” हित-रमणीयस्य एतन्नामकस्य “यद्वर्चः” तेजोऽस्ति। “यद्वा” अपिच। “यवाम्” एतन्नामकानां† “यद्वर्चः” तेजोऽस्ति। “उत” अपिच। “सत्यस्य” सर्वैः सम्मतस्य‡ “ब्रह्मणः” यद्वर्चोऽस्ति तेन तैः “मा” “संसृजामसि”¶ सम्पादयामः। धनवन्तः पशुमन्तः श्रोत्रिया भवेमेति तात्पर्यार्थः॥ १०॥ ३९

---

* आ० गा० ३प० ५, २, १०।

† “हिरण्यं कस्माद्ध्रियत आयम्यमानमिति वा ह्रियते जनाज्जनमिति वा हितरमणं भवतीति वा हृदयरमणं भवतीति वा हर्यतेर्वा स्यात् प्रेप्साकर्मणः”—इति निरु० नै०२,१०।

‡ गौरिति निघण्टौ बह्वर्थः (१,१,१—१,४,४—१,५,३—१,११,४—१,१५,७—२,११,१०।

¶ “सत्यं कस्मात् सत्सु तायते सत्प्रभवं भवतीति वा।”—इति निरु० नै०३,१३।

‖ “इदन्तोमसि”—इति पा० ७,१,४६।

२ ३ १ २ १ २र २र ३ १ २
क्रतुन्ननृम्णᳯस्थविरञ्चवाजं
३ १ ३ १ २ २ १ २
वृत्रेषुशत्रूनत्सहनाकृधीनः ॥ ११ ॥ ४०

२र १ २ १ २ १
* हाउ । ई । आइही । ३ । ओहा । २ । ओ
२ २र १ १ १र
हा३ । हाउ । ३ । सहस्तन्नइन्द्रदध्यो२जाः । आया
१ऽ २र १ १र र र
२उ । ऊ । आयाउ । ३ । ईशेह्यस्यमहतोविरा२
१ १र १ऽ २र १ १
प्शायिन् ↑ । आया२उ । ऊ । आयाउ । ३ । क्रतुन्न
१ १र १ऽ २र १
नृम्णᳯस्थविरञ्चवा२जाम् । आया२उ । ऊ । आया
२ १र र र १ १र
उ । ३ । वृत्रेषुशत्रूंत्सुहनाकृधा२इनाः । आया२
१ऽ २र १ २र १
उ । ऊ । आयाउ । ३ । हाउ । ३ । आइही ।
१ २ १ २ १ २ २ऽ २र
३ । ओहा । ओहा । ओहा३ । हाउ३ । वा । ए
२र १र २ १ २ र १र र र २ १ १ १ १
आयुर्द्धाअस्मभ्यंवर्चोधादेवेभ्या२३४५: ॥ १७ ‡ ॥ ४०

---

* "कश्यपव्रतं दशावृगानम् * * * गवांव्रते"—इति षा० ब्रा० १, २, २७ नम प्रथम मिदम् ।

† "प्शायिन्"—इति क० पु० पाठः ।

‡ आ० गा० ३प० ५, २, १७ ।

अथ द्वादशी।

१ १ २   ३ १ २   ३ १ १
सहर्षभाःसंसहवत्साउदेत
१ २ ३ २ ३ १ २
विश्वारूपाणिविभ्रतीर्द्व्यूध्नीः।
३ २ ३ २ ३ १ २   ३ २
उरुःपृथुरयंवोअस्तुलोक
३ १र   २र   ३ २ ३ १ २
इमाआपस्सुप्रपाणाइहस्त॥ १२॥ ४१

॥ चतुर्थ-दशति॥

२   २ १   २र   १ ३र   १र
* हाउ३वा। सहर्षभाःसहवत्सा॰ उदेत। हाउ३

हे "विरप्शिन्" विशेषेण रपणं व्यक्त-वचनं तदस्यास्तीति विरप्शी, तस्य सम्बोधनं हे विरप्शिन्! विशेषेण स्तोत्र-विषये सत्यवाक्य? "इन्द्र!" "ते" तव "सहः" शत्रूणा मभिभवनरूपम् "ओजः" बलं "नः" अस्मभ्यं "दद्धि" देहि. [ददातेश्छान्दसं रूपं लोडि हेर्धिभावादिना] यस्मात् त्वं तस्य "अस्य" "महतः" बलस्य "इशे" ईश्वरो भवसि। अतो हे इन्द्र! "नः" अस्माकं "क्रतुं न" यज्ञमिव "नृम्णं" धनं "स्थविरम्" अतिशयेन प्रवृद्धं, "वाजं" बलं च "कृधि" कुरु। किञ्च नोऽस्माकं "शत्रून्" "ह्वलेषु" आवरकेषु उपद्रयेषु "कृधि" कुरु॥ ११॥ ४०

---

* "निक्रवाभिनिक्रवौ द्वा वनडुहते वा"—इति षा० ब्रा० ९, २, २०। न च प्रथम मिदम्।

१ र २र१र २ १ २र र र २ऽ २ १
वा। विश्वारूपाणिबिभ्रतोद्व्यूध्नीः। हाउ३वा। उरुः-
२ १ र १ र २ र १ २ऽ २ १र र २
पृथुरयम्बोअस्तुलोकः। हाउ३वा। इम। आपःसुप्र-
र १र २ १ २ऽ १ २ १
पाणाइहस्त। हाउ३वा। अश्वमिष्टये३हसमा ॥१८*॥ ४१

हे "सहर्षभाः" वृषभैः सहिताः! "सहवत्साः" वत्सैः सहिताः! गावः! "द्व्यूध्नीः" सायं प्रातः काले द्विविधान्यूधांसि यासां ता द्व्यूध्नीः द्व्यूध्न्यः! "विश्वा" सर्वाणि नाना "रूपाणि" "बिभ्रती" बिभ्रत्यः यूयम् "उदेत" उद्गच्छत समृद्धाः आगच्छत। किञ्च। "उरुः" बहुः "पृथुः" विस्तीर्णः [उरुः पृथु रिति शब्दाभ्याम् आयाम-विस्तारौ उच्येते। "अयं लोकः" "वः" युष्माकम् "अस्तु" भवतु। "इमा आपः" "इह" लोके भूतले अस्मिंस्थाने "सुप्रपाणाः" सुखेन प्रकर्षेण पातुं योग्याः सन्तु तस्मादिह बद्धीभूताः "स्त" भवत उपविशतेति पूर्वेण सम्बन्धः ॥ १२ ॥ ४१

इति श्रीमत्सायणाचार्य्यविरचिते सामवेदार्थ-प्रकाशे छन्दो-
व्याख्याने षष्ठस्याध्यायस्य चतुर्थः खण्डः ॥ ४ ॥

---

* ग्रा० गे० ३पं० ५, २, १९८.

अथ पञ्चम-खण्डः—

सैषा प्रथमा ।

२ ३ १ २ ३ २ २ २ ३ १ २
अग्नआयूꣳषिपवसआसुवोर्जमिषञ्चनः ।
३ १ २ ३ १ २
आरेबाधस्वदुच्छुनाम् ॥ १ ॥ ४२*

२र १ २र १ १ २ १र र
† भ्राजा । २ । भ्राजा३१उ । वा२ । अग्नआयूꣳ
२ र १र २१र २ १ २ २र३र र २ १ र
षिपवसि । आसुवोर्जमिषञ्चनः । आरेबाधस्वदुच्छुनाम् ।
२र १ २र १ २र १र
भ्राजा । २ । भ्राजा३१उ । वा२ । ए । भ्राज ।
३ ॥ ५ ‡ ॥ ४२

चतुर्दशाग्नआयूंषीत्याद्यास्तत्र जगत्यसौ ।
विभ्राट् त्रिष्टुप् चित्रमिति गायत्र्यो द्वादशेतराः ।
आद्याग्नेः पवमानस्य स्तुतिः सौर्यस्त्रयोदश ।
ऋषीणां विप्रकीर्णत्वात्तत्र तत्राभिदध्महे ॥
शतं वैखानसा एवं दृष्टवन्तो महर्षयः ।

---

* ऋ० ७, २, १०, ३=उ० ६,३,१०,३ ।

† "सूर्यस्य भ्राजाभ्राजो द्वे"—इति सा० ब्रा० ३, २, १८ । तत्र प्रथममिदम् ।

‡ आ० गा० ३प०,६, १, ५ ।

अथ द्वितीया ।

३ २ ३ १ २ ३ २उ
विभ्राड्बृहत्पिबतुसोम्यम्मध्वा
३२ २ ३ १ २ ३ १ २
युर्दधद्यज्ञपतावविह्रुतम् ।
१ २ ३ १ २ ३ १ २ ३ १ २
वातजूतोयोअभिरक्षतित्मना
३ १ २ ३ १२ २२
प्रजाःपिपर्त्तिबहुधाविराजति ॥ २ ॥ ४३ *

१ २ १ २ १ २ २
हाहाउ । ३ । इडा । ३ । हस् । ऋतम्मे ।
२ १२ २ १ १२
३ । विभ्राड्बृहत्पिबतुसोमिया२म्माधू२ । आयुर्दधद्य
२ १ १२ २ २ २
ज्ञपताववा२इह्रू ता२म् । वातजूतोयोअभिरक्षता२इ
१ २ १२ २ १ १ २उ
त्मा ना२ । प्रजाःपिपर्त्तिबहुधाविरा२जाती२ । हाहाउ ।

हे "अग्ने" पवमान-रूप ! अस्माकमायूंषि अन्नान्येतन्नामकानि वा "पवसे" चरसि "नः" अस्माकम् "ऊर्जम्" अन्नरसम् "इषम्" अन्नं च "आसुव" आभिमुख्येन प्रेरय । किञ्च । "दुच्छुनां" [रक्षोनामैतद्] रक्षांसि "आरे" अस्मत्तो दूरएव ‡ "बाधस्व" सम्पीडय ॥ १ ॥ ४२

---

* उ० ६,३,५,१ = ऋ० ८,८,२८,२ ।

† "वायोर्विकर्णभासे द्वे स्तत्योर्वा"—इति आ० ब्रा० ३,३,२८। तत्र विकर्णं नाम प्रथममिदम् ।

‡ "आरे"—इति दूरनामसु पञ्चमं नैघण्टुकम् ३, २६ ।

१ २ १ २ १ र १र
३। इडा। ३। हस्। ३। ऋतम्मो। ३। औहो
३र २ १ २ १ र १र ३र
वाहाउ। वा। फा२ट्। ऋतम्मे। ३। औहोवा
२ २ १ २ १ र १र ३र
हाउ। वा। फा२ट्। ऋतम्मे। ३। औहोवा
२ २ १
हाउ। वा। भ्रा२ट्॥ ७*॥ ४३

विभ्राण्नामक एतान्तु सूर्य-पुत्रो ददर्श सः।

"विभ्राट्" विभ्राजमानः विशेषेण दीप्यमानः† सूर्यः "बृहत्" परिवृढं "सोम्यं" सोममयं‡ "मधु" पिबतु। किं कुर्वन्? "यज्ञपतौ" यजमाने "अविह्रुतम्" अकुटिलम्¶ अकण्टकम् "आयुर्दधत्" अन्नं वा कुर्वन्§। "यः" सूर्यो "वातजूतः" वातेन-वायुना प्रेर्यमाणः सन्‖ "त्मना"+ आत्मना स्वयमेव "अभि रक्षति" सर्वं जगदभिमृशन् पालयति [राशि-चक्रस्य वायु-प्रेर्यत्वात् सूर्यस्यापि तत्प्रेर्यत्वम्] स सूर्यः "प्रजाः" "पिपर्ति" वृष्ट्यादि-प्रदानेन

---

* आ० गा० ३प० ६, १, ७।

† विभ्राडिति ज्वलतिकर्मणो "भ्राजते"—इत्यस्य रूपम् (नै० १,१६,१)।

‡ "सोम मर्हति यः"—इति पा० ४, ४, १३७।

¶ "ह्वृ कौटिल्ये (भ्वा० प०)"—इत्यस्येदं रूपमिष्टं विह्रुतमितीत्यभिप्रायः। "ह्वरश्छन्दसि (७, २, ३१)"—इति ह्रु आदेशः। "अविह्रुत मखण्डित मायुः"—इति वेददीपः य० मा० शा० सं० ३३, ३०।

§ "आयुः"—इत्यन्ननामसु त्रयोविंशं पदम् २, ७।

‖ "जूङ् गतौ (भ्वा० आ०)"—इत्यस्यैव णिजन्तस्येदं जूत इति रूपमित्यभिप्रायः।

+ "मन्त्रेष्वाङ्यादेरात्मनः"—इति पा० ६, ४, १४१।

अथ तृतीया।

१ २ ३ २ ३ १ २ २ १ २ ३
चित्रन्देवानामुदगादनीक
१ २ ३ २ ३ १ २ ३ २
चक्षुर्मित्रस्यवरुणस्याग्नेः ।
२ ३ १ २ ३ २ ३ १ २ ३
आप्राद्यावापृथिवीअन्तरिक्षꣳ
१ २ ३ १र २र ३ १ २
सूर्यआत्माजगतस्तस्थुषश्च ॥ ३ ॥ ४४*

१ १ १ १ १ १
† उवी २उवि। उविद्वो २उवि। त्रिः। इती २इति।
१ १ १ १ १ १
इतिद्वो २इति। त्रिः। असी २असि। असिद्वो २अ-
१ र २ र १ २ १र १ १
सि। त्रिः। अहंचोदिवम्पृथिवीम्। असी २असि।
१ १ १ २ ३ १र र २र र
असिद्वो २असि। एवन्त्रिः। पतिर। अपामोषधीना

पूरयति पालयन्ति वा। "बहुधा" "विराजति" विशेषेण दीप्यते च ॥

"पिपर्ति"-"पुपोष"—इति, "बहुधा"—"पुरुधा"—इति च पाठौ ॥ २ ॥ ४३

---

* ऋ० १, ८, ७, १।

† "आदित्यव्रतम्"—इति ग्रा० गा० ३, १, २९।

३म्। ओइ। पताइरा२३४सौ। एवम् त्रिः। चा
इ। त्रन्देवानामुदगादनीकम्। वाइश्वेषान्देवानाꣳ
समिदजस्रञ्ज्योतिराततो२म्। होइ। ३। आयुर्यन्।
३। अवः। ३। चक्षुर्मित्रस्यवरुणस्याग्नेः। सुवःसꣳ
सर्पसꣳसार्पा३। जनावनꣳसुवा२ःसुवः। जना२वना
२म्। सुवा२ःसुवः। त्रिः। आप्राद्यावापृथिवीअन्त
रौ२३क्षा३म्। इपिप्रइपीऐही। ३। अस्तोषतस्वभा
नवाऐही। विप्रानविष्टयाऽमताऐही। ग्रावाणोबर्हिषिप्रि
याऐही। इन्द्रस्यरꣳच्छिम्बृहादैही। इन्द्रा२स्यरा२।
च्छिया२म्। बृहदिन्द्रस्यरꣳच्छियम्बृहादैही। ३। एवं
त्रिः। सूर्यआत्माजगतस्तस्थुषा२३श्चा३। अन्तश्चरति
रोचनाऐही। ३। अस्यप्राणादपानता। ऐही। ३।

२ र र र र १र२र र र १ऽ
व्यख्यन्महिषोदिवामैही । ३ । प्रोणतिप्रोणति । ३ । प्रो ।
२र १ ३र २ ५र र २ २र १र
एति । २ । प्रा२३ । एता३४औहोवा । ए३ । देवा
र र १ १ १ १ १
दिवाज्योती२३४५: ॥ १ * ॥

२र र २र ३र २र ४र र २ र
गौ हाउहाउहाउ । भ्राजाओवा । ३ । उदुत्यञ्जा । ३ ।
२ १ र र र ७ २ २र र ३र २र
चित्रन्देवानामुदगादनी२३का३म । हाउ२हाउ । भ्राजा
३र र २ र १ ७
ओवा । ३ । तवेदसम । ३ । चक्षुर्मित्रस्यवरुणस्यआ२३
२ २र र ३र २र ३र र २र र
ग्ना३इ: । हाउ२हाउ । भ्राजाओवा । ३ । देवंवहा ।
१र र र २ र ७ २ २र २र
३ । आप्राद्यावापृथिवीआन्तरी२३क्षा३म । हाउ२हाउ ।
३र २र ३र ३ २ र १र र र
भ्राजाओवा । ३ । तिकेतव: । ३ । सूर्यआत्माजगतस्ता
७ २ २र र ३र २र ३र र २ र
स्थुषा२३आ३ । हाउ२हाउ । भ्राजाओवा । ३ । दृशे
र १र र र ७ २ २र
विश्वा । ३ । सूर्यआत्माजगतस्तास्थुषा१२आ३ । हाउ

---

* आ० गा० ३प० ६, २, १ ।

† "सौर्य्यातिषङ्गः"—इति आ० ब्रा०३, २, १९ ।

र ३र २र ३र र २र ९
२हाउ । भ्राजाओवा । ३ । यसूर्यम् । २ । यसूर२३रि
२ २ २ २र १र र र ३ १ १ १ १
याउ । वा३ । ए३ । देवादिवाज्योती२३४५ः ॥ ४* ॥
२र २र १ र २ २र १ र २
† हाउ । ३ । भ्राजाभ्राज । ३ । आयूरायुः ।
१ २ र १ र २ २ १ र र र
३ । उदुत्यञ्जा । ३ । तंवेदमम् । ३ । चित्रन्देवरना-
७ २ २र २र १ र २ २
मुदगादनी२३का३म् । हाउ । ३ । भ्राजाभ्राज । आ
१ र २ १र २ र १ ७ २
यूरायुः । देवंवहा । ३ । चक्षुर्मित्रस्यवरुण । स्यआ२३ग्ना
१र १र १ र २ २र १ र २
३इः । हाउ । ३ । भ्राजाभ्राज । आयूरायुः । ३ ।
१ र २ १र १ र र र ७ २
तिकेतवः । ३ । आप्राद्यावापृथिवीआन्तरी२३क्षा३म् ।
२र २र १ र २ २र १ र २ १ र २
हाउ । ३ । भ्राजाभ्राज । आयूरायुः । २ । दृशेवि
र १र र र ७ २ २र
श्वा । ३ । सूर्यआत्माजगतस्तास्थुषा२३श्वा३ । हाउ । ३ ।
२र १ र २ २र १ र २ १ र २
भ्राजाभ्राज । ३ । आयूरायुः । ३ । यसूर्यम् । ३ ।

---

* आ० गा० ३प० ६, २, ४ ।

† "मित्रावरुणयोः श्रोत्रमित्याचक्षते"—इति आ० ब्रा० ७. २. १९ ।

१ २ २ २ २र१र र र ३ १ १
यसू २ ३ रियाउं। वा३। ए३। देवादिवाज्योती २ ३
१ १
४ ५ः ॥ १६ * ॥ ४४

कुत्साः। "देवानां" दीव्यतीति देवा रश्मयः तेषां, देवानामेव वा प्रसिद्धानाम् †। "अनीकं" तेजःसमूहरूपं "चित्रम्" आश्चर्यकरं सूर्यमण्डलम् "उदगात्" उदयाचलं प्रयासीत्। कीदृशम्? "मित्रस्य वरुणस्याग्नेश्च चक्षुः" उपलक्षणमेतत्, एतदुपलक्षितानां जगतां चक्षुः प्रकाशकं चक्षुरिन्द्रियस्थानीयं वा। उदयं प्राप्यैव "द्यावापृथिवी" दिवं च पृथिवीं च "अन्तरिक्षं" च "आप्राः" स्वकीयेन तेजसा "आ" समन्तात् अपूरयत्। ईदृग्भूत-मण्डलान्तर्वर्ती सूर्यः अन्तर्यामितया सर्वस्य प्रेरकः परमात्मा "जगतः" जङ्गमस्य "तस्थुषश्च" स्थावरस्य च "आत्मा" स्वरूपभूतः स हि सर्वस्य स्थावर-जङ्गमात्मकस्य कार्य-वर्गस्य [कारणाच्च कार्यं नातिरिच्यते। तथाच पारमर्षं सूत्रम् ‡—"तदनन्यत्वमारम्भण शब्दादिभ्यः"—इति] यद्वा। स्थावर-जङ्गमात्मकस्य सर्व-प्राणिजातस्य जीवात्मा। उदिते हि सूर्ये मृतप्रायं सर्वं जगत् पुनश्चेतनयुक्तं सत् उपलभ्यते ¶ [तथाच श्रूयते—"योऽसौ तमो नुदेति सर्वेषां प्राणानादायोदेतीति"॥ ३ ॥ ४४

---

* आ० गा० ३प० ६, २, १९।

† "देवो दानाद्वा दीपनाद्वा द्योतनाद्वा द्युस्थानो भवतीति वा यो देवः। सा देवता"—इति निरु० दै० १, १५।

‡ "साङ्ख्यशास्त्र-प्रणेतृ-कपिलनामर्षि-कृतमित्यर्थः।

¶ "आयमीयं देवाना मुदगम दनीकं चक्षुर्मित्रस्य वरुणस्याग्ने रापूपुरद् द्यावापृ-

अथ चतुर्थी ।

१र २र ७ १ २ ३ ३ १ २ ३ २
आयङ्गौःपृश्निरक्रमीदसदन्मातरम्पुरः ।
३ १ २ ३ १ २
पितरञ्चप्रयन्त्स्वः ॥ ४ ॥ ४५*

१ ऽ १ ऽ १ २
उवौ२ । ३ । हिगौ२ । ३ । हिगिगि । ३ ।

थिव्यौ चान्तरिक्षस्य महत्त्वेन तेन सूर्य्य आत्मा जङ्गमस्य च स्थावरस्य च"—इति निरु० दै० ६, १६ । अत्र वेददीपकृद्व्याख्यानन्त्वेवम्—"पूर्वापररूपेण स्थितः सूर्योऽत्र स्तूयते । सूर्यः चित्र माश्चर्यं यथा तथा उदद्रात् उदयं प्राप्तः उद्गच्छति वा । लङय लुङ् । उदयन्नेव स्वतेजसा नैशं तमो हन्ति अन्येषां ज्योतींष्यादत्त इत्याश्चर्यम् । किम्भूतः सूर्यः ? देवानां दीव्यन्ति द्योतन्ते इति देवाः किरणास्तेषा मनीकं मुखं माश्रय इत्यर्थः । यद्वानीकं समूहः किरणपुञ्ज इत्यर्थः । तथा मित्रस्य वरुणस्य अग्नेः चक्षुः नेत्रवत् प्रकाशकं इत्यर्थः । मित्रादय उपलक्षकाः सर्वस्य सदेवमनुष्यस्य विश्वस्य रूपाणि सूर्योदयेऽभि व्यज्यन्ते अतो मित्रादीनां चक्षुः स सूर्य उद्गतः सन् द्यावा पृथिवी दिवं भूमिं चान्तरिक्षं आप्राः आपूरितवान् आपूरयति वा स्वतेजसेति शेषः । एवमपररूपेण स्तुत्वापररूपेण स्तौति—किम्भूतः सूर्यः ? जगतो जङ्गमस्य तस्थुषः स्थावरस्य च जगत आत्मा अन्तर्यामी । यमेतमादित्ये पुरुषं वेदयन्ते इन्द्रः स प्रजापतिस्तद्ब्रह्मेति 'श्रुतेः' सूर्याद्वैतमनेनोच्यते इति भावः" (य० मा० सं० ७, ४२) ॥ "हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम् । योसावादित्ये पुरुषः सोऽसावहम्"—इति वाजसनेयोपनिषदन्तिमा ऋक् ॥ "पुरुषः पुरिषादः पुरिशयः पूरयतेर्वा पूरयत्यन्तरित्यन्तरपुरुषमभिप्रेत्य"—इति निरु० नै० २, ३ ।

* उ० ६, १, १६, १=ऋ० ८, ९, ४०, १ ।

† "गन्धर्वाप्सरसा मानन्दप्रतिनन्दौ पक्षौ"—इति आ० ब्रा० ३, २, २९ । तत्रेद मानन्दनाम साम ।

२र र र र र २ र र र र
आयङ्गौःपृश्निरक्रमीदैहो। ३। असदन्मातरम्पु राएहो।
२ र र र १ ऽ १ ऽ
३। पितरञ्चप्रयंतस्वा ऐहो। ३। उवीर। ३। हिगीर।
१ २
३। हिगिगि। ३॥ २ * ॥

२ १ २ १ २ १ २र र
† उवी। ३। हिगी। ३। हिगिगी। ३। आयङ्गौः
र र र २ र र र र २
पृश्निरक्रमीदैहो। असदन्मातरम्पु राएहो। पितरञ्चंप्र
र र र २ १ २ १ २ १
यंतस्वाऐहो। उवी। ३। हिगी। हिगिगी॥ ३ ‡ ॥

२ऽ १ २ ३र २र २र र २र र
¶ हाउ३वा। इन्द्रूः। भ्राजाओवा। ३। आयङ्गौः
र र र २ऽ १ २ ३र २र ३र र
पृश्निरक्रमीदैहो। हाउ३वा। इडा। भ्राजाओवा। ३।
२ र र र र २ऽ १ ३ ३र २र ४र
असदन्मातरम्पु राएहो। हाउ३वा। मात्यम्। भ्राजाओ

---

* आ० गा० उप० ६, २, २।

† "तव प्रतिनन्द"—इति आ० ब्रा० ३, २, २९।

‡ आ० गा० उप० ६, २, ३।

¶ "तिस्र 'सार्पराज्ञः"—इति आ० ब्रा० ३, ९, २९। तत्र प्रथम मिदम्।

र २ र र र २ १ र
वा । ३ । पितरञ्चप्रयंत्स्वाऐही । हाउ३वा । दोयौः ।
॥ ७* ॥ ४५

आयङ्गौः पृश्निरित्यस्य सार्पराज्ञी समैक्षत ।
ऋचस्तिस्रो भवेदासां विकल्पेनात्मदेवता ॥

“गौः” गमनशीलः† “पृश्निः” प्राष्टवर्णः व्याप्ततेजाः‡ “अयं” सूर्यः “आक्रमीत्” आक्रान्तवान् उदयाचलं प्राप्तवानित्यर्थः । आक्रम्य च “पुरः” पुरस्तात् पूर्वस्यां दिशि “मातरं” सर्वस्य भूतजातस्य निर्मात्रीं “भूमिम्” “असदत्” आसीदति प्राप्नोति [सदेश्छान्दसो लेट्¶ । लृदित्वात् च्लेरङादेशः§] ततः “पितरं” पालकं द्युलोकम्, “च” शब्दादन्तरिक्षं “प्रयन्” प्रकर्षेण शीघ्रं गच्छन् “स्वः” सु अरणः|| शोभन-गमनो भवति । यद्वा । पितरं स्वर्द्युलोकं प्रवर्त्तते ॥ ४ ॥ ४५

---

* आ० गा० ३प० ६, २, ७ ।

† “गौरादित्यो भवति गमयति रसान् गच्छत्यन्तरिक्षेऽथ द्यौर्यत् पृथिव्या अधि दूरं गता भवति यच्चास्यां ज्योतींषि गच्छन्ति”—इति निरु० नै० २, १४ ।

‡ “पृश्निरादित्यो भवति प्राश्नुत एनं वर्ण इति नैरुक्ताः संस्पृष्टा रसान् संस्पृष्टा भासं ज्योतिषां संस्पृष्टो भासेति वाथ द्यौः संस्पृष्टा ज्योतिर्भिः पुण्यकृद्भिश्च”—इति निरु० नै० २, १४ ।

¶ “लिङर्थे लेट्”—इति पा० ३, ४, ७ ।

§ “पुषादिद्युताद्यॢदितः परस्मैपदेषु”—इति पा० ३, १, ५५ ।

|| “स्वरादित्यो भवति सु अरणः सु ईरणः स्वृतो रसान् स्वृतो भासं ज्योतिषां स्वृतो भासेति वैतेन द्यौर्व्याख्याता”—इति निरु० नै० २, १४ ।

अथ पञ्चमी ।

२ १ २ २ २उ ३ १ २ ३ २
अन्तश्चरतिरोचनास्यप्राणादपानती ।
१र ३ १ २र
व्यख्यन्महिषोदिवम् ॥ ५ ॥ ४६ *

१र र र र र १ १र र र र र २
† औहोऔहोवा । होइ । २ । औहोऔहोवा । हा३१
१ ३ ५ २ १ २ र १र १र
ओ । वा२३ । भू२३४वात् । अन्तश्चरतिरोचना । औ
र र र र १ १र र र र र २
होऔहोवा । होइ । २ । औहोऔहोवा । हा३१उ ।
१ २ ५ २ १ २र १र २र १र १र र
वा२३ । जा२३४नात् । अस्यप्राणादपानती । औहो
र र र १ १र र र र र २
औहोवा । होइ । २ । औहोऔहोवा । हा३१उ ।
१ ३ ५ १ १र १र र
वा२३ । वा२३४ह्वान् । व्यख्यन्महिषोदिवम् । औहो
र र र र १र र र र र २
औहोवा । होइ । २ । औहोऔहोवा । हा३१उ ।
१ १र र र र र १० १र
वा२३ । का२३४रात् । औहोऔहोवा । होइ । २ । औ
र र र र २ १ ३ ५ १र र
होऔहोवा । हा३१उ । वा२३ । भू२३४तीः । औहो

---

* उ० ६, १ ११, २ = ऋ० ८, ८, ४७, २ ।

† “मरुतां भूतिः”—इति छा० ब्रा० ३, ३, २९ ।

२ र र   १   १र र र र र   २
औहोवा। होइ। २। औहोऔहोवा। हा३१उ।
१   १ र २र १र २ र र   ११ र र र र   १
वा२। अभ्राजोज्योतिरभ्राजीत्। औहोऔहोवा। हो
१र र र र र   २   १   २
इ। २। औहोऔहोवा। हा३१उँ। वा२३। ए३।
१र र र र र   ३ १ १ १ १
सर्वान्कामानशीमही२३४५॥ ६ * ॥

२१   १ २   ३र २र ३र र
† हाउ३वा। भूतम्। भ्राजाओवा। ३। अन्तश्च
र र   र र   २१   १   २र ३र २र
रतिरोचना। ऐही। हाउ३वा। पृथिवी। भ्राजाओ
३र र   २ र र र   र र र   २१   १ २
वा। ३। अस्यप्राणादपानता ऐही। हाउ३वा। माहः।
३र २र ३र र   २   र ३ र र   २१
भ्राजाओवा। ३। व्यख्यन्महिषोदिवामैही। हाउ३वा।
१ २
तेजः॥ ८ ‡॥ ४६

२ र र १
¶ अन्तर्देवेषू३रोचा२सा२इ। ३। अन्तश्चरतो३रो

---

* आ० गा० ३प० ६, २, ६।

† तत्र द्वितीयमिदम्—इति (आ० ब्रा० ३, २, १९)

‡ आ० गा० ३प० ६, २, ८।

¶ "मित्रावरुणयोश्वरित्याचक्षते"—इति आ० ब्रा० ३, २, १९।

२ २ र र १ २ २
चा१ना२। अस्यप्राणादा३पानां१ता२इ। व्यख्यन्महो२
१ २ २ र र १ २ २
षोदा१इवा२म्। अन्तर्देवेषू३रोचा१सा२इ। २१. अन्त
र र १ १ ३ ५र र २ २१ १र र
र्दैवेषू३रो२३। चा२सा२३४औहोवा। ए३। देवादिवा
र ३ १ १ १ १
ज्योती२३४५:॥ १८ *॥ ४६

"अस्य" सूर्यस्य "रोचना" † रोचमाना दीप्तिरन्तःशरीर-मध्ये मुख्य प्राणात्मना "चरति" वर्त्तते। किं कुर्वती ? "प्राणादपानती" [मुख्य-प्राणस्य प्राणाद्याः पञ्च वृत्तयः। तत्र प्राणनं नाड़ीभि रूर्ध्वं वायोर्निर्गमनम्। तथाविधात् प्राणात् प्राणना दनन्तरम् अपानती [अपाननं नाड़ीभि रवाङ्मुखं वायोर्नयनम्] तत् कुर्वन्ती [अपपूर्वादनितेर्लटः शतृ, (३, २, १२४) अदादिलाच्छपो लुक् (२, ४, ७२)। उगितश्चेति (४, १, ६) ङीप्। शतुरनुम इति ‡ नद्या उदात्तत्वम्। यद्वा। "अन्तः" द्यावापृथिव्योर्मध्ये "अस्य" सूर्यस्य "रोचना" रोचमाना दीप्तिः "चरति" गच्छति [रुच दीप्तौ (भ्वा० आ०)। अनुदात्तेतश्च

---

* ग्रा० गा० १प० ६, ९, १८।

† रोचना इति "रोचते"—इति ज्वलतिकर्मणोरूपमितीभिप्रायः (निघ० १ १६, ८)।

‡ "शतुरनुमोनद्यजादी"—इति पा० ६, १, १७३।

अथ षष्ठी ।

३   २उ   ३ १ २   ३ १   २ ३ १ २
त्रिꣳशद्धामविराजतिवाक्पतङ्गायधीयते ।
१ ३ २ ३ २ ३ १ २
प्रतिवस्तोरहद्युभिः ॥ ६ ॥ ४७*

२१   १ २   ३२ २र ३र र   २
† हाउ३वा । आपः । भ्राजाओवा । ३ । त्रिꣳशद्धा
र र २ र   २५   १ २   ३र २र ३र र
मविराजताऐही । हाउ३वा । ऊषा । भ्राजाओवा ।
२र   र   र   र र र   २   १ २
३ । वाक्पतङ्गायधीयताऐही । हाउ३वा । दीशः ।

ह्लादेरिति (३,२,१४८) युच्] । किं कुर्वन्ती? "प्राणात्" प्राणनादुदयादनन्तरम् "अपानती" सायाह्न-समये अस्तङ्गच्छन्ती । ईदृश्या दीप्त्या युक्तः अतएव "महिषो" महान् सूर्यः ‡ "दिवम्" अन्तरिक्षं उदयास्तमययोर्मध्ये "व्यख्यत्" विचष्टे प्रकाशयति [महि रचि महेष्टिषजिति औणादिकष्टिषच् प्रत्ययः । चक्षिङः ख्याञ् (२,४,५४) छान्दसे लुङि ¶ अस्यतिवक्तिख्यातीत्यादिना (२, १, ५२.) च्लेरङादेशः ॥ ५ ॥ ४६

---

* उ० ६, १, ११, ३=ऋ० ८, ८, ४७, ३।

† तयं वान्निमे मिदम्—इति आ० ब्रा० ३. २, १८ ।

‡ "महिषः"—इति महन्नामसु [illegible] नैघण्टुकम् ३, ३ । "महान् कस्मान्मानेनान्यान् जहातीति शाकपूणि मंहनीयो भवतीति वा"—इति निरु० नै० ३, १३ ।

¶ "छन्दसि लुङ् लङ् लिटः"—इति पा० ३, ४, ६ ।

३र २र ३र र १ र र र र २
भ्राजाओवा। ३। प्रतिवस्तोरहद्युभाऐहो। हाउ३वा।
१ २
ज्योतिः॥ ९ *॥ ४७

"त्रिंशद्धाम" धामानि स्थानानि [वचनव्यत्ययः (३, १, ३८)] "वस्तोः" वासरस्य † अहोरात्रस्यावयवभूतानि। "अह" शब्दोऽवधारणे ‡। "द्युभिः" सूर्यस्य दीप्तिभिरेव ¶। "विराजति" विराजते विशेषेण दीप्यते [व्यत्ययेनैकवचनम् (३, १, ३८)। मुहूर्तान्यत्र धामान्युच्यन्ते। पञ्चदश रात्रेः पञ्चदशाह्नः] "पतङ्गाय" पतति गच्छतीति पतङ्गः सूर्यः § तस्मै सूर्याय स्तुति-रूपा "वाक्" "प्रतिधीयते" प्रतिमुखं स्तोतृभिर्विधीयते क्रियते। यद्वा "वस्तोः" अह्नः "त्रिंशत्" "धाम" धामानि [घटिकाभिप्रायमेतत्] त्रिंशद्घटिकाः [अत्यन्तसंयोगे द्वितीया (२,३,५)] एतावत् कालं "द्युभिः" दीप्तिभिरसौ सूर्यो "विराजति" विशेषेण दीप्यते। तस्मिंश्च समये "वाक्" त्रयी-रूपा तस्मै "पतङ्गाय" "प्रतिधीयते" प्रतिमुखं धार्यते तं पूर्वं

---

* आ० गा० ३प्र० ६, २.९।

† "वस्तोः"—इति अहर्नामसु प्रथमं नैघण्टुकम् (१.९)।

‡ "अह इति च ह इति च विनिग्रहार्थीयौ पूर्वेण सम्प्रयुज्येते। अयमहेदं करोत्वयमिदं ह करिष्यतीदं न करिष्यतीति"—इति निरु० नै० १, ५।

¶ "द्योतत इति सतः"—इति निरु० नै० १, ६।

§ "पतङ्गः"—इति अश्वनामसु द्वाविंशं नैघण्टुकम् १, १४।

अथ सप्तमी ।

२ ३ २ ३ १ २ ३ १ २ ३ १ २
अपत्ये तायवोयथानक्षत्रायन्त्यक्तुभिः ।

१ २ ३ १ २
सूरायविश्वचक्षसे ॥ ७ ॥ ४८*

अथाष्टमी ।

१ २ ३ २ २ २ ३ २ ३ २ ३ १ २
अदृश्रन्नस्यकेतवोविरश्मयोजनाँ२ अनु ।

१ २ ३ १ २
भ्राजन्तोअग्नयोयथा ॥ ८ ॥ ४९†

२र क र ३र २र ३र २ र २
‡ हाउहाउहाउ । भ्राजाओवा । ३ । दिदीहिवि

२१ २ र १ २ २र
श्वतस्पृथुः । उदुत्यञ्जाता३वाइदा१सा२म् । देवंवह

सेवत इत्यर्थः ॥ [श्रूयते हि—“ऋग्भिः पूर्वाह्णे दिवि देव ईयते, यजुर्वेदे तिष्ठति मध्ये अह्नः । सामवेदेनास्तमये महीयते वेदैरशून्यस्त्रिभिरेति सूर्यः”—इति । यदा त्विह सूक्ते सार्पराज्ञ्या आत्मस्तुतिस्तदा सूर्यात्मना स्तूयत इत्यवगन्तव्यम् ॥ ६ ॥ ४७

---

* ऋ० १, ४, ७, २ । † ऋ० १, ४, ७, ३ ।

‡ “षडेन्द्राः परिधयऋतूनाम्”—इति आ० ब्रा० ३, ९, २९ । तत्र प्रथम मिदम ।

१ २ २र र १ २ २
न्तो३काइता१वा २:। दृशेविश्वायाइसूरा१या २म्। अ
र र १ २ २ र १ २
पत्ये तायाइवोया१था २। नक्षत्रायन्तीयाक्तू१भा २इः।
२र र १ २ २ १ २
सूरायविश्वा३चाक्षा१मा २इ। अदृश्रन्नस्या३काइता१वा २:।
२ र १ २ २र र १ २ ५
विरश्मयोजा३ना७आ१नू २। भ्राजन्तोअग्ना३योया१था
२र र ३र २र ३र र ३र २ ४
२३। हाउ३हाउ। भ्राजाओवा। २। भ्राजाओ
३ १ १ १ १
३५वा६५६। ई २३४५॥ ११*॥

२र र ३ २र ४र र २ १र १ २
† हाउ२हाउ। शुक्राओवा। ३। दिदीहिविश्वतस्पृ
१ २ र १ २ २र
थुः। उदुत्यञ्जाता३वाइदा१सा २म्। देवंवहन्तो३
१ २ २ र र १ १र २ र
काइता१वा २:। दृशेविश्वायाइसूरा१या २म्। अपत्ये
र १ २ २ र १ २ २र र
तायाइवोया१था २। नक्षत्रायन्तीयाक्तू१भा २इः। सूरा
१ २ २ १ २
यविश्वा३चाक्षा१सा २इ। अदृश्रन्नस्या३काइता१वा २:।

---

* आ० गा० ३प० ६, २, ११।

† तवेदं द्वितीयम्। (आ० गा० ३, २, २९).

२ र १ २ २र र १ २
विरश्मयोजा३ना२आ२न् २। भ्राजन्तोअग्ना३योयां१था२३।
२र र ३ २र ३र र ३ २ ४
हाउ२हा३उ। भ्रुक्काओवा। ३। भ्रुक्का३ओ५वा६५६।
३ १ १ १ १
ई२३४५॥ १२*॥ ४८॥ ४९

"त्ये" "तायवः "यथा" प्रसिद्धास्तस्करा इव "नक्षत्राणि" देवगेहरूपाणि ["देवगृहा वै नक्षत्राणि"—इति श्रुत्यन्तरात्। यद्वा, इह लोके मानुषा ये स्वर्गं प्राप्नुवन्ति ते नक्षत्ररूपेण दृश्यन्ते। तथाच श्रूयते—"यो वा इह यजते अमुं स लोकं नक्षते तन्नक्षत्राणां नक्षत्रत्वम्"—इति। यद्वा, तेषां सुकृतिनां ज्योतींषि नक्षत्राण्युच्यन्ते। "सुकृतां वा एतानि ज्योतींषि यन्नक्षत्राणीति"—आम्नानात्। यास्कस्त्वाह—"नक्षत्राणि नक्षतेर्गतिकर्मणो नेमानि नक्षत्राणीति च ब्राह्मणम्"—इति] यथाविधानि नक्षत्राणि "अक्तुभिः" रात्रिभिः सह "अप यन्ति" अपगच्छन्ति। "विश्वचक्षसे" विश्वस्य सर्वस्य प्रकाशकस्य "सूर्याय" सूर्यस्य आगमनं दृष्ट्वेति शेषः [तस्करा नक्षत्राणि च रात्रिभिः सह सूर्यं आगमिष्यतीत्याकुलायन्त इत्यर्थः। तायुरिति स्तेननाम (नै ३, २४, ७) तायुस्तस्कर इति तन्नामसु पाठात्। अक्तुरिति रात्रिनाम (नै० १, ७, ४) शर्वरी अक्तुरिति तन्नामसु पाठात्॥ ७॥ ४८

---

* आ० गा० ३प०-६, २, १२।

अथ नवमी ।

३ १ २ ३ १ २ ३ १ २
तरणिर्विश्वदर्शतोज्योतिष्कृदसिसूर्य ।
२ ३ १ २ ३ २
विश्वमाभासिरोचनम् ॥ ९ ॥ ५० *

अथ दशमी ।

१ २ ३ २ ३ १ २ ३ १र २र ३ १ २
प्रत्यङ्देवानांविशःप्रत्यङ्ङुदेषिमानुषान् ।
२ २उ २क २र ३ २
प्रत्यङ्विश्वꣳस्वर्दृशे ॥ १० ॥ ५१ †

अथ एकादशी ।

१ २ ३ १ २ २ १ ३ १ २ १ २
येनापावकचक्षसाभुरण्यन्तञ्जनाꣳअनु ।
१ २ ३ १ २
त्वंवरुणपश्यसि ॥ ११ ॥ ५२ ‡

"अस्य" सूर्यस्य "केतवः" प्रज्ञापकाः "रश्मयः" दीप्तयः "जनान् अनुव्यदृश्रन्" जनान् सर्वान् अनुक्रमेण प्रेक्षन्ते । सर्वं जगत् प्रकाशयन्तीत्यर्थः । तत्र दृष्टान्तः—"भ्राजन्तः" दीप्यमाना "अग्नय इव" ॥

"व्यदृश्रन्"-"अदृश्रम्"—इति पाठौ ॥ ८ ॥ ४९

---

* ऋ० १, ४, ७, ४ ।

† ऋ० १, ४, ७, ५ ।

‡ ऋ० १, ४, ७, ६ ।

२र र २र २र ३र र २ र १ २
* हाउ२हाउ। भूताओवा। ३। दिदीहिविश्वतस्पृ
१ २ १ २ २र ३ १ २
थुः। तरणिर्विश्वा३दार्शा१ता२ः। ज्योतिष्कृदसीसूरा१
२ र र १ २ २ र र
या२। विश्वमाभासी३रोचा१ना२म्। प्रत्यङ्देवा३
१ २ २ र १ २
नांवा१इशा२ः। प्रत्यङ्देषी३मानू१षा२न्। प्रत्यङ्
१ २ २र र र १ २
विश्वꣳस३वार्हे१शा२इ। येनापावका३चाक्षा१सा२।
२ १ २ २ १ २
भुरण्यन्तञ्जा३नाꣳआ१नू२। त्वंवरुणा३पाश्या१सा२३इ।
२र र ३र २र ३र र ३र २ ४ ५
हाउ२हाउ। भूताओवा। २। भूता३ओ५वा६५६।
३ १ १ १र
ई२३४५॥ १३†॥

२र र ३र २र ३र र ३ र १ २
‡ हाउ२हाउ। तेजाओवा। ३। दिदीहिविश्वतस्पृ
१ २ १ २ २र ३ १ २
थुः। तरणिर्विश्वा३दार्शा१ता२ः। ज्योतिष्कृदसीसूरा
२ र र १ २ २ र ३र
१या२। विश्वमाभासी३रोचा१ना२म्। प्रत्यङ्देवा३

---

* नव तृतीय-मिदम् (आ० आ० ३, २, २९)।

† आ० गा० ३प० ६, २, १३।

‡ नव चतुर्थ मिदम् (आ० आ० ३, २, २९)।

१ २ २ र १ २ २
मांवा१इशा २ः। प्रत्यङ् देवी३मानू१षा २न्। प्रत्यङ्
१ २ २र र र १ २
विश्वं स्व३र्दाहं१शा २इ। येनापावका३चाक्षा१सा २।
२ १ २ २ १ २
भुरण्यन्त ञ्जा३ना ँ आ१न् २। त्वंवरुणा३पाश्या१सा२३इ।
२र र ३र २र ३ रर ३र २ ४ ३ १
हाउ२हाउ। तेजाओवा। २। तेजा३ओ५वा६५६। ई२
१ १ १
३४५॥ १४ *॥ ५०॥ ५१॥ ५२

हे "सूर्य" त्वं "तरणिः" प्रगन्ता अन्येन गन्तुमशक्यस्य महतोऽध्वनो गन्तासि। [तथाच स्मर्यते—"योजनानां सहस्रे द्वे द्वे शते द्वे च योजने। एकेन निमिषार्द्धेन क्रममाण नमोऽस्तु ते"—इति] यद्वा। उपासकानां रोगात्तारयितासि ["आरोग्यं भास्करादिच्छेत्"—इति स्मरणात्] तथा "विश्वदर्शतः" विश्वैः सर्वैः प्राणिभिर्दर्शनीयः [आदित्य-दर्शनस्य चण्डालादि-दर्शन-जनित-पाप-निवर्हण-हेतुत्वात्। तथाचापस्तम्बः-"दर्शने ज्योतिषां दर्शनम्"—इति] यद्वा, "विश्वं" सर्वं भूतजातं "दर्शतं" द्रष्टव्यं प्रकाश्यं येन स तथोक्तः। तथा "ज्योतिष्कृत्" ज्योतिषः प्रका-

---

* छा० मा० उप० ६, २. १४।

† "तरणिः"—इति निघण्टौ तु (२, १५) क्षिप्रनामसु पाठ्यं पदं। तरणिरोजमाना (४३० पृ०) मिति मन्त्र-व्याख्यायामश्व मेव त्वचयो तारकमिति; माधवस्तु क्षिप्र दातारं वा—इति।

शस्य कर्त्ता, सर्वस्य वस्तुनः प्रकाशयितेत्यर्थः। यद्वा, चन्द्रादीनां [रात्रौ हि अस्तमये चन्द्रादिषु सूर्य-किरणाः प्रतिफलिताः अतोऽन्धकारं निवारयन्ति। यथा द्वारस्थ-दर्पणोपरि निपतिताः सूर्यरश्मयो गृहान्तर्वर्त्ति तमो निवारयन्ति तद्वदित्यर्थः] यस्मादेवं तस्मात् "विश्वं" प्राप्तं "रोचनं" रोचमानम् "अन्तरिक्षम्" "आ" समन्तात् "भासि" प्रकाशयसि ॥

यद्वा, हे "सूर्य" अन्तर्यामितया सर्वस्य प्रेरक परमात्मन्! "तरणिः" संसाराब्धेस्तारकोऽसि। यस्मात् त्वं "विश्वदर्शतः" विश्वैः सर्वैर्मुमुक्षुभिर्दर्शतो द्रष्टव्यः साक्षात्कर्त्तव्य इत्यर्थः [अधिष्ठान-साक्षात्कारे हि आरोपितं निवर्त्तते] "ज्योतिष्कृत्" ज्योतिषः सूर्यादेः कर्त्ता [तथाम्नायते—"चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत"—इति*] ईदृशस्त्वं चिद्रूपतया "विश्वं" सर्वं दृश्यजातं "रोचमानं" दीप्यमानं यथा भवति तथा "आ भासि" प्रकाशयसि [मेत्रं त्वत्करणे हि सर्वं जगत् दृश्यते।†

---

* "चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत। श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत"—इति य० मा० शा० सं० ३१अ० १२क०। 'यथा दध्यादि-द्रव्याणि, गवादयः पशवः, ऋगादयो वेदाः, ब्राह्मणादयो मनुष्याश्च तस्मादुत्पन्नाः एवं चन्द्रादयो देवा अपि तस्मादेवोत्पन्ना इत्याह। मनसः सकाशात् चन्द्रमाः जातः चक्षोः चक्षुषः सकाशात् सूर्यः अजायत। वायुः प्राणश्च श्रोत्रात् कर्णादजायत। मुखादग्निरजायत' —इति च तद्भाष्यम् महीधर-कृतम्।

† "हे सूर्य! त्वं ज्योतिष्कृत् तेजसः कर्त्तासि विश्वमाभासि प्रकाशयसि च अग्निविद्युन्नक्षत्रचन्द्रग्रहतारकादिषु त्वदीय तेज इत्यर्थः। कीदृशं विश्वम्? रोचनं दीप्यमानं

तथाचाम्नायते—"तमेवभान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति"—इति * ॥८॥ ५०

हे सूर्य! त्वं "देवानां" "विशः" मरुन्नामकान् देवान् † ["मरुतो वै देवानां विशः"—इति श्रुत्यन्तरात्। तान्मरुन्नामकान्देवान्] "प्रत्यङ् उदेषि" प्रतिगच्छन्नुदयं प्राप्नोषि ‡। तेषा मभिमुखं यथा भवति तथेत्यर्थः। तथा "मानुषान्" मनुष्यान् प्रत्यङ् उदेषि। तेऽपि यथास्मदभिमुख एव सूर्य उदेतीति मन्यन्ते तथा "विश्वं" प्रात "स्वः" द्यां लोकं "दृशे" द्रष्टुं "प्रत्यङ्" उदेषि। यथा स्वर्लोक-वासिनो जनाः स्वस्याभिमुख्येन पश्यन्ति तथा उदेषीत्यर्थः [एतदुक्तं भवति—ये लोकाः

त्वत् प्रकाशेनेति भावः। कीदृशस्त्वं तरणिः तरत्यतिक्रामति नभोवर्त्मेति तरणिः। 'अश्यवितृभ्योऽनिरिति, (उणा० २. ९८) तरतेरनिप्रत्ययः। विश्वदर्शतः विश्वस्य दर्शतः दर्शनीयः दृशेरतच्॥"—इति वेददीपः।

* हिरण्मये परे कोशे विरजं ब्रह्म निष्कलम्। तच्छुभ्रं ज्योतिषां ज्योतिर्यदात्मविदो विदुः। न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽय मग्निः। तमेव भान्त मनुभाति सर्वं तस्य भासा सर्व मिदं विभाति"—इति मुण्डकोपनिषत् २, १०।

† "विशः"—इति, अग्ने जरितरिति व्याख्यायां (१५७ पृ०) प्रजाः। विशोविश इति व्याख्यायां (२४४ पृ०) प्रजाः। यद्वाव इति व्याख्यायां प्रजाः, तत्रैव विशे गृहे इति च। प्रवो महे इति व्याख्यायां (६९७पृ०) प्रजाः। निघण्टु-द्वितीय-तृतीये मनुष्यनामसु चतुर्थञ्च।

‡ "प्रत्यङ्ङिदं सर्वमुदेषि। प्रत्यङिदं सर्वमभि विपश्यसीति"—इति निरु० दै० ६, २४।

पश्यन्ति ते जनाः सर्वेऽपि स्वस्वाभिमुख्येन सूर्यं पश्यन्तीति *। तथाचाम्नायते—"तस्मात्सर्व एव मन्यन्ते मां प्रत्युदगात्"—इति ॥ १० ॥ ५१.

हे "पावक" सर्वस्य शोधक! "वरुण" अनिष्ट-वारक सूर्य! त्वं "जनान्" प्राणिनः "भुरण्यन्तं" धारयन्तं पोषयन्तं वा इमं लोकं† "येन"‡ "चक्षसा" प्रकाशेनानु पश्यसि अनुक्रमेण प्रकाशयसि तं प्रकाशं स्तुम इति शेषः। यद्वा, उत्तरस्या ऋचि सम्बन्धः तेन चक्षुसा उदेषीति¶। तथाच यास्केनोक्तं§—तत्ते वयं स्तुम इति वाक्यशेषोऽपिवोत्तरस्या मन्वयस्तेन व्याख्यातीति (निरु० दै० ६, २२)" ॥ ११ ॥ ५२

---

* "अपि वैतस्या मव१ येनापावक . . . । तेन नो जनानभि वि पश्यसि"—इति निरु० ६, २५-२६।

† "भुरण्युमिति क्षिप्रनाम भुरण्युः शकुनिर्भूरिं मध्वानं नयति स्वर्गस्य लोकस्यापि वोढा तत्सम्पाती भुरण्युरनेन पावकख्यानेन भुरण्यन्तं जनाँ अनु त्वं वरुण पश्यसि"—इति निरु० दै० ५, २२।

‡ क्वचित्तु "येना"—इति पाठः। तत्र द्व्यचः इति (६, ३, १३५) दीर्घः।

¶ "सर्वमेधे पक्ष्याकारेणाग्निश्चीयते तद्रूपमात्मानं सम्पाद्य मुक्तिमाप्नोति तदत्र प्रार्थ्यते—हे पावक शोधक येन चक्षसा दर्शनेन त्वं भुरण्यन्तमनुपश्यसि; क्षिप्रपाती पक्षी भुरण्युः, भुरण्युमात्मानं करोति भुरण्यसि, भुरण्यतीति भुरण्यन्, तम्; क्विबन्तात् शतृप्रत्ययः। सर्वमेधयाजिनं भुरण्युपक्षिरूपात्मानं कृत्वा स्वर्गं गच्छन्तं येन चक्षसानुपश्यसीत्यर्थः। तेन चक्षसा जनानस्मानपि भुरण्यतः हे वरुण त्वं पश्य वरुणः सूर्यः"—इति वेददीपः य० मा० श्रा० स० ३३ अ० २१ कं०।

§ "अपिवोत्तरस्यामित्यन्तमेव यास्कवचनम्।" अन्वयेत्यादिस्त्वर्थसम्बन्धः।

अथ द्वादशी ।

१र २र ३ १ २ ३ २ ३ १ २ ३ १ २
उद्द्यामेषिरजःपृथ्वहा*मिमानोअक्तुभिः ।
२ ३ १ २
पश्यञ्जन्मानिसूर्य ॥ १२ ॥ ५३†

अथ त्रयोदशी ।

१ २ उ॰२ ३ २ ३ २ उ २ २ ३क२र
अयुक्तसप्तशुन्ध्युवःसूरोरथस्यनप्त्र्यः‡ ।
१ २ ३ १ २
ताभिर्यातिस्वयुक्तिभिः ॥ १३ ॥ ५४¶

अथ चतुर्दशी ।

३ १ २ २ २ ३ २ ३ १ २
सप्तत्वाहरितोरथेवहन्तिदेवसूर्य ।
३ १ २
शोचिष्केशंविचक्षण ॥ १४ ॥ ५५§

॥ पञ्चम-दशति ॥

---

* "रजस्पृथ्वहा"—इति च ऋ० पाठः । † ऋ० १, ४, ७, ७ ।

‡ "नप्त्यः"—इति ऋ० पाठ । ¶ ऋ० १, ४, ७, ९ ।

§ ऋ० १, ४, ७, ८ ।

२र र ३ २र३र र २ र १
* हाउ२हाउ । सत्याओवा । ३ । दिदीहिविश्वत
२ १ २ र र १ २ २ र र ७र
स्पृथुः । उद्यामेषिरा३जाःपा१र्थ२ । अच्छामिमानो३
१ २ २ र १ २ २
आक्तूभा२इः । पश्यञ्जन्मानी३सूरा१र्यां२ । अयुक्त
१ २ र र १ २ २र
सप्ता३शुन्ध्यु१वा२ः । सूरोरथस्या३नाप्ता१या२ः । ता
र १ २ २ र १ २
भिर्यातिस्वा३युक्ता१इभी२ः । सप्तत्वाहरी३तोरा१था२
२ र १ २ २र र १ २
इ । वहन्तिदेवा३सूरा१या२ । शोचिष्केशंवी३चाक्षा१णा
२र र ३ २र३र र ३ २ ४
२३ । हाउ३हाउ । सत्याओवा । ३ । सत्या३ओ५वा६५
१ १ १ १
६ । ई२३४५ ॥ १५ † ॥

१र र ३ २र३र र २ र १ २
‡ हाउ२हाउ । ऋताओवा । ३ । दिदीहिंविश्वतस्पृ
१ २ र र १ १ २ र र ७र १ २
थुः । उद्यामेषिरा३जाःपा१र्थ२ । अच्छामिमानो३आक्तू
२ र १ २ २
१भा२इः । पश्यञ्जन्मानी३सूरा१र्यां२ । अयुंक्तसप्ता३

---

* तत्र प्रथम मिदम् (आ० ग्रा० ३, २, २९)।

† आ० गी० ३प० ६, २, १५।

‡ तत्राग्निमं षष्ठ मिदम् (आ० ग्रा० ३, २, २९)।

१ २ र र १ २ २र र
शुन्ध्यू१वा२ः। सूरोरथस्या३नाप्ता१या२ः। ताभिर्याति
१ २ २ र १ २ २
स्वा३युक्ता१इभी२ः। सप्तत्वाहरी३तोरा१था२इ। वह
र १ २ २र र १ २ २र
न्तिदेवा३सूरा१यां२। शोचिष्के शंवी३चाक्षा१णा२३। हाउ
र र ३ २र३र र ३ २ ४ ३ १
हाउहाउ। ऋताओवा। ३। ऋता३ओ५वा६५६। ई२
१ ३१
३४५॥ १६ * ॥ ५३॥ ५४॥ ५५

हे "सूर्य !" त्वं "पृथु" सुविस्तीर्णं "रजः" लोकं ["लोका रजांस्युच्यन्ते" †—इति यास्कवचनात्] द्युलोकं "द्याम्" अन्तरिक्षलोकम् "उदेषि" उद्गच्छसि ‡। किं कुर्वन्? अहानि "अक्तुभिः" रात्रिभिः सह "मिमानः" उन्मानयन् [आदित्यगत्यधीनत्वादहोरात्र-विभागस्य] तथा "जन्मानि" जननवन्ति भूतजातानि "पश्यन्" प्रकाशयन्॥

"उद्याम्"-"विद्याम्"—इति पाठौ॥ १२॥ ५३

---

* आ० गा० ३प्र० ६, २, १६।

† "रजो रजतेः। ज्योती रज उच्यते। उदकं रज उच्यते। लोका रजांस्युच्यन्ते असृगहनी रजसी उच्येते। रजांसि चित्रा विचरन्ति तन्यव इत्यपि निगमो भवति"—इति निरु० ४, १९।

‡ "व्येषि द्यां रजश्च पृथु महान्तं लोकमहानि च मिमानोऽक्तुभी रात्रिभिः सह पश्यञ्जन्मानि जातानि सूर्य। अपि वा पर्वस्यामि"—इति यास्कः दै० ६,२१।

"सूरः" सर्वस्य प्रेरकः सूर्यः* "शुन्ध्युवः" शोधिका अश्वस्त्रियः †। तादृशीः "सप्त" सप्त-सङ्ख्याकाः ‡ "अयुक्त" स्व-रथे योजितवान् ¶। कीदृशीः? "रथस्य" "नप्त्यः" नपातयित्र्यः। याभिर्युक्तो रथो याति न पतति इदृशीरित्यर्थः। एवम्भूताभिस्ताभिरश्वस्त्रीभिः "स्वयुक्तिभिः" स्वकीय-योजनेन रथे सम्बद्धाभिः "याति" यज्ञगृहं प्रत्यागच्छति। अतस्तस्मै हविर्दातव्य मिति वाक्यशेषः ॥ १३ ॥ ५४

हे "सूर्य !" "देव" द्योतमान "विचक्षण !" सर्वस्य प्रका-

---

* सूरशब्दः सूर्यार्थोऽत्र सर्वत्र—ऋ० १, २, ४, २—२, १, ४, ४—५, २, ३, ७—उ० ३, १, ८, १ — ४, २, १, १२—५, १, ८, २—५, १, ८, २—६, १, २, १—६, १, ४, २—९, १, ४, १। सोमार्थस्थानयोरेव—उ० ३, १, ५, १—४, १, २०. २॥

† "शुन्ध्युवः शुन्ध्युरादित्यो भवति शोधनात् तस्यैव। * * *। * * शकुनिरपि शुन्ध्युरुच्यते शोधनादेवोदकचरो भवति। आपोऽपि शुन्ध्युव उच्यन्ते शोधनादेव"—इति निरु० नै० ४, १६।

‡ "सप्त सृप्ता सङ्ख्या सप्तादित्यरश्मय इति वदन्ति"—इति निरु० नै० ४, २६। "सप्त युञ्जन्ति रथमेकचक्रमित्यादि निरु० नै० ४, २७। "सप्त प्राणाः प्रभवन्ति तस्मात् सप्तार्चिषः समिधः सप्त होमाः। सप्त इमे लोका येषु चरन्ति प्राणा गुहाशया निहिताः सप्त सप्त"—इति मु० उ० २, १।

¶ "रथे तिष्ठन्नयति वाजिनः पुरस्तात् सतो यत्र यत्र कामयते सुषारथिः। कल्याणसारथि रभीशूनां महिमानं पूजयामि मनः पश्चात् सन्तोऽनुयच्छन्ति रश्मयः"—इति निरु० दै० ३, १६। अपिच—"रथं क्षिप्रं मारुतं मेघं वर्षं अवणीय माकैर्यामह्वा यस्मिन्नस्थौ सुरमणीयान्युदकानि बिभ्रती सचा मरुद्भिः सह रोदसी"—इति निरु० दै० ५, ५०।

शयितः! "सप्त" सप्त-सङ्ख्याकाः "हरितः" अश्वाः* रस-हरण-शीला रश्मयो वा† "त्वा" त्वां "वहन्ति" प्राप्नुवन्ति। कीदृशम्? "रथे" अवस्थित मिति शेषः। तथा "शोचिष्केशं" शोचींषि‡ तेजांस्येव यस्मिन् केशा इव¶ दृश्यन्ते स तथोक्तस्त मिति §॥ ॥१४॥ ५५

इति सायणाचार्य्य-विरचिते माधवीये सामवेदार्थप्रकाशे
छन्दोव्याख्याने षष्ठोऽध्यायस्य पञ्चमः खण्डः॥

---

* "हरित आदित्यस्य"—इति अश्वविशेषनामसु निघ० १, १५, ३। "अश्वः कस्मादश्नुतेऽध्वानं महाशनो भवतीति वा। * * *। तस्याश्ववत् देवतावच्च निगमा भवन्ति"—इत्यादि निरु० नै० २, २७; दै० ४, ३०-३१।

† "सप्त ऋषयः"—इति रश्मिनामसु निघ० १, ५, १३। अत्र च यास्कः "रश्मिर्यमनात्"—इत्यादि निरु० नै० २, १५।

‡ "शोचिः"—इति ज्वलन्नामधेयेषु षष्ठं नैघण्टुकम् १, १७।

¶ "केशी केशा रश्मयस्तैस्तद्वान् भवति काशनाद्वा प्रकाशनाद्वा। तस्यैषा भवति * * *। केशीदं सर्व मिद मभि विपश्यति केशीदं ज्योतिरुच्यत इत्यादित्य माह। अथाप्येते इतरे ज्योतिषी केशिनी उच्येते धूमेनाग्नी रजसा च मध्यमः। * * *। एक एषा मित्यग्निः पृथिवीं दहति। सर्व मेकोऽभि विपश्यति कर्मभि रादित्यो गतिरेकस्य दृश्यते न रूपं मध्यमस्य"—इति निरु० दै० ६, २५-२६-२७।

§ "सप्तैतानादित्यरश्मीनयमादित्यो गिरति मध्यस्थानोर्ध्वशब्दो यत एतस्मिंस्तिष्ठति तानि धीतिभिश्च मनसा च विपर्ययन्ति परि भुवः परिभवन्ति सर्वाणि कर्माणि वर्षकर्मणेत्यधिदैवतम्। अथाध्यात्मं सप्तेमानीन्द्रियाण्ययमात्मा गिरति मध्यस्थानोर्ध्वशब्दो यान्यस्मिंस्तिष्ठति तानि धीतिभिश्च मनसा च विपर्ययन्ति परि भुवः परिभवन्ति सर्वाणीन्द्रियाणि ज्ञानकर्मणेत्यात्मगतिमाचष्टे"—इति निरु० प० २, ११।

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥ ६ ॥

इति श्रीमद्राजाधिराज-परमेश्वर-वैदिक-मार्ग-प्रवर्त्तक-
श्रीवीर-बुक्क-भूपाल-साम्राज्य-धुरन्धरेण सायणा-
चार्येण विरचिते माधवीये सामवेदार्थ-प्रकाशे
छन्दोव्याख्याने आरण्यएवाध्येतव्यः
षष्ठोऽध्यायः समाप्तः ॥

॥ समाप्तम् आरण्यम् पर्व आरण्यकाण्डं वा ॥

॥ इति चतुर्थम्पर्व

॥ सामवेद-संहितायां छन्दआर्चिकः समाप्तः ॥

॥ ओं नमः सामवेदाय ॥

॥ सामवेदसंहिता ॥

तत्र

॥ अथ महानाम्न्यार्चिकः ॥ *

(भाष्यकृतो भूमिका)

ऐन्द्रोरथ महानाम्नीः शक्वरीर्वा विकर्षिताः ।
पञ्चभिः सहिता अन्ते पुरीषपदनामभिः ॥
एताः प्रकृतितस्तिस्र उपसर्गैस्तु संयुताः ।
नव सङ्ख्या इति प्राहुर्वेदाध्ययनशालिनः ॥
ऐतरेय-ब्राह्मणेऽपि शस्त्रे षोडशि-नामके ।
तिस्रः प्रोक्ता महानाम्नास्त्रैलोक्यात्मत्ववर्णनात् ॥

---

* महानाम्नीनां पाठस्तु न तु छन्दआर्चिके नापि उत्तरार्चिके परं छन्दआर्चिके समाप्ते तत्पुस्तकान्त्यभाग एव सर्वत्र दृश्यते, एवं आरण्यगाने समाप्ते च ततोऽनन्तरं महानाम्नी-सामपाठस्तथैव पुस्तके सर्वत्रेति परिशिष्टत्व मासामस्य च ज्ञायत इति छन्दआर्चिकान्ते एव व्याख्यातवान् भगवान् सायणः ।

तत्र हि महानाम्नीना मुपसर्गानुपसृजत्ययं वै लोकः प्रथमा महानाम्न्यन्तरिक्षलोको द्वितीयाऽसौ लोकस्तृतीयेति । नन्वेताः 'शक्वरीच्छन्दस्का व्याक्रियन्त' इत्युक्ताश्चेत् षट्पञ्चाशदक्षराः स्युः । तथा च 'समाम्नातं चतुर्विंशत्यादि चतुरुत्तरमिति (पि०) । अस्यार्थः—गायत्र्यादीना मतिधृत्यन्तानां छन्दसां चतुर्विंशत्यक्षराण्यारभ्य उत्तरोत्तरं चतुर्षु चतुर्षु अक्षरेष्वधिकेषु सत्सु उष्णिगादि-च्छन्दांसि जायन्ते*। एवं क्रमशोऽक्षराधिक्ये सति शक्वरी षट्पञ्चाशदक्षरा सम्भवतीति । एता ऋचस्तु शक्वरीभ्योऽधिकाक्षरा दृश्यन्ते । तस्मादासा मुपसर्गाक्षरैराधिक्यं न तु स्वत इति ज्ञायते । तर्हि के पुनरुपसर्गाः ? के पुनः शाक्वराः पादाः ? इत्युच्यते—

---

*

छन्दांसि		अतिच्छन्दांसि		विच्छन्दांसि	
छन्दोनाम	अक्षरसंख्या	छन्दोनाम	अक्षरसंख्या	छन्दोनाम	अक्षरसंख्या
१ गायत्री	२४	१ अतिजगती	५२	१ कृतिः	८०
२ उष्णिक्	२८	२ शक्वरी	५६	२ प्रकृतिः	८४
३ अनुष्टुप्	३२	३ अतिशक्वरी	६०	३ आकृतिः	८८
४ बृहती	३६	४ अष्टिः	६४	४ विकृतिः	९२
५ पङ्क्तिः	४०	५ अत्यष्टिः	६८	५ संस्कृतिः	९६
६ त्रिष्टुप्	४४	६ धृतिः	७२	६ अतिकृतिः	१००
७ जगती	४८	७ अतिधृतिः	७६	७ उत्कृतिः	१०४

प्रथमा। "विदामघवन्विदा"—इति द्विपदा ऋगुपसर्गः। ततः "शिक्षाशचीनाम्पते"—इत्याद्यास्त्रयोऽष्टाक्षराः शाक्वराः। ततः "स्वर्णांशुः"—इति पञ्चाक्षरः पादः। अत्राक्षर-विश्लेषेण पञ्चाक्षरत्वं द्रष्टव्यम्। "प्रचेतनप्रचेतय:"—इत्यष्टाक्षरः। एतौ द्वावुपसर्गसञ्ज्ञौ। "इन्द्रद्युम्नायनइष"—इति पादोऽष्टाक्षरः शाक्वरः। "एवाहिशक्र:"—इति पञ्चाक्षर उपसर्गः। "रायेवाजायवज्रिव:"—इत्याद्यास्त्रयः पादाः शाक्वराः। "आयाहिपिबमत्स्व"—इति पादोऽष्टाक्षर उपसर्गः। इत्येव ऋक् प्रथमा॥

अथ द्वितीया। "विद्मारायेसुवीर्यम्"—इति द्विपदा उपसर्गः। "मꣳहिष्ठवजिन्नृञ्जसे"—इत्याद्यास्त्रयोऽष्टाक्षराः पादाः शाक्वराः। ततः "अंशुर्नशोचिः"—इति पञ्चाक्षरः पादः। "चिकित्वोअभिनोनय"—इति पादः। एतौ द्वावुपसर्गौ। "इन्द्रोविदेतमुस्तुहि"—इति पादोऽष्टाक्षरः शाक्वरः। "ईशेहिशक्र:"—इति पञ्चाक्षरः पाद उपसर्गः। "तमूतयेहवामहे"—इत्याद्यास्त्रयोऽष्टाक्षराः पादाः शाक्वराः। "क्रतुश्छन्दऋतम्बृहत्"—इति पाद उपसर्गः। इत्येवं द्वितीया॥

तृतीयस्याः। "इन्द्रन्धनस्यसातयेहवामहे"—इति द्विपदा उपसर्गः। "सनःस्वर्षत्"—इत्याद्यास्त्रयोऽष्टाक्षराः शाक्वराः पादाः। "अंशुर्मदाय"—इति पञ्चाक्षरः पादः। "सुम्नआधेहि

नीवसा"—इत्यष्टाक्षरः पादः। एतौ द्वावुपसर्गौ। "पूर्तिः-शविष्ठशस्यते"—इति पादोऽष्टाक्षरः शाक्वरः। "वशीहिशक्रः" —इति पञ्चाक्षर उपसर्गः। "नूनन्तन्नव्यंसन्यसे"—इत्याद्यास्त्रयो ऽष्टाक्षराः शाक्वराः। "शूरोयोगोषुगच्छति"—इति पादौ द्वावुपसर्गाविति तृतीया ऋक् सम्पन्ना ॥

अत्र प्रथमायाः सप्त शाक्वराणि पदानि, पञ्चोपसर्गाः। एवं द्वितीयस्या अपि पदान्युपसर्गाः। तृतीयायास्तु सप्त शाक्वराणि पदानि, षडुपसर्गाः। इत्युक्तार्थौ निदानकल्पे सूत्रादिकं सम्यगालोचयद्भिः पूर्वाचार्यैः श्लोकद्वये सङ्गृह्य दर्शितः—

"प्रथमं द्विपदा, त्रीणि शाक्वराणि पदान्यतः।
पञ्चार्णाष्टाक्षरौ चोपसर्गावेकश्च शाक्वरः ॥ १ ॥
पञ्चार्ण उपसर्गोऽथ त्रयस्ते वह्निरन्तिमः।
इय माद्या ; द्वितीयैवं ; तृतीया पुनरन्तिमः।
अधिकोऽष्टाक्षरः पाद उपसर्ग इति स्थितिः॥२॥"—इति ॥

अत्र सर्वत्रोपसर्गान् परित्यज्य केवल-पदगताक्षर-सङ्ख्यायां कृतायां षडधिकपञ्चाशत्-सङ्ख्याकान्यक्षराणि जायन्ते। अतस्तद्द्वितीया शाक्वरीति न विरोधः॥ एतासु गीयते साम यत्तच्छाक्वर मुच्यते। तत्पञ्चमेऽह्नि पृष्ठेषु होतुःपृष्ठं विधीयते।

उपसर्गैः संयुताना मासा मिन्द्रोऽधिदेवता।
माध्यन्दिनं यत् सवनं सर्वं मैन्द्र मिति स्थितम्॥

अत्रैवाश्वलायनेन स्व-ब्राह्मण मनुसरता कश्चिद्विशेषोऽनुष्टुब् गायत्री सम्पादनादिर्दर्शितः—

"प्रचेतनप्रचेतयायाहिपिबमत्स्व ।

क्रतुश्छन्दऋतम्बृहत्सुम्नआधेहिनोवसः ॥"—इति । *

"चिकित्वोअभिनोनयश्शूरोयोगोषुगच्छति ।

सखामुशेवोअद्वयुः ॥"—इति । †

गायत्र्यादिरित्येव मादिः एष तु प्रयोग-सौकर्यार्थः । अस्माभिस्त्विदानी मर्थ-सौकर्यार्थं क्रमेण सोपसर्गा ऋचो व्याख्याताः । ‡

---

* एषानुष्टुप् सम्पन्ना, अष्टाक्षर-चतुष्पदात्वस्य सम्पादनात् ।

† एषा गायत्री सम्पन्ना, अष्टाक्षर-त्रिपदात्वस्य सम्पादनात् ।

‡ ग्रन्थकारादयो हि ग्रथनीयं व्याख्येयं वा प्रथमं स्व मनस्येव सम्पाद्यते, ततश्च लेखन्यादिभिः कार्य्यतेऽतोऽत्र 'व्याख्याताः'—इति भूतप्रयोगो नासाधुः, "कौमुदीयं विरच्यते"—इत्यादावप्येवमेव ।

॥ हरिः ओम् ॥

(प्रथमास्तिस्रः)

३ १ २ ३ २ ३ १र २र २ १ २
विदामघवन्विदागातुमनुशꣳशिषो दिशः ।
१ २ ३ १ २
शिक्षाशचीनाम्पते पूर्वीणाम्पुरूवसो ॥ १ ॥
३ २उ ३ १ २ ३ २ २
आभिष्ट्वमभिष्टिभिःस्वाऽ३र्न्नाꣳशुः ।
१ २ ३ १ २ ३ १ ० ३ १ २ ३ २
प्रचेतनप्रचेतयेन्द्रद्युम्नायनद्भुषे ॥ २ ॥
३ २उ ३ २ ३ १र २र
एवाहिशक्रोरायेवाजायवज्रिवः
१ २ ३ २ ३ १ २
शविष्ठवज्रिन्नृञ्जसेमꣳहिष्ठ
३ २ ३ १ २ ३ २ ३ १ २
वज्रिन्नृञ्जसआयाहिपिबमत्स्व ॥ ३ ॥ १

१ २१र २ १ १र १
* ए२ । विदामघवन्विदाः । गातुमनुशꣳसिषः ।
१ २ २ ५ १र १ र २ र र
दाइशा३१उवा२३ । ई३४डा । ए२ । शिक्षाशचीनाम्प
१ २र र १र १ २ २ ५ २र
ताइ । पूर्वीणाम्पुरू२ । वसा३१उवा२३ । ई३४डा । आ

महानाम्नी साम (आ० ब्रा० ३,१,२९) ।

१ १ २ २ ५ १ र
भिष्वमभा२इ। ष्टिभिरा३१उवा२३। ई३४डा। स्वर्नाꣳ
५ २ २ ५ १ १र र
शूरः। ह्वा३२उवा२३। ई३४डा। प्राचे। तनप्रचेतया।
१ २ २ १र १ १ १ २ २ १र
इन्द्रा। द्युम्नायना२इषाइ। इडा। इन्द्रा। द्युम्नाय
१ १ १ २ २ १र १
ना२इषाइ। अथा। इन्द्रा। द्युम्नायना२इषाइ।
१ १रर र र र र र २ २ २ २ १
इडा। एवाहिशक्रोरायेराजायवा१ज्री३वाः। शविष्ठ
२ ४ ५ १ १ १ २
वज्रिन्ना३। जासाइ। मꣳहिष्ठवज्रिन्ना२३हो। जासा३२
१ ११११ १ २ २ १
उवा२३। इटइडा२३४५। आया। हिपिबमा२
१ १ ११२१
त्सुवा। इडा२३४५॥—

तत्र तावदृक्षु, प्रथमं द्विपदा माह—“विदामघवन्विदागातुमनुशꣳसिषोदिशः”—इति। हे “मघवन्” मघं धनं [मंहते-दानकर्मणः *] धनवन्निन्द्र! “विदाः” त्वं विद्धि, अत्र वेदितव्य-कर्म-विशेषस्यानुपादानात् सर्वं जानीहीत्यर्थः [विदेः पञ्चम-

---

* “मंहते” — इति दानकर्मसु पठितं नैघण्टुकम् ३, २०।

लकारे रूपम् [*]] यतस्त्वं सर्वज्ञः तस्मात् “गातु” यजमानगन्तव्यं देशं [†] “विदाः” जानीहि। यद्वा, गातुर्गायतेः स्तुतिकर्मणः [‡] त्वदर्थं क्रियमाणां स्तोतुः स्तुतिं विद्धि। ततो “दिशः” यजमानस्य साधुमार्गेण स्वर्गं गन्तुं मार्गान् “अनु शꣳसिषः” अनुशंसोऽपदिशं बोधयेति यावत् [शंसतेः पञ्चम-लकारे (पा० ३, ४, ७,) रूपम्। अडागमः [¶]]—अयमुपसर्गभागः ॥

अथ शाक्करभाग माह—“शिक्षाशचीनाम्पतेपूर्वीणाम्पुरुवसो। आभिष्ट्वमभिष्टिभिः”—इति। हे “शचीनाम्पते” शचीशब्देन कर्म प्रज्ञा वा [§] “पूर्वीणां” बह्वीनां [‖] शचीनां पते स्वामिन्! हे “पुरुवसो” पुरु प्रभूतं वसु धनं यस्य तस्य सम्बोधनं हे प्रभूतधनेन्द्र! “आभिः” इदानीं क्रियमाणाभिः “अभिष्टिभिः” अभ्येषणाभिः प्रार्थनाभिः स्तुतिभि रस्मदीयाभि

---

[*] लेटीत्यर्थः (पा०३,४, ७)।

[†] “गातुः”—इति पृथिवी-नामसु विंशं नैघण्टुकम् १,१। “गातुं यज्ञाय गातुं यज्ञपतय इत्यपि निगमो भवति। गमनं यज्ञाय गमनं यज्ञपतये।”—इति निरु० नै० ४, २।

[‡] “गायति”—इति स्तुति-कर्मसु द्वितीयं नैघण्टुकम् ३, १४।

[¶] “लेटोऽडाटौ”—इति पा० ३, ४, ९४।

[§] “शची”—इति कर्मनामसु द्वाचत्वारिंशत्तमं नैघण्टुकम् (२,१) ; प्रज्ञानामसु त्वष्टमम् (३, ९)।

[‖] “पुरु”—इति बहुनामसु तृतीयं नैघण्टुकम् ३, १।

हेतुभिः "शिक्ष"* [शिक्षतिर्दानकर्मा (निघ० ३, २०, ८)] देहि वसूनीति] शेषः । पुरुवसो-इति सम्बोधन-सामर्थ्याद्वसूनीति लभ्यते ॥

अथोपसर्गभाग माह—"स्वर्णांशुः । प्रचेतनप्रचेतये"—इति । स्वः, न, अंशुरिति पदत्रयम् । स्वरादित्यः,† नकार उपमार्थीयः‡ । स्वः, इव [अंशुः अश्नोतेर्व्याप्तिकर्मणः (निघ० २, १८, १०)] व्याप्तो भवतीन्द्रः । हे "प्रचेतन" प्रकृष्टा चेतना बुद्धिर्यस्यासौ तस्य सम्बोधनं हे प्रशस्तज्ञानेन्द्र ! "प्रचेतय" अस्मदीयां भक्ति मवधारय जानीहि ॥

अथोभयभाग माह—"द्युम्नायनइषएवाहिशक्रः"—इति । हे इन्द्र ! "नः" अस्मभ्यं "द्युम्नाय" ["द्युम्नं द्योततेर्यशोवान्नं वा" —इति यास्कः (नै० ५, ५)] यशसे यद्वा, द्युम्नाय [धननामैतत् (निघ० २, १०, १३) धनलाभाय] "इषे" अन्नलाभाय च भव [आख्याताध्याहारः । हि शब्दः कारण-परः] "हि" यस्मात् त्वं "शक्रः" धन-दाने समर्थ एव भवसि । तस्माद्धनादिकं प्रयच्छ ॥

---

* मन्त्रे तु "शिक्षा"—इति दीर्घान्तः पाठः "द्व्यचोऽतस्तिङः (पा० ६, ३, १२४) —इति दीर्घः ।

† स्वरादित्यो भवति—इत्यादि निरु० नै० २, १४ ।

‡ "नेति प्रतिषेधार्थीयो भाषाया मुभय मन्वध्यायं नेन्द्रं देव ममंसतेति प्रतिषे-

(द्वितीया स्तिसः)

३ २ ३ २३ २ ३ २३ १ २ ३ २ ३ २ ३ १ २
विदारायेसुवीर्य्यम्भवोवाजानाम्पतिर्वशाꣳअनु ।
१ २ ३ २ ३ १र २र ३ १ २
मꣳहिष्ठवज्रिन्नृञ्जसेयःशविष्ठःशूराणाम् ॥ ४ ॥

अथ शाक्करभाग माह—"रायेवाजायवज्रिवः । शविष्ठवज्रिन्नृञ्जसेमꣳहिष्ठवज्रिन्नृञ्जसे"—इति । हे "वज्रिवः" वज्रवन्निन्द्र ! एकोमत्वर्थीयोऽनुवादः । यद्वा, वज्रः व्रजनं गमनं तद्वान्वज्री । अथवा वज्रायुधं तद्वन्निन्द्र ! "राये" धनलाभाय "वाजाय" अन्नलाभाय च प्रसन्नो भवेति शेषः । हे "शविष्ठ" अतिशयेन बलवन् ! हे "वज्रिन्" इन्द्र ! "ऋञ्जसे" [ऋञ्जतिः प्रसाधनकर्मा (निघ० ३, ५, ८)] अस्माभिर्धनलाभार्थं प्रसाध्यसे । यद्वा, [ऋञ्जतेः पञ्चमे लकारे (पा० ३, ४, ७) रूपम्] प्रसाधय अस्मान्धनादिभिः समृद्धान् कुर्वित्यर्थः । हे "मंहिष्ठ" [मंहतेर्दानकर्मणः] अतिशयेन दानशील पूज्य ! वा हे "वज्रिन्" "ऋञ्जसे" अस्माभिः प्रसाध्यसे ॥

अथापरभाग माह—"आयाहिपिबमत्स्व"—इति । यस्मादेवं तस्मात् "आयाहि" अस्मदीयं यज्ञं प्रत्यागच्छ । आगत्य च पिब । तं सोमं पीत्वा "मत्स्व" हृष्टो भवेति ॥ (१-२-२) ॥

थार्थीयः पुरस्तादुपचारस्तस्य यत प्रतिषेधति । दुर्मदासो न सुरायामित्युपमार्थीय उपरिष्टादुपचारस्तस्य येनोपमिमीते"—इति निरु० नै० १, ४ ।

१र २र ३ १ २ ३ २उ ३ २
योमꣳहिष्ठोमघोनामꣳशुर्न शोचिः ।
१ २ ३ १ २ ३१ २ ३र २र
चिकित्वोअभिनोनयेन्द्रोविदेतमुस्तुहि ॥ ५ ॥
१ ३ २ ३ २उ ३ १ २ ३ १ २ ३ १ २
ईशेहिशक्रस्तमूतये हवामहेजेतारमपराजितम् ।
१ २ ३ २ ३ २ ३ २ ३ १ २ ३ २३१
सनः स्वर्षदतिद्विषःक्रतुश्छन्दऋतम्बृहत् ॥ ६ ॥ २

१ २१र र र १ १ र र र
ए३ । विदारायेस्तुवीरियाम् । भुवोवाजानाम्पतिर्व
१ २ २ ५ १ १
शाꣳ२ । अनुआ३१उवा२३ । ई३४डा । ए२ । मꣳहि
२ १ १ २ ५२ २
ष्ठवज्रिन्नृञ्जसाइ । यःशविष्ठःशूरा२णा३१उवा२३ । ई३४
२ १र र ५ २ २ ५
डा । योमꣳहिष्ठोमघोरा । ना३१उवा२३ । ई३४डा ।
२ १ र ५ २ २ ५ १
अꣳशुर्नशोचा२इः । हा३१उवा२३ । ई३४डा । चाइ ।
१ र र १ २ २१र १ १
कित्वोअभिनोनया । ईन्द्रो । विदेतमू२स्तुहाइ । इडा ।
१ २ २१र १ १ १ २ २१र
ईन्द्रो । विदेतमू२स्तुहाइ । अथा । ईन्द्रो । विदेतमू
१ १ १र र र र १ २ २
२स्तुहाइ । इडा । ईशेहिशक्रस्तमूतये हवा१मा३हाइ ।

२१२र २ ४ ५ १ १
जेतारमपरा३। जाइताम्। सनःस्वर्षदतां२३होइ।
१ २ १ ११११ १ २ २ १
हाइषा३१उवा२३। इट्इडा२३४५। क्रातूः। कन्द
१ १ ११११
ऋतारम्बृहात्। इडा२३४५॥

अथ द्वितीयाया ऋचि प्रथमं द्विपदा माह—"विदाराये सुवीर्यम्भुवोवाजानाम्पतिर्वशाꣳअन्विति। हे इन्द्र! "सुवीर्य" शोभनोवीरः पुत्रः शोभनपुत्रोद्भव-सामर्थ्यम्! यद्वा, शोभनवीर्यं युद्धादिष्वपराजयं "विदाः" लम्भय प्रापय। किमर्थम्? "राये" धनार्थम् धनं रक्षितु मित्यर्थः। "वाजानां" सेनानां बलानां वा "पतिः" स्वामी त्वं "भुवः" भवसि। "वशान्" वशः कर्मणिर्वशिरण्योरित्यप्रत्ययः। काम्यमानानर्थान् "अनु" अभि लक्ष्य यथाकाम मित्यर्थः। यद्वा वशांस्त्वदधीनान् यजमानान् "भुवः" भावयसि [भवतेः पञ्चमलकारे (पा० ३, ४, ७) रूपम्। "भूसुवोस्तिङि" (पा० ७,४,८८)—इति गुण-प्रतिषेधः॥

अथ स्तीयमाग माह—"मंहिष्ठवज्रिन्नृञ्जसेयःशविष्ठः शूराणाम्। योमंहिष्ठोमघोनाम्"—इति। हे "मंहिष्ठ" अतिशयेन बलवन्! "यः" च "मघोनां" मघशब्दो धनवाची तद्वतां मध्ये मंहिष्ठः अतिशयेन दाता. तस्म,दस्माभिर्धनार्थं प्रसाध्यसे॥

अथोपसर्गभाग माह—"अंशुर्नशोचिः। चिकित्वोअभिनोनय।"- इति "अंशुर्न" व्याप्त आदित्य इव शोचिर्दीप्तो भवतीन्द्रः [शुच दीप्तौ (भ्वा॰ आ॰)] शुद्धः [शुचेर्मत्वर्थीयलोपः] शोचिष्मान्। अथ प्रत्यक्षस्तुति—हे "चिकित्वः" चिकित्वन् [मतुवसोरुसम्बुद्धौ छन्दसि (पा॰८,३,१)"--इति रुत्वम्] ज्ञानवन्निन्द्र! "नः" अस्मान् अभि लक्ष्य "नय" धनादि प्रापय॥

अथ भागद्वयं मिलित्वाह—"इन्द्रोविदेतमुस्तुहि। ईशेहि शक्रः"—इति। "इन्द्रः" परमैश्वर्ययुक्तः। "विदे" विद्यते सर्वं ज्ञायते "तमु" तमेवेन्द्रं "स्तुहि" स्तुतिं कुर्विति। ऋषिरात्मानमेव शास्ति। "हि" यस्मात् "शक्रः" शत्रु-हनन-समर्थ इन्द्रः "ईशे" ईष्टे सर्वस्येति तस्मात् तमेव स्तुहीति समन्वयः॥

अथ शाक्करभाग माह—"तमूतयेहवामहेजेतारमपराजितम्। सनःस्वर्षदतिद्विषः"—इति। "तम् इन्द्रम्" "ऊतये" अस्मद्रक्षणार्थं "हवामहे" आह्वयामहे। कीदृशम्? "जेतारं" युद्धेषु शत्रुजयशीलं [ताच्छील्ये तृन् प्रत्ययः (पा॰३,२,१३५)]। अतएव अपराजितं न काप्यन्यैः पराजितम्। "सः" इन्द्रः "नः" अस्माकं "द्विषः" द्वेष्टॄन् "अति स्वर्षत्" अत्यर्थमुपतपतु विनाशयतु। स्वृ शब्दोपतापयोरित्यस्मात् पञ्चम-लकारे रूपम्। अथ वा

---

* "इन्द्रतैश्वर्य-कर्मणः"—इति निरु॰ दै॰ ४, ८।

(तृतीया स्वरः)

२ ३ १ २ ३ १२ ३ १ २ ३ १ १
इन्द्रन्धनस्यसातयेहवामहेजेतारमपराजितम् ।
१ २ ३ २ ३ २ ३ १ २ ३ २ ३ १ २
सनःस्वर्षदतिद्विषःसनःस्वर्षदतिद्विषः ॥ ७ ॥
१ २ ३ १ २ ३ १र २र
पूर्वस्ययत्तेअद्रिवोꣳशुर्मदाय ।
३ १र २र ३ १ २
सुम्नआधेहिनोवसोपूर्त्तिःशविष्ठशस्यते ॥
३ १उ ३ २ ३ १र १र ३ १ २
वशीहिशक्रोनूनन्तन्नव्यꣳसन्यसे ॥ ८ ॥

स्वरतिर्गतिकर्मा (निघ० २,१४,५४) अस्मत्तः शत्रूनतिगमयतु अतिपारयतु । तथा च बह्वृचाः—"सनःपर्षदित्यामनन्ति ॥

अथोपसर्गभागमाह—"क्रतुश्छन्द ऋतम्बृहत्"—इति । शत्रुहननानन्तरं "क्रतुः" अस्माभिरनुष्ठीयमानं कर्म* । "छन्दः"† गायत्र्यादिकं शस्त्रलक्षणम् । "ऋतम्" उदकं‡ सोमरस इत्यर्थः । यद्वा ऋतं सत्यभूतं¶ कर्मफलं तत्सर्वं "बृहत्" प्रभूतमस्त्विति शेषः ॥ (४-५-६) ॥

---

* "क्रतुः"—इति कर्मनामसु एकादशं नैघण्टुकम् २, १ ।

† "छन्दांसि छन्दनात्"—इति निरु० दै० १, १२ ।

‡ "ऋतम्"—इति उदकनामसु षट्षष्ठितमं नैघण्टुकम् १, १

¶ "ऋतम्"—इति सत्यनामसु षष्ठं नैघण्टुकम् ३, १० ।

३१र २र २ २ १
प्रभोजनस्यवृत्रहन्त्समर्य्येषुब्रवावहै ।
२ ३ २उ ३ १ २ ३ १ २ ३ २ ३ २ २
शूरोयोगोषुगच्छतिसखासुशेवो अद्वयुः ॥ ९ ॥ ३

१॰ १ २र १ १र र र र
ए२ । इन्द्रन्धनस्यसातयाइ । हवामहेजेतारमप
१ २ २ ५ १ १ २
रा२ । जितमा३१उवा२३ । ई३४डा । ए२ । सनःस्वर्ष
१ १ १ २
दतिद्विषाः । सानःस्वर्षदता२इ । द्विषआ३१उवा२३ ।
२ ५ १र १ २ २
ई३४डा । पर्वस्ययत्तआ२ । द्रिवआ३१उवा२३ । ई३४
५ २ १ र ऽ २ २ ५
डा । अ॒ंशुमदाया२ । हा३१उवा२३ । ई३४डा :
१ १ २ र र १ २ २ १ १
सूम्नआधेहिनोवसाउ । पूर्त्तीः । शविष्ठशा२स्यताइ ।
१ १ १ २ १ १ १ १ २
